राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला – 305 ISSN: 2231 - 0452

राष्ट्रियसंस्कृतविद्यापीठस्य षाण्मासिकी शोधपत्रिका

# महस्विनी

कुसुमम् : नवमम् (२०१४) सम्पुटम् : १ & २

**प्रधानसम्पादकः**
**आचार्यः हरेकृष्णशतपथी**
**कुलपतिः**

**सम्पादकः**
**प्रो. सीहेच्.पी.सत्यनारायणः**

**राष्ट्रियसंस्कृतविद्यापीठम्**
(विश्वविद्यालयानुदानायोगस्य 1956 अधिनियमस्य
तृतीयधारया अनुमोदितः विश्वविद्यालयः)
**तिरुपतिः - 517507, आन्ध्रप्रदेशः**
**2014**

राष्ट्रियसंस्कृतविद्यापीठग्रन्थमाला – ३०५

# महस्विनी

(विद्यापीठस्य षाण्मासिकी शोधपत्रिका)

**ISSN : 2231 - 0452**

कुसुमम् : नवमम्
सम्पुटम् : १ & २

प्रकाशनवर्षम् : २०१४
प्रतिकृतयः : ५००

© राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, (आन्ध्रप्रदेशः)

प्रकाशकः प्रधानसम्पादकश्च :
**आचार्यः हरेकृष्णशतपथी**
**कुलपतिः**

संयोजकः :
**अनुसन्धानप्रकाशनविभागः**
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

मूल्यम् : ₹ 260/-

मुद्रकः : अन्नपूर्णा ग्राफिक्स्, तिरुपतिः

*Rashtriya Sanskrit Vidyapeetha Publication Series* – *305* **ISSN: 2231 - 0452**

# MAHASVINĪ

**( Research Journal )**

**VOL. :** 9 [2014] **PART. :** I & II

**General Editor**
**Prof. HAREKRISHNA SATAPATHY**
**VICE - CHANCELLOR**

**Editor**
**Prof. Ch.P. Satyanarayana**

RASHTRIYA SANSKRIT VIDYAPEETHA
**(University established under Section 3 of UGC Act, 1956)**
TIRUPATI - 517 507 (A.P.)
2014

Rashtriya Sanskrit Vidyapeetha Publication Series – 305

**MAHASVINĪ**
( Half yearly Research Journal of Vidyapeetha )

ISSN : 2231 - 0452

Volume : Ninth
Part : I & II

Year of publication : 2014
Copies Printed : 500

© Rashtriya Sanskrit Vidyapeetha, Tirupati, (A.P.)

Publisher & General Editor :

**Prof. Harekrishna Satapathy**
**Vice – Chancellor**

Co-ordinator :

**Department of Research & Publications**
Rashtriya Sanskrit Vidyapeetha, Tirupati

Price : ₹ 260/-

Printed at: Annapurna Graphics, Tirupati.

**Disclaimer:** The views expressed in the Research paper are those of the authors and not of the editors.

Grams: Vidyapeetha

**RASHTRIYA SANSKRIT VIDYAPEETHA**
(University established under sec.3 of UGC Act, 1956)
**TIRUPATI – 517 064 (A.P.)**
(Accredited at A+ Level by NAAC)

**Prof. HAREKRISHNA SATAPATHY**
VICE - CHANCELLOR

Office: Ph.: 0877-2287680
Fax : 2287838
Residence : Ph.: 2287826
Fax : 2286349
E-mail : hks_vc@yahoo.co.in

*" Centre of Excellence in the Subject of Traditional Sastras"*

---

# पुरोवाक्

अतीवानन्दस्य विषयोऽयं यत् राष्ट्रियसंस्कृतविश्वविद्यालयस्य अतीव गुरुत्व-पूर्णायाः अनुसन्धानमूलकमौलिकप्रबन्धविभूषितायाः वैदुष्यगम्भीरायाः "महस्विनी"-शोधपत्रिकायाः नवमं कुसुमं सम्प्रति विदुषां पाठकानां करकमलयोः सादरं समर्प्यते। शोधमार्गेण अनुसन्धित्सूनां या काऽपि नूतनप्रातिभनिर्गलिता तात्त्विकविषयविश्लेषिता सम्प्राप्तिर्भवति तस्याः प्रतिबिम्बः विविधासु पत्रिकासु द्रष्टुं शक्यते । एतासां शोधसम्प्राप्तीनां लोकलोचनगोचरीकरणार्थं शोधपत्रिकाणां महती भूमिका भवति । विविधेषु विश्वविद्यालयेषु एतादृश्यः नैकाः पत्रिकाः प्रकाश्यन्ते । तद्वत् संस्कृतानुसन्धान-क्षेत्रे ये छात्राः विद्यावारिधिः (Ph.D.), विशिष्टाचार्यम् (M.Phil.) इत्याद्युपाधिनिमित्तं यत्किमपि शोधकार्यं कृतवन्तः, तेषां फलं शोधलेखरूपेण अस्माकं "महस्विनी" इत्याख्यायां पत्रिकायामधुना प्रकाश्यते । इतः पूर्वमष्टौ कुसुमानि अस्माभिः विपश्चिताममलकरकमलेषु समर्पितानि । कथनं बाहुल्यमात्रं यत्ताः सर्वाः संख्याः सर्वैः सर्वदैव समादृताः । परवर्तिसम्पुटस्य कृते सर्वे उत्कण्ठिताश्च । अतः इयमपि संख्या समेषां तथैव समादरणीया भवितेति मम दृढविश्वासः ।

वैदुष्यमहोमण्डितानां नैकपण्डितानामप्रतिमप्रतिभामहसा विभूषितायामस्यां शोधपत्रिकायां संस्कृतवाङ्मयस्य, भारतीयसंस्कृतेश्च विभिन्नान् विभवान् आधारीकृत्य

विभिन्ना: प्रबन्धा: प्रकाशिता: । एतेषां प्रबन्धानां शैली यथा मनोमुग्धकारिणी ; तथा विषयविन्यासोऽतीव गम्भीर: । केषाञ्चित् विदुषां सरस्वती कदाचित् दर्शनारण्ये च कदाचित् रसमयसाहित्योद्याने च कदाचित् गम्भीरव्याकरणाकूपारे च कदाचित् श्रुति-स्मृति-पुराणादिसीमाहीनप्रान्तरे सानन्दं नरीनृत्यमानाऽवलोक्यते । एतत्सर्वं न केवलं शोधप्रबन्धानां मौलिकत्वमपि तु प्रबन्धरचयितॄणामप्रतिमपाण्डित्यप्रकर्षं सहर्षं सूचयति। येषां सुरभारतीसमुपासकानां विपश्चिदपश्चिमानां गाम्भीर्यपूर्णलेखैरियं महस्विनी महिमान्विता जाता, तेभ्य: सर्वेभ्य: विश्वविद्यालयपक्षत: अभिनन्दनं समर्पयामि ।

अस्माकं सर्वेषामध्यापकानामध्यापनेन सार्धमनुसन्धानमपि एकं मुख्यं कर्तव्यं भवति । अनुसन्धानमूलक-रचनाद्वारा न केवलं रचयितु: अन्तर्निहितविश्लेषणात्मिकाया: मौलिकप्रज्ञाया: प्रदर्शनं भवति ; अपि तु अनुसन्धानजनितनूतनतथ्यराशिद्वारा समग्र: मानवसमाज: बहुधा उपकृतो भवति । भिन्नभिन्नशास्त्राणां गभीरतमं रहस्यमपि परिप्रकटितं भवति । एकस्य मतवादस्योपरि भूयोभूयोऽनुसन्धानेन "काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्" इति सूक्तिराशि: सार्थकतामवाप्नोति । एतेन न केवलमन्ये विद्वांस: अपि तु अस्माकं भाविन: युवगवेषका: अपि बहुधा अनुप्राणिता: भवन्ति । एतेन शास्त्रजगत: सुमहान् लाभो जायते । अहमतीव आनन्दितोऽस्मिन् यत् अस्माकं विश्वविद्यालयस्य गवेषणा-प्रकाशनविभाग: प्रसङ्गेऽस्मिन् सर्वदा कार्यरतोऽस्ति । विभागस्यास्य सर्वे अध्यापका: गवेषणासहकारिणश्च अस्मिन् प्रसङ्गे साधुवादार्हा: ।

अस्या: महस्विन्या: नवमकुसुमस्यास्य प्रकाशनसन्दर्भे समग्रं विद्वज्जगत् सुरभितं भवतु इति मे भगवत: श्रीवेङ्कटेश्वरस्य चरणकमलतले निवेदनम् ।

हरेकृष्ण शतपथी

**(हरेकृष्णशतपथी)**

**कुलपति:**

## महस्विनीसम्पादकमण्डली

**प्रधानसम्पादकः**

**प्रो.हरेकृष्णशतपथी,** कुलपतिः,

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**सम्पादकः**

**प्रो. सिहेच्.पि. सत्यनारायणः**

विभागाध्यक्षः, अनुसन्धानप्रकाशनविभागः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**सदस्याः**

***प्रो. सी.ए. सिन्दे***

निदेशकः, आड्यारमातृकागारस्तथा गवेषणागारः, चेन्नाई

*प्रो.राधाकान्तठाकुरः*

शैक्षिकसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**प्रो.सन्निधानं सुदर्शनशर्मा**

साहित्यसंस्कृतिसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**प्रो.जे.रामकृष्णः**

वेदवेदाङ्गसङ्कायप्रमुखः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

***डा.विरूपाक्ष वि. जड्डीपालः,*** प्रवाचकः

***डा. सोमनाथदाशः,*** सहाचार्यः

***सीहेच. नागराजु*** , सहाचार्यः

***डा. दिलीपकुमारमिश्रः,*** शोधसहायकः

अनुसन्धानप्रकाशनविभागः

राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

# महस्विनी

**(तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठशोधपत्रिका)**

१. एषा षाण्मासिकी शोधपत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-जुलाईमासयोः भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धानप्रवृत्तेरुद्बोधनं प्रोत्साहनं विविध-दृष्ट्याऽनुसन्धेयविषयाणां प्रकाशनं च।

४. अस्यां तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादन-भावानुवाद-टिप्पण्यादिपुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशितनिबन्धस्य प्रतिमुद्रणानि पत्रिकायाश्च स एव अङ्कः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृतवाङ्मयसम्बद्धानां विविधासु भाषासु प्रणीतानां ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। तदर्थं द्वे प्रकाशितप्रतिकृती प्रेषयितव्ये। आलोच्यग्रन्थस्य समालोचना यस्मिन्नङ्के प्रकाशिता सोऽप्यङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते, समालोचना-पत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्या वार्षिकमूल्यं वार्षिकशुल्कं रू.२५५/-, द्विवार्षिकशुल्कं रू.४२५/-, त्रिवार्षिकशुल्कं रू.६८०/- सन्ति, इदं शुल्कं **कुलसचिवः, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः-५१७५०७** इति सङ्केतेन बैंकड्राफ्ट द्वारा प्रेषणीयम्।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः **सम्पादकः, महस्विनी-शोधपत्रिका, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः-५१७५०७** इति सङ्केतेन विधेयः।

— **सम्पादकः**

**सू.** — शोधलेखप्रणेतारः यथाकालं स्वकीयान् संस्कृताङ्ग्लभाषाप्रणीतान् शास्त्रविषयकान् अनुसन्धानलेखान् प्रेषयन्तु, यथावसरं सम्पादकमण्डलस्यानुशंसानुरूपं लेखाः प्रकाशयिष्यन्ते।

# सम्पादकीयम् ....

श्रीश्रीश्रीअखिलाण्डकोटिब्रह्माण्डनायकस्य श्रीवेङ्कटाद्रिनिवासिनः श्रीनिवासस्य चरणकमलोपशोभितं राष्ट्रियसंस्कृतविद्यापीठमस्माकं विश्वविश्रुतं विराजते। अत्र नानाविद्याविद्योतितान्तःकरणाः अध्यापकाः छात्राः स्वाध्यायनिरताः सर्वविधानुसन्धानक्षेत्रेषु कृतभूरिपरिश्रमाः सन्तीति नास्ति कथनस्य लेशोऽप्यवसरः। साहित्य-व्याकरण-ज्योतिष-दर्शन-धर्मशास्त्र-पुराणेतिहास-वेदभाष्य-शिक्षाशास्त्र-आगमादिविभागेषु विद्यापीठस्यास्य शताधिकाः छात्राः मौलिकानि अनुसन्धानानि विधाय बहुधा बहुत्र प्रशंसिताः सन्ति। अनुसन्धानविधिमनुसृत्य तैः रचिताः प्रबन्धा अपि उल्लेखयोग्याः समाजोपयोगिनश्च भवन्ति।

अधुना ये शोधच्छात्राः स्वक्षेत्रेषु शोधकार्यं कुर्वन्ति, तेषामनुसन्धानफलस्य अवश्यमेव कस्यांश्चित् अन्ताराष्ट्रियायां राष्ट्रियायां वा प्रसिद्धपत्रिकायां ISSN/ISBN सङ्ख्यासङ्केतितायां परिप्रकाशः अवश्यं भवेदिति कश्चन नियमः विश्वविद्यालयानुदानायोगपक्षतः निर्धारितः अस्ति । अस्यां परिस्थितौ अस्माकं विद्यापीठस्य अनुसन्धानप्रकाशनविभागपक्षतः प्रकाशितायाः षाण्मासिकी-शोधपत्रिकायाः कृते अनुसन्धित्सूनां शोधच्छात्राणां सकाशात् मौलिकशोधलेखाः बहवः प्रकाशनार्थं स्वीकृताः। तेषां सङ्कलनं कृत्वा नवमकुसुमत्वेन "महस्विनी" पत्रिकेयम् इदानीं प्रकाश्यते इति हर्षप्रकर्षस्य विषयः।

प्रकाशनेऽस्मिन् प्रायशः आगम-व्याकरण-दर्शन-साहित्य-महाभारत-शिक्षाशास्त्रसम्बन्धिनः द्वात्रिंशत् (३२) मौलिकलेखाः संस्कृतभाषया विद्योतन्ते। सर्वेषां हि अनुसन्धातॄणां लेखाः नवनीताः अनुसन्धानसुगिन्धसुवासिताः चिन्तनसुमैः विकसिताः सुवर्णयन्तः पत्रिकायामस्यां राराज्यन्ते। अत्र शास्त्रविभागानुरोधेन

लेखानां संख्या अधोलिखितक्रमेण विद्यन्ते । यथा आगमे – १, मीमांसायाम् – १, शाब्दबोधे – १, धर्मशास्त्रे – २, व्याकरणे – ७, ज्योतिषे – १, न्याये – २, अद्वैतवेदान्ते – १, सांख्ययोगे – १, साहित्ये – ११, शिक्षाशास्त्रे – ४ ।

अस्माकं विद्यापीठे दिनं दिनं छात्राणां संख्या प्रवर्धते । संस्कृतानुसन्धानं प्रति छात्राणां रुचिरपि प्रवर्धमानाऽवलोक्यते । प्राचीनोऽपि विषयः नवीनशैल्या नवीनवसन्तागमने नवीनपुष्पपत्रफलागमवत् शोधमार्गे प्रस्फुटितो भवति इति दृष्टान्ताः पत्रिकालेखेष्वेतेषु द्रष्टुं शक्यन्ते । अतः सर्वदैव शोधच्छात्राणां कृते मम हार्दिकमभिनन्दनं प्रोत्साहनञ्च विज्ञापयामि ।

अस्माकं विभागस्य विद्वत्तल्लजाः आचार्याः अध्यापकाः, कर्मचारिणः पत्रिकायाः अस्याः सम्पादने महतीं भूमिकां निर्व्यूढवन्तः; अतस्तेभ्यो मम हार्दिकं कार्तज्ञं विनिवेदयामि । ये खलु पत्रिकासम्पादनसदस्याः बहिःस्थाः विद्वद्गोष्ठिगरिष्ठाः पण्डितप्रवराः स्वीयानुशीलनदृष्ट्या पत्रिकामिमां संशोधितवन्तः प्राकाश्यञ्चानीतवन्तः तेभ्यः सर्वेभ्योऽपि मदीयां कृतज्ञतां विनिवेद्य महस्विन्याः अस्याः प्रकाशनमभिलक्ष्य आशीःपरम्परामनुयोजितवद्भ्यः अस्मद्विद्यापीठकुलपतिभ्यः आचार्यहरेकृष्ण–शतपथिमहोदयेभ्यः नमोवाकं समर्प्य विरमति

— **सिहेच्.पि.सत्यनारायणः**

सम्पादकः

# शोधलेखानुक्रमणी

**कुसुमम्** : नवमम् (२०१४) **सम्पुटम्** : १ & २


| | विषयः | पुटसंख्या |
|---|---|---|
| १. | वैखानससूत्रस्य दशविधहेतूनां विचारः<br>– वाडवल्लि पवन् कुमार् | 01 |
| २. | प्राक्जातसंस्काराणां माहात्म्यम्<br>– वसन्तकुमारराय महापात्र | 06 |
| ३. | धर्मशास्त्रदृष्ट्या पञ्चमहायज्ञानां विवेचनम्<br>– प्रकाशचन्द्र मिश्र | 13 |
| ४. | अश्रुतफलके विश्वजिदादौ प्रयुक्तिनिरूपणे पार्थसारथिमिश्र–खण्डदेवाचार्यपद्धत्योः विवेचनम्<br>– ए. श्रीराम | 21 |
| ५. | परार्थाभिधानं वृत्तिः<br>– विघ्नेश्वर मिश्र | 26 |
| ६. | पाणिनीय–जागदीशदिशा तद्धितप्रत्ययसमीक्षणम्<br>– आर्.गीता | 32 |
| ७. | व्याकरणशास्त्रे उपग्रहविचारः<br>– सुधाकर महान्ति | 37 |
| ८. | महाभारतस्थ वनपर्वणः कारकप्रयोगवैशिष्ट्यानि<br>– कु. अवन्तिका किशोर देशमुख | 43 |
| ९. | वर्णसमाम्नायोपदेशविमर्शः<br>– जयप्रकाश साहु | 51 |
| १०. | गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति परिभाषाविचारः<br>– प्रियदर्शिनी मल्लुल इ | 56 |

| | विषयः | पुटसंख्या |
|---|---|---|
| ११. | महाभारतस्थोद्योगपर्वणि तद्धितान्तरमणीयता<br>– जयवन्त चौधरी | 62 |
| १२. | नैषधमहाकाव्यस्थ तद्धितान्तप्रयोगाणां सङ्ग्रहः<br>– तिरुमल | 67 |
| १३. | हैमव्याकरणे कातन्त्रव्याकरणप्रभावः<br>– श्री अशोक आर्य | 74 |
| १४. | लम्बनसाधनम्<br>– राजश्री पाढी | 81 |
| १५. | हेत्वाभासलक्षणे सर्वांशे प्रमात्वविचारः<br>– ओ.जी.पी.कल्याण शास्त्री | 89 |
| १६. | भारतीयदर्शनेषु पदार्थाः<br>– सत्यजित पण्डा | 93 |
| १७. | प्रबोधचन्द्रोदयनाटके मोक्षस्वरूपविचारः<br>– के. श्रीसमीरजा | 101 |
| १८. | सांख्यदर्शनरीत्या जगत्सृष्टेः मूलकारणविवेचनम्<br>– तपन कुमार घडाइ | 107 |
| १९. | भारतीयाहारपद्धतौ भोजननिर्माणभाजनानां<br>भोजनास्तरणपत्राणां च वैशिष्ट्यम्<br>– पौलोमी दाशगुप्ता | 115 |
| २०. | भक्तेः भावत्वरसत्वयोः विवेचनम्<br>– वि. कल्पना | 123 |
| २१. | विद्यामाधवविरचिते पार्वतीरुक्मिणीयमहाकाव्ये पात्रपोषणविमर्शः<br>– सोमनाथ मुखार्जी | 132 |
| २२. | संस्कृताङ्ग्लसाहित्यधाराद्वये लघुपद्यकाव्यविचारः<br>– लीनाचन्द्रा | 143 |

| विषयः | | पुटसंख्या |
|---|---|---|
| २३. | श्रीमद्भागवते अष्टमस्कन्धे लुप्तोपमायाः विवेचनम्<br>– डी.पद्मजा | 151 |
| २४. | कुमारसम्भवे अङ्गरसपरिशीलनम्<br>– अनीष्. वि | 160 |
| २५. | उपमालङ्कारस्वरूपम्<br>– डी.वि.सुब्रह्मण्यशास्त्री | 165 |
| २६. | वामनचरितमहाकाव्यस्य सामाजिकवैशिष्ट्यम्<br>– महेश कुमार | 172 |
| २७. | महाकविशेवडेमहोदयानां साहित्यरचनासु वैदर्भीरीतिः<br>– श्रीमति मञ्जु थेमदेव (चेन्ने) | 182 |
| २८. | रघुवंशोक्तराजधर्माणां प्रासङ्गिकता<br>– मञ्जुनाथ भट्ट | 189 |
| २९. | संस्कृतभाषाशिक्षणक्षेत्रे संस्कृतशिक्षकैः अनुभूयमानाः शैक्षिकसमस्याः तासां निराकरणोपायाश्च<br>– रञ्जन कुमार दाश | 195 |
| ३०. | भारतीयप्राचीनाधिगमप्रणाली<br>– ई. वेङ्कटेश्वर्लु | 201 |
| ३१. | संस्कृतशिक्षणे तन्यता (एकं विहङ्गवीक्षणम्)<br>– बि.वि. लक्ष्मीनारायण | 210 |
| ३२. | शिक्षायाः प्रसारणे शिक्षायां गुणवत्तासम्पादने च शिक्षकस्य पात्रम्<br>– बिचित्ररञ्जन पण्डा | 218 |

# वैखानससूत्रस्य दशविधहेतूनां विचारः

*वाडपल्लि पवन् कुमार्*
*(शोधच्छात्रः, आगमविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

सर्वैः ज्ञायते यत् अखिलाण्डकोटिब्रह्माण्डनायकं सर्वज्ञं सृष्टिस्थितिलयकारकं श्रीमन्नारायणं वैदिकेन मार्गेण समाराद्धुं श्रीविखनोमुनिना वैखानसागमः उपदिष्ट इति।

स चागमः भृगुमरीच्यत्रिकश्यपैः ऋषिभिः चातुर्लक्षग्रन्थपरिमाणरूपेण अधिकार-संहिता-तन्त्र-काण्डनामभिः विविच्य विस्तृतः सर्वव्याप्तः च कृत इति, अयं सर्वत्र  राराजमानो भवतीति सार्वजनीनो विषयः। अयं श्रीश्रीनिवासस्य दिव्यक्षेत्रादारभ्य ग्रामादिपत्तणपर्यन्तं विद्यमानेषु दिव्यालयेषु नित्यनैमित्तिक-काम्योत्सवादिरूपेण अविच्छिन्नगुरुशिष्यपरम्परागतेन वंशपारंपर्यानुरोधेन च प्रचलतीति ज्ञायते। असौ च आगमः वैखानसकल्पसूत्रात् आविर्भूत इति वैखानसविद्वांसः वदन्ति। वैखानसकल्पसूत्रं तावत् श्रीमद्विखनोमुनिना विरचितमिति सूत्रं तावत् श्रौत-गृह्य-धर्म-प्रवर इति चतुर्भिः विभागैः समलङ्कृतं च राराजतीति ज्ञातुं शक्यते।

वैखानसकल्पसूत्रमिदं दशभिः हेतुभिः प्रमाणीकृतमिति वैखानसविद्वांसः कथयन्ति। दश हेतवः क्रीस्तोः पश्चात् नवमशताब्दे विद्यमानस्य वेदान्तदेशिका-परनामधेयेन श्रीश्रीनिवासदीक्षितेन आविष्कृता वर्तन्ते[१]। आविष्कृतानेतान् दश हेतून् पश्यामः। ते तावत् -

१) अखिलजगत्कारणभूतेन विखनसा प्रणीतत्वात्

२) सर्वसूत्राणामादिमत्वात्

३) प्रधानादिकर्मसु श्रुतिमार्गानुसारित्वात्

४) समन्त्रकसर्वक्रियाप्रतिपादकत्वात्

५) निषेकादिसंस्कारमत्त्वात्

६) अष्टादशशारीरसंस्कारप्रतिपादकत्वात्

७) साङ्गक्रियाकलापवत्त्वात्

८) मन्वाद्यैः स्वीकृतत्वात्

९) अखिलजगदेककारणभूतश्रीमन्नारायणैकपरत्वात्

१०) एतत्सूत्रोक्तधर्मानुष्ठानवतामेव भगवत्प्रियतमत्वोपपत्तेश्च इति ।

एतेषां दशहेतूनां सारं परिशीलयामः।

विखनोमुनिः तावत् श्रीमन्नारायणस्य चिन्तनद्वारा मानसिकसृष्ट्या सञ्जात इति। भगवान् विखनाः अखिलजगत्कारणभूतः, अयमेव चतुर्मुखब्रह्मा च[२]। श्रीमन्नारायणस्य दिव्याज्ञाबद्धस्सन् अयमेव दण्डकमण्डलैस्सह मुनिरूपेण भूत्वा सूत्रं विलिख्य लोकार्पणं कृतवान्।

सूत्रमिदं सर्वसूत्राणां आदिमं भवति[३]। आपस्तम्बबोधायनादयः सर्वेऽपि स्वीयग्रन्थेषु सूत्रस्य वैशिष्ट्यं प्रतिपादितवन्तः[४]। अतो हि सूत्रमिदं दैविकसूत्रेषु आदिमं प्रधानतमं च राराजति।

सूत्रेऽस्मिन् ''**ऋग्वेदः प्रीणातु**'' इति श्रुत्याचमनविधिः, अर्घ्यप्रदानविधानं विष्णुबलिसंस्कारः, अग्निप्रतिष्ठाविधिश्च सर्वं श्रुतिमार्गेणैव निर्दिष्टं भवति[५]।

सर्वत्र सर्वकर्मसु मन्त्राणां विनियोगः स्पष्टीकृतः। षडक्षरद्वादशाक्षरयोः संयोगात् अष्टादशसंख्या समुत्पन्ना। एतादृश अष्टादशसंख्यानुगुण्येन अष्टादशशारीरसंस्काराः प्रतिपादिताः अस्मिन् वैखानसगृह्यसूत्रे[६]। ते तावत् अथ निषेकादिसंस्कारान् व्याख्यास्यामः ऋतुसङ्गमन-गर्भाधान-पुंसवन-सीमन्त-विष्णुबलि-जातकर्म-उत्थान-नामकरण-अन्नप्राशन-प्रवासागमन-पिण्डवर्धन-चौल-उपनयन-

पारायणव्रतबन्धविसर्ग-उपाकर्म-समावर्तन-पाणिग्रहणानीत्यष्टादश संस्काराः शारीराः।

मनु-आपस्तम्ब-अग्निवेश्य-बोधायन-वशिष्ठादिभिः अस्य सूत्रस्य वैशिष्ट्यं स्पष्टीक्रीयते च । तत्र तत्र वानप्रस्थाश्रमविधाने वानप्रस्थः नाम वैखानस इति वानप्रस्थधर्माः ये सन्ति ते सर्वेऽपि वैखानससूत्रादेव संग्राह्याः भवन्तु इति च संसूच्यन्ते[७]।

**नारायणपरायणो निर्द्वंद्वो मुनिः**[८]

**विष्णुःप्रीणातु**[९]

**नारायणपरं ब्रह्म पश्यन्**[१०]

**भक्त्या भगवन्तं नारायणमर्चयेत्**[११]

इत्यादिभिः सूत्रवाक्यैः सूत्रमिदम् अखिलजगत्कारणभूतश्रीमन्नारायणैकपरमिति ज्ञायते। गर्भदीक्षया विद्यमानाः वैखानसाः आगर्भवैष्णवाः अनन्यशरणागतितत्पराः विष्णुभक्ताः श्रीमन्नारायणैकपरत्वप्रतिपादने रताः विशिष्टाः उत्तमाश्च भवन्तीति च दशविधहेतूनां सारांशः[१२]। श्रीनिवासदीक्षिताः **दशविधहेतुनिरूपणाख्ये** ग्रन्थे एतान् दशहेतून् सप्रमाणकं सहेतुकं उपनिषन्मत्रैः धर्मशास्त्रवचनैः, पुराणश्लोकैः, इतिहासोक्तांशैः, गृह्यसूत्रैः, पाञ्चरात्रशैवागमोक्तवचनैश्च समालोच्य प्रमाणीकृतवन्तो अभवन्। एतेषां समालोचनेन परिशीलनेन वैखानससूत्रं सर्वोत्कृष्टं सर्वैः मनु आपस्तम्बादिभिः समादृतं विष्णुपारम्यप्रतिपादकं दैविकं च भवतीति राद्धान्तीक्रियते। वैखानसशास्त्रमधिकृत्य विशिष्टाद्वैतसिद्धान्तप्रवर्तकाः श्री श्रीनिवासस्य घण्टावतारसम्भूताः कवितार्किकसिंहाः सर्वतन्त्रस्वतन्त्राः श्रीमद्वेदान्तदेशिकाः न्यायपरिशुद्धौ[१३] इत्थं अभिवर्णितवन्तः यथा -

**वेदाविरुद्धत्वात् वैदिकमन्त्रैरेव सकलकर्मविधानात् सूत्रान्तराणामपि कुण्डसन्निवेशलक्षणादिषु क्वचित् क्वचित् तदुपजीवनात् वर्णाश्रमधर्माणाम् आनुकूलं नारायणपरत्वप्रतिपादनादेरपि सत्वमूलत्वेन प्रामाण्यैकहेतुत्वात्।**

इति एतादृशेन विचारेण वैखानससूत्रं वैखानसशास्त्रञ्च विशिष्टम् उन्नतं भवतीति विज्ञाप्य मया विरम्यते।

## सन्दर्भाः

१) वेदान्ताचार्य वर्येण श्रीनिवासार्ययज्वना ।
श्रुतिस्मृतिपुराणादि सूत्रमार्गानुसारिणा ॥
पूर्वाचार्य परिक्षुण्ण संप्रदायानुयायिना ।
वैखानसस्य सूत्रस्य व्याख्या सम्यक् प्रकाश्यते॥ - दशविधहेतुनिरूपणम् पृ. ३

२) विखनसं च विधातारं विरिंचिं तं चतुर्मुखम् । - व्यासनिघण्टुः

३) यथा मुनीनां विखना आदिभूत उदाहृतः।
सूत्राणां तत्प्रणीतं तु तथा श्रेष्ठतमं स्मृतम् ॥ - ब्रह्मवैवर्तपुराणम्

४) अतश्श्रुतिस्मृतिपुराणादिभिः प्रामाण्यत्वेनावगतस्य श्रीमद्वैखानससूत्रस्य अखिलशिष्टपरिग्रहादपि प्रामाण्यातिशयोऽस्तीति दशविधहेतुनिरूपितः
- दशविधहेतुनिरूपणम् पृ. ४७१

५) ऋग्वेदः प्रीणातु, यजुर्वेदः प्रीणातु, सामवदः प्रीणातु इति त्रिरपः पीत्वा
- श्रीवैखानस गृह्यसूत्रम्. १-२-२६

अथाचम्य ''कौरुक्षेत्रं'' इति जलं नमस्कृत्या महाव्याहृत्या जलमभिमन्त्र्य हस्तेन तलतीर्थक्रमेण कूप्याभ्यस्स्वाहा इत्यादिभिस्तर्पयति।
- श्रीवैखानस गृह्यसूत्रम्. १-४-४०

अथविष्णुबलिः। उत्तरप्रणिधावग्न्यादीन्देवान् ओं भूः पुरुषं ओं भुवः पुरुषं .......... ................ पायसशेषं पत्नीं प्राश्यति।
- श्रीवैखानस गृह्यसूत्रम्. ३-१३. ११५-११८

६) १-१-१,२

७) वानप्रस्थो वैखानसशास्त्र समुदाचार इति।
- बोधायनगृह्यसूत्रम् ३,११,१६-१७

पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा ।
कालपक्वैस्स्वयं शीर्णैः वैखानसतमे स्थिता॥ - मनुस्मृति. ६-२१

८) श्रीवैखानस गृह्यसूत्रम्, १-१-१६

९) वैखानसमन्त्रप्रश्नाष्टकम्, प्रथमप्रश्नः पृ.११

१०) श्रीवैखानस गृह्यसूत्रम्, १०-७-१०३

११) श्री वैखानसगृह्य सूत्रम् ४-१२-१२०

१२) एवं विधा वैखानससूत्रिण सर्वत्रेतिहासपुराणेषूच्यन्ते।
- श्रीवैखानसमहिममञ्जरी पृ. ४

१३) शब्दाध्यायः

## समादृताः ग्रन्थाः


१. **दशविधहेतुनिरूपणम्,** श्रीपार्थसारथिभट्टाचार्यः, श्री वैखानस ग्रन्थमाला, ईगावारिपालेम् - १९३१

२. **श्रीवैखानसगृह्यसूत्रभाष्यम्,** श्रीपार्थसारथिभट्टाचार्यः, तिरुमल-तिरुपति-देवस्थानानि, तिरुपतिः- १९६७

३. **पारमात्मिकोपनिषत्भाष्यम्,** श्रीवैखानसभगवच्छास्त्रग्रन्थमाला, नल्लूरु - १९४८

४. **विमानार्चनाकल्पस्य समालोचनात्मकम् अध्ययनम्,** वेदान्तनिलय पब्लिकेषसन्स्, अप्पिकट्ल - २००४


□□□

# प्राक्जातसंस्काराणां माहात्म्यम्

*वसन्तकुमारराय महापात्र*
*(शोधच्छात्रः, धर्मशास्त्रविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।।**[१]

मनुष्यस्य शरीरस्य चात्मनः कल्याणार्थं निषेकात् अर्थात् गर्भाधानात् आरभ्य श्मशानान्तं नाम अन्त्येष्टिसंस्कारं यावत् षोडशसंस्काराः भवन्ति। गर्भाधानादि संस्कारैः न केवलं मानवस्य नैतिकाध्यात्मिकभौतिकसांस्कृतिकादिविकासा भवन्ति, अपि तु सामाजिकविकासेन सह व्यक्तित्वस्याभिवृद्धिरपि भवति। तैश्च संस्कारैः संस्कृतो मानवः कायिकशुद्धिं प्राप्य समाजे विकसितवैदिकमानवरूपेण परिगण्यते। प्रसङ्गेऽस्मिन्नुक्तं मनुना[२] यत् -

**गार्भैहोमैर्जातकर्मचौडमौञ्जीनिबन्धनैः।**
**बैजिकं गार्भिकं चैनं द्विजानामपमृज्यते।।** इति ।।

मानवस्य सम्पूर्णजीवनं संस्कारक्षेत्रं भवति। शरीरस्यारम्भः गर्भाधानसंस्कारेण जायते। एवम् अन्तं तावत् भस्मान्तं शरीरमिति उच्यते। प्रजननमपि अत्र अन्तर्भवति। अस्मिन् संसारे धर्मशास्त्रानुसारमशुचिः न तिष्ठति। बहुषु गृह्यसूत्रेषु गर्भाधानादारभ्यसंस्काराणां प्रारम्भो भवति। प्राग्जन्मसंस्कारे मुख्यतः संस्कारत्रयमन्तर्भवति। यथा- १) गर्भाधानसंस्कारः, २) पुंसवनसंस्कारः, ३) सीमन्तोन्नयनसंस्कारश्च। क्रमशः एते संस्कराः आलोच्यन्ते।

**गर्भाधानसंस्कारः -**

गर्भस्याऽऽधानं वीर्यस्थापनं स्थिरीकरणं यस्मिन् येन वा कर्मणा तत् गर्भाधानम्। विवाहोचितकालः सुश्रुते[३] यथा -

**पञ्चविंशे ततो वर्षे पुमान्नारी तु षोडशे।**
**समत्वा गतवीर्यौ तौ जानीयात् कुशलोभिषक्।। १।।**

**ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम्।**
**यद्याधत्ते पुंमान् गर्भं कुक्षिस्थः स विपद्यते।। २।।**

**जातो वा न चिरं जीवेज्जीवेद्वा दुर्वलेन्द्रियः।**
**तस्मादत्यन्तवालायां गर्भाधानं न कारयेत्।। ३।।**

किञ्च तस्मिन् सुश्रुते[४] पुनः उट्टङ्कितम् अस्ति - चतस्रोऽवस्था शरीरस्य वृद्धिर्यौवनं सम्पूर्णता किञ्चित् परिहाणिश्चेति। आषोडशाद्वृद्धिः आचतुविंशते यौवनमाचत्वारिंशतः सम्पूर्णता ततः किञ्चित् परिहाणिश्चेति।

मनुस्मृतौ[५] ऋतुदानकालः -

**ऋतुकालाभिगामीस्यात् स्वदारनिरतस्सदा।**
**पर्ववर्जं व्रजेच्चैनां तदव्रतो रतिकाम्यया।।१।।**
**ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः।**
**चतुर्भिरितरैः सार्द्धमहोभिः सद्विगर्हितैः।।२।।**
**तासामाद्याश्चतस्त्रस्तु निन्दितैकादशी च या ।**
**त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः।। ३।।**
**युग्मासु पुत्रा जायन्ते स्त्रीयोऽयुग्मासु रात्रिषु।**
**तस्मात् युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रीयम्।। ४।।**
**पुंमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रीयाः।**
**समे पुमान् पुस्त्रीयौ वा क्षीणेऽल्पे च विपर्ययः।।५।।**

**निन्द्यस्वष्टासु चान्यासु स्त्रीयो रात्रिषु वर्जयन्।**
**ब्रह्मचार्यैव भवति यत्र तत्राश्रमे वसन्।। ६।।**

याज्ञवल्क्यवचनानुसरेऽपि[६] निषेकापरपर्यायभूत गर्भाधानसंस्कारस्य संस्कारेषु प्राथम्यं विद्यत इति। गर्भ आधीयते येन कर्मणा तत् गर्भाधानमिति। तच्च ऋतावेव भवति ऋतौ गर्भाधानमिति याज्ञवल्क्यवचनात्[७]। इयर्त्ति गर्भधारणं गच्छति इति ऋतुः। तस्य कालः षोडशरात्रयः। प्रसङ्गेऽस्मिन्नुक्तं याज्ञवल्क्येन[८] यत् -

**षोडशर्तुः निशा स्त्रीणां तस्मिन् युग्मासु संविशेत्।**
**ब्रह्मचार्यैव पर्वाणाद्याश्चतस्रस्तु वर्जयेत्।।** इति।।

अत्र निशाशब्दस्य प्रयोगात् गर्भाधानाय दिवसे स्त्रीगमनं न केवलं निषिध्यते, अपि तु तथागमने प्रत्यवायोऽपि श्रूयते, यथोऽक्तं प्रश्नोपनिषदि[९] प्राणा वा एते स्कन्दन्ति ये दिवा रत्या संयुजन्ते इति।

तास्वपि निशासु पुत्रार्थी युग्मासु रात्रिषु कन्यार्थी चायुग्मासु रात्रिषु संविशेदिति व्यवस्था विद्यन्ते। एवं यो यथा कामयते स तथा प्रजाः प्राप्नुयात्। तच्च ऋतुकालगमनं नियमेन विधीयतेऽगमने प्रत्यवाय श्रवणात्। उक्तञ्च वीरमित्रोदये [१०]-

**ऋतुस्नातां तु यो भार्य्यां सन्निधौ नोपगच्छति।**
**घोरायां भ्रृणहत्यायां पच्यते नात्र संशयः ।।** इति।।

तत्र कस्यां रात्रौ गमने किं फलमित्याकांक्षायाम् ऋतुस्नानदिवसात् दिनचतुष्टयानन्तरं पञ्चम्यां रात्रौ गमने कन्या षष्ठ्यां रात्रौ गमने मध्यमश्रेणीकः पुत्रः, सप्तम्यां रात्रौ गमने उत्पन्ना कन्या वन्ध्या, अष्टम्यां रात्रौ गमने धनवान् पुत्रः, नवम्यां रात्रौ गमने उत्तमाकन्या, दशम्यां रात्रौ बुद्धिमान् पुत्रः, एकादश्यां रात्रौ अधार्मिकी कन्या, द्वादशरात्रौ श्रेष्ठपुत्रः, त्रयोदश्यां रात्रौ व्यभिचारिणी कन्या। चतुर्दश्यां रात्रौ धार्मिकः कृतज्ञः संयमी दृढप्रतिज्ञः पुत्रः, पञ्चदश्यां रात्रौ बहुसन्तानजननी, षोडश्यां रात्रौ गमने च विद्वान् सत्यवादी जितेन्द्रियः श्रेष्ठः शरणदश्च पुत्रो जायते। एवम् ऋतुकाले

यथा विधि स्त्रियं गत्वा गर्भे आहिते सति ततः प्रभृत्याप्रसवात् रजोदर्शनाभावादनृतौ स्त्रीगमनस्य निषेधात् किं कर्त्तव्यमिति वीक्षायां याज्ञवल्क्येन[११] प्रत्यपादि यत् -

**यथाकामि भवेद्वापि स्त्रीणां वरमनुस्मरन्।**
**स्वदारनिरतश्चैव स्त्रियो रक्षा यतः स्मृता ।।** इति।।

एतावता ज्ञायते यत् स्त्रीणां कृते इन्द्रेण कश्चन वरो दत्तः। स यथा - भवन्तीनां कामविहन्ता पातकी स्यादिति। अतोऽनृतावपि भार्यायाभिच्छन्त्यां सत्यां गमनं कार्यमेव। अन्यथा पातकीत्वश्रवणात्। अपि च स्वदारनिरतश्चैवेति वचनात् परदारगमनं सर्वथा निषिद्ध्यते। अत एतेषां नियमानां पालनेन स्त्रीयो न व्यभिचारं कुर्वन्ति। न वा पुरुषाः। तेन समाजः शृङ्खलितो भवति जारजसन्तानोऽपि न कदा सम्भाव्यते।

गर्भाधानसंस्कारोऽयं सकृदेव क्रियते इति केचिद् वदन्ति, यतो हि संस्कारोऽयं क्षेत्रसंस्कारशब्देनाप्युच्यन्ते। तस्मात् सकृदेव संस्कृतौ गर्भः संस्कृतमेव सन्तानं सूते। तस्मात् प्रतिगर्भ तत्संस्कारस्यावश्यकता नास्ति इति। किन्तु प्रति गर्भं संस्कारोऽसौ कार्य्य इत्यपरे वदन्ति। वस्तुतः प्रति गर्भं गर्भाधान संस्कारः करणीय एव। संस्कृताद् गर्भात् संस्कृता एव प्रजाः जायन्ते। अतो गर्भाधानसंस्कारस्य महत्वं प्रयोजनत्वञ्च सुतरां विद्यत इति नास्ति कश्चन संदेहः।

**पुंसवनम् -**

पुमान् सूयतेऽनेनेति पुंसवनम्। येन संस्कारेण पुत्रोत्पत्तिरवश्यमेव भवति स एव संस्कारः पुंसवनमित्युच्यते। प्राक्काले समाजे कन्यापेक्षया पुत्राकांक्षाऽधिकाऽऽसीत्। यतः पुत्रस्य प्रशंसा शास्त्रेषु श्रूयते स्म। यथोक्तं मनुना[१२] -

**पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।**
**तस्मात् पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम् ।।** इति।।

संस्कारोऽयं गर्भस्य चलनात्प्रागेव कर्त्तव्यः "गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरेति" योगीश्वरवचनात्[१३]। पुंस्त्वलक्षणानामाविर्भावात्प्राग् गर्भस्थस्य शिशोः

लिङ्गपरिवर्तनं कर्तुं शक्यत इति स्पष्ट प्रतिपादितमायुर्वेदशास्त्रे[१४]। अतस्तस्मिन्नवसरे गर्भरक्षणार्थं पुत्रोत्पत्तये चायुर्वेदौषधीनामपि प्रयोगः क्रियते। संस्कारोऽयं गर्भचलनात् प्राक् तृतीये चतुर्थे वा मासि समनुष्ठीयते। संस्कारस्यास्य क्षेत्रसंस्कारत्वात् न प्रतिगर्भमनुष्ठेयमिति मिताक्षरायां[१५] विज्ञानेश्वरेण प्रत्यपादि। यथोऽक्तं तेन - एते च पुंसवनसीमन्तोन्नयने क्षेत्रसंस्कारकर्मत्वात् सकृदेव कार्य्ये न प्रति गर्भमिति।

अस्मिन् प्रसङ्गे देवलेनोक्तं यत् -

**सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।**
**यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत्।।** इति।।

आश्वलायनगृह्यसूत्रे[१६] पुंसवनस्य कश्चन विधिः प्रतिपादितः। स चेत्थं यथा - गर्भधानात् तृतीये मासि कस्मिंश्चित् पुनर्वसुनक्षत्रे पत्नी उपोष्य स्वकरतले गण्डूषमात्रं दधि संस्थाप्य तन्मध्ये शिम्बिकावीजद्वयं तदन्तरा चैक यवं संस्थाप्य पिवेत्। तदा यदा पतिः पृच्छति त्वं किं पिवसि ? इति पत्नी पुंसवनमित्युत्तरं दद्यात्। एवं त्रिवारं दधि पिवेत्। सुश्रुतस्य मतानुसारेण पुत्रप्राप्त्यर्थं सुलक्षणा -सददेव - बटशुङ्ग-वैश्वदेवीप्रभृतिष्वन्यतमामौषधीं पयसा सह संमिश्र्य तद्रसस्य विन्दुत्रयं चतुष्टयं वा यदि गर्भिण्या दक्षिणनासापुटे सेच्यते, यथा पत्नी तत् न कदापि निष्ठीवेत् तर्हि पुत्रोत्पत्तिरवश्यं भवतीति प्रतिपादितम्। यथोक्तं तत्र [१७] लब्धगर्भायाश्चैतेष्ठाहः सुलक्षणा वटशुङ्गः - सहदेवी-विश्वदेवीनामन्यतमं क्षीरेणाभिघुट्ट्य त्रिंश्चतुरो वा विन्दून् दद्याद्दक्षिणे नासापुटे पुत्रकामायै न च तन्निष्ठीवेत् इति। अपि च सुपर्णोसीति मन्त्रजपद्वारापि सुस्थः सुन्दरश्च शिशुरुत्पद्यत इति। परम्परा विद्यते। अस्य संस्करस्य कर्ता स्वयं पतिरेव।

**सीमन्तोन्नयनम् -**

सीमन्तः केशपाशः, तस्योन्नयनं नाम उद्धर्वनयनम्। अर्थात् येन संस्कारेण गर्भिण्याः केशपाशस्योरूद्र्ध्वोनयनम् पत्या क्रियते, स संस्कार एव समीन्तोनयनसंस्कार

इति कथ्यते। प्रसङ्गेऽस्मिन् वीरमित्रोदयस्य संस्कारप्रकाशे[१८] प्रतिपादितं यत् - सीमन्त उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोन्नयनमिति कर्मनामधेयम्।

संस्कारोऽयं गर्भाधानात् षष्ठेऽष्टमे वा मासि क्रियते, "षष्ठेऽष्टमे वा सीमन्तः" इति याज्ञवल्क्यवचनात्[१९]। बौधायनाऽऽपस्तम्बाऽऽश्वलायानगृह्यसूत्रेषु[२०,२१,२२] सीमन्तोन्नयनस्य कालः चतुर्थो मास इति प्रतिपादितम्। यथोऽक्तं तत्र - प्रथमगर्भायाश्चतुर्थे मासि सीमन्तोन्नयनमिति। अस्मिन् संस्कारे पतिः गर्भिण्याः पत्न्याः समीन्तस्योन्नयनं करोति, अर्थात् केशपाशमलंकुर्वन् तस्मिन् सीमन्तं रचयति। यतो हि गर्भस्तेन सुस्थितो भवति। प्रसङ्गेऽस्मिन्नुक्तमाश्वलायनाचार्येण [२३] यत् गर्भिण्या गर्भमत्तुं काश्चिद्राक्षस्यः रूधिरशनाः समायान्ति। तासां निरसनाय गर्भिणीपतिः सीमन्तकरणीं श्रियमावह्येत्। सीमन्तोन्नयनेन सीमन्ताश्रितायाः श्रिया आविर्भावेन अलक्ष्म्यः क्रूरा राक्षस्यः पीडिताः पलायन्ते, येन गर्भः स्थिरो भवति। यथोऽक्तं तेन -

**पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः।**
**आयान्ति काश्चिद्राक्षस्यः रूधिराशनतत्पराः।।**

**तासां निरसनार्थाय श्रियमावह्येत् पतिः।**
**सीमन्तकरणी लक्ष्मीस्तमावहति मन्त्रतः।।** इति।।

सस्कारस्यास्य प्रयोजनान्तरं यत् गर्भिण्याः पतिकृतकेशप्रसाधनेन पत्नी प्रमोदिता भवति। तेन च गर्भस्थस्य शिशोर्विकासः पुष्टिश्च सुतरां भवति। पुनश्च यदा पतिः सीमन्तं रचयति, तदा अयमूर्जस्विता [२४] वृक्षः ऊर्जेव फलिनी भवेति मन्त्रेण एकामुदुम्बरीशाखां पतिः तेन केशपाशेन सह वध्नीयात्। कृत्यमिदं पत्न्याः फलवत्तायाः प्रतीकमिति प्रतिभाति। वैदिकयुगे सीमन्तोन्नयनावसरे वीणागातारः वीणावादनपूर्वकं सीमराजस्य स्तुतिं कुर्वन्तीति भारतीयसांस्कृतिकनिधौ[२५] रामजी उपाध्यायेन प्रतिपदितम्। यदि काचिद् गर्भिणी अकृतसीमन्तोन्नयना सन्तानं प्रसूयते, तर्हि तं सन्तानं

क्रीडोऽथवा कश्मिश्चित् पेटके संस्थाप्य तस्याः गर्भिण्याः सीमन्तोन्नयनसंस्कारः कर्त्तव्य एव। प्रसङ्गेऽस्मिन् गार्ग्यवचनमुत्थाप्योक्तं [२६] यत्-

**स्त्री यद्यकृतसीमन्ता प्रसूयते कदाचन।**
**गृहीतपुत्रा विधिवत् पुनः संस्कारमर्हति।**
**तदानीं पेटके गर्भं स्थाप्य संस्कारमाचरेत्।।** इति।।

संस्कारोऽयं प्रति गर्भं कार्य्यमिति केचिद् वदन्ति, केचिच्चैकवारं क्षेत्रसंस्कारत्वादस्येति।

## सन्दर्भाः


१. मनुस्मृतिः २-१६
२. मनुस्मृतिः २-२७
३. सुश्रुते सूत्रस्थाने ३५-१३, शरीरस्थाने १०-५४,४५
४. सुश्रुते सूत्रस्थाने, ३५, सूत्र. २९
५. मनुस्मृतिः ३ - ४५,५०
६. याज्ञवल्क्यस्मृतिः आ १०
७. याज्ञवल्क्यस्मृतिः आ ११
८. याज्ञवल्क्यस्मृतिः आ ७९
९. प्रश्नोपनिषद् १-१३
१०. वीरमित्रोदयः सं.प्र.पृ. ५३
११. याज्ञवल्क्यस्मृतिः आ ८१
१२. मनुस्मृतिः ९ - १३७


□□□

# धर्मशास्त्रदृष्ट्या पञ्चमहायज्ञानां विवेचनम्

*प्रकाशचन्द्र मिश्र*
*(शोधच्छात्रः, धर्मशास्त्रविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रम्। धर्मशास्त्रमिति मध्यमपदलोपिकर्मधारय-समासेन धर्मशास्त्रयोर्मध्ये प्रतिपाद्यप्रतिपादकभावः सम्बन्धो वर्तत इति सुस्पष्टं भवति। अत्र धर्मो भवति प्रतिपाद्यः, शास्त्रञ्च भवति प्रतिपादकम् । धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्रं धर्मशास्त्रं नाम्ना यद्यप्यभिधीयते, तथापि **'धर्मशास्त्रं तु वै स्मृतिः'** इत्यनेन मनुवचनेन स्मृतिरूपग्रन्थस्य मुख्यतया धर्मशास्त्रत्वं सङ्केतितम्।

ध्रियते लोकः अनेनेति धर्मः[१]। धरति धारयति वा लोकम् इति धर्मः। ध्रियते लोकः यात्रानिर्वाहार्थं वेति धर्मः। अर्थात् येन माध्यमेन लोकानां धारणं सम्भवति, यश्च लोकानां सुनिर्वाहार्थं संसारं धारयति स एव धर्मशब्दवाच्यः। गृहस्थधर्मस्य श्रेष्ठत्वं पञ्चमहायज्ञैः प्रतिपादितमस्ति। आश्रमाश्चत्वारो भवन्ति, यथा - ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्चेति। चतुर्षु आश्रमेषु गृहस्थाश्रमः अन्यतमः, गृहस्थाश्रमस्य प्रशंसा शास्त्रेषु श्रूयते।

**पञ्चमहायज्ञाः**

पञ्चमहायज्ञाः गृहस्थेन अनुष्ठीयन्ते इति हेतोः सर्वेषु आश्रमेषु गृहस्थाश्रमस्य श्रेष्ठत्वमपि मनुना उल्लिखितम्। यथा -

**यथा वायुं समाश्रित्य सर्वे जीवन्ति जन्तवः।**
**तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः।।**[२]

यथा वायुं समाश्रित्य सर्वे जन्तवः जीवन्ति, तथा गृहस्थाश्रममाश्रित्य सर्वे आश्रमिणो जीवन्ति एतदर्थं गार्हस्थ्यं सर्वाश्रमिणां प्राणतुल्यम् इत्युक्तम्। किञ्च गृहस्थः

अन्नप्रदानेन ज्ञानप्रदानेन च ब्रह्मचर्यादीन् त्रीन् अप्याश्रमान् प्रतिदिनम् उपकरोति। अतः गृहस्थाश्रमस्य श्रेष्ठत्वं युक्तियुक्तमेव विद्यते। प्रसङ्गेऽस्मिन् मनुना उक्तम् -

**यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।**
**गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही।।** [३]

इज्यते इति यज्ञः, "**यजयाचतविच्छप्रच्छरक्षो नङ्** "इति सूत्रेण नङ्प्रत्यये यज्ञशब्दो निष्पद्यते। महांश्चासौ यज्ञश्चेति महायज्ञः। अनेन पञ्चमहायज्ञाः बोध्यन्ते। येषां समधिकं वर्णनं वेदाङ्गान्तर्गतकल्पस्य गृह्यसूत्रान्तर्गतपारस्करगृह्यसूत्रे स्मृतिषु च समुपलभ्यते। प्रसङ्गेऽस्मिन् मनुना उक्तम् -

**अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।**
**होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्।।** [४]

एते पञ्चमहायज्ञाः भवन्ति। यथा - ब्रह्मयज्ञः, पितृयज्ञः, देवयज्ञः, भूतयज्ञः, नृयज्ञश्चेति।

**ब्रह्मयज्ञः**

वेदाध्ययनाध्यापनं ब्रह्मयज्ञ इति कथ्यते। वेदे कर्म-उपासना-ज्ञानाख्येषु त्रिषु काण्डेषु ज्ञानस्यैव प्राधान्यमुपवर्णितमास्ते। ज्ञानादेव नरत्वमिति जीवान्तरापेक्षया श्रेष्ठमिति कीर्त्यते । शास्त्रोक्तप्रकारेण सदाचारधर्मानुष्ठानयोः तत्परतैव नरे नरत्वम् आपादयति। मानवस्य क्रमिकविकासे ज्ञानं प्रधानम्। अतः सर्वास्ववस्थासु ज्ञानमावश्यकम्।

अस्माकं पूर्वजाः ऋषयः स्वकीयतपोबलेन स्वानुभवेन प्रयोगेण तथा अध्ययनेन अस्माकं कृते यत् अगाधज्ञानस्य सञ्चयनं कृतवन्तः, तेषां ज्ञानराशीणां प्रभावेण निरन्तरं वयं लाभान्विताः भवामः, तेन लाभेन च वयं निरन्तरं तेषाम् ऋणिनः भवामः । अतः तस्मात् ऋणात् मुक्त्यर्थं ब्रह्मचारी साङ्गोपाङ्गरीत्या ब्रह्मचर्यमाचरन् वेदाध्ययनं करोति स्म ।

अध्यापनशब्देनाध्ययनमपि कुल्लूकेन गृहीतम्। अतोऽध्ययनमध्यापनञ्च ब्रह्मयज्ञः। शङ्खस्मृतौ शङ्खेन उट्टङ्कितं - **'स्वाध्यायो ब्रह्मयज्ञश्च'**[५] इति।

वेदवेदाङ्गादीनाम् अध्ययनमध्यापनञ्च ब्रह्मयज्ञ इत्युच्यते। तैत्तिरीयारण्यके 'यदि कश्चन जनः ग्रामात् बहिः ब्रह्मयज्ञाय गन्तुमसमर्थो भवति तर्हि ग्रामे स्थित्वा ब्रह्मयज्ञं कुर्यात्।'[६] मन्त्रमिमं पठित्वा ब्रह्मयज्ञस्य समाप्तिं कुर्यात्। यथा -

**नमो ब्रह्मणे नमोऽस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः।**
**नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि।।**[७]

आश्वलायनगृह्यसूत्रे स्वाध्याये इमे ग्रन्थाः उल्लिखिताः सन्ति, ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, ब्राह्मणः, कल्पः, गाथा, नाराशंसी, इतिहासपुराणादयः इति। एतेषाम् अध्यापनमध्ययनञ्च करणीयम्। यः वेदस्य एकमेवांशं जानाति सः पुरुषसूक्तं तेन सह पठेत्। छान्दोग्यपरिशिष्टे प्रतिपादितमस्ति यत् अध्यापनद्वारैव ब्रह्मयज्ञः सफलो भवति।

**पितृयज्ञः**

संसारे नरजन्म दुर्लभम्। प्राणिमात्रस्य शरीरधारणे मातृपितॄणामेव अवदानं भवति। अतः तौ सर्वदा अवश्यमेव पूज्यौ। संसारिकसुखभोगार्थं यज्जन्म प्राणिभिः लब्धं तदर्थं पितरौ सदैव वन्द्यौ । जन्मप्रदानेन प्राणिनः सदैव तयोः समीपे ऋणिनः भवन्ति । ततः मुक्त्यर्थं किमपि कर्तव्यं प्राणिभिः करणीयम्। तयोः सेवा-सुश्रुषा-भक्ति-लालनपालनादिभिः कृतिभिः प्राणि तद्ऋणात् मुक्तिं प्राप्नोति । तयोः जीवितावस्थायां एतादृशानि सेवादिकर्माणि क्रियन्ते । अस्माकं भारतीयानां पूर्वजन्मनि विश्वासः वर्तते । अतः मृत्योरनन्तरमपि वंशपरम्परानुक्रमेण पूर्वजाः जीविताः भवन्तीति विश्वासेन तेषां सुखशान्त्यर्थं पिण्डदानं, श्राद्धं, तर्पणं, दाहसंस्कारादिकर्माणि च क्रियन्ते। अनेन दिवङ्गतानां आत्मनां सद्गतिः लभ्यते इति धर्मशास्त्रस्यवचनम् । एतादृशानि कर्माणि कृत्वा गृहस्थः पितृऋणात् मुक्तो भवतीति शास्त्रेषु उच्यन्ते । एतान्येव कर्माणि 'पितृयज्ञ' पदेन अभिधीयन्ते ।

**'पितृयज्ञस्तु तर्पणम्'** इति मनुवचनानुसारं तर्पणद्वारैव पितृयज्ञस्य सम्पादनं क्रियते। पुनश्च मनुना उक्तं -

**कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।**
**पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्।।**[८]

प्रत्यहं यथासम्भवं श्राद्धं कुर्यात्। श्राद्धशब्दोऽयं कर्मविधिवाक्यवर्ती कौण्डपायिनामयनीयाग्निहोत्रशब्दवद्वक्ष्यमाणपार्वणश्राद्धधर्मातिदेशार्थः। गृहस्थः स्वशक्त्यनुसारम् अन्नभोज्यपदार्थैः जलैर्दुग्धैर्मूलैर्फलैर्वा प्रतिदिनं श्राद्धं कुर्यात्। यदि स्नानानन्तरमुदकतर्पणं द्विजः करोति, तेनैव सर्वं नित्यश्राद्धफलं प्राप्नोति । उक्तं च मनुना - **यदेव तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः।**

**तेनैव कृत्स्नमाप्नोति पितृयज्ञक्रियाफलम्।।**[९]

**देवयज्ञः**

मनुष्यः यदा अन्धकारपूर्णगर्भगुहां त्यक्त्वा बहिरागच्छति तदा देवाः तं पोषयन्ति। सूर्यस्य प्रकाशेन सः प्रकाशितो भवति । विशालाकाशस्थमुक्तवायुना सः श्वासप्रश्वास- माध्यमेन जीवति । चन्द्रात् शीतलतामनुभवति । अग्निदेवताद्वारा तेज आप्नोति, येन तस्य शरीरस्य तापमानं सुस्थिरं भवति । वरुणदेवताद्वारा जलं प्राप्य पीपासामुक्तो भवति । एवं देवाः तस्य जीवनधारेण सहायं कुर्वन्ति । अतः सः जन्मक्षणादारभ्य एव विविधदेवतानाम् ऋणे ऋणवान् सन् जन्मप्राप्तेरनन्तरं सर्वप्रथमं तेषाम् ऋणात् मुक्तिं प्राप्तुं प्रयत्नशीलो भवेत् । तदर्थं देवयज्ञः तेन सम्पादनीयः ।

अग्नौ शास्त्रोक्तविधिना होमः देवयज्ञः । यजमानेनाग्नावाहुतिः सम्यक् प्रदत्ता रसाहरणकारित्वादादित्यस्यादित्यं प्राप्नोति । स चाहुतिरस आदित्याद् वृष्टिरूपेण जायते। तत अन्नम्, तदुपभोगेन जायन्ते प्रजाः । यथोक्तं मनुना -

**अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।**
**आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः।।** [१०]

पारस्कराचार्येणोक्तम् -

**वैश्वदेवादन्नात् पर्युक्ष्य स्वाहाकारैर्जुहूयात्।**
**ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतय।।**[११]

वैश्वदेवादन्नात् किञ्चिदुद्धृत्य पात्रान्तरे कृत्वा स्वाहाकारैः जुहूयात् यथा - ब्रह्मणे स्वाहा, प्रजापतये स्वाहा, गृह्याभ्यः स्वाहा, कश्यपाय स्वाहा, अनुमतये स्वाहा इति ।आश्वलायनमतानुसारं तद्यदग्नौ जुहोति स देवयज्ञः। देवऋणं प्रत्येकमानवस्योपरि

विद्यते। अनेन यज्ञेन देवऋणस्य परिशोधः जायते। अग्नौ आहुतिप्रदानेन देवाः तृप्ताः भवन्ति।

**भूतयज्ञः**

**'बलिर्भौतो'** इति मनुवचनानुसारं बलिप्रदानेन भूतयज्ञः भवति। देवयज्ञानन्तरं भूतगृह्येभ्यो मणिकसमीपे त्रीन् त्रीन् बलीन् दद्यात्। **"पर्यन्याय नमः"**, **"अद्भ्यो नमः"**, **"पृथिव्यै नम"** इति। द्वारशाखयोः दक्षिणोत्तरयोः यथाक्रमं **"धात्रे नमः"**, **"विधात्रे नम"** इति बलिद्वयं दद्यात्। प्रतिदिशं **"वायवे नम"** इति एकैकं बलिचतुष्टयं दद्यात्। दिशां च प्रतिदिशं **"प्राच्यै नमः"**, **"दक्षिणायै नमः"**, **"प्रतीच्यै नमः"**, **"उदीच्यै नम"** इति बलिचतुष्टयं दद्यात्। मध्ये त्रीन् बलीन् दद्यात्। यथा **"ब्रह्मणे नमः"**, **"अन्तरिक्षाय नमः"**, **"सूर्याय नम"** इति। परिशेषे ब्रह्मादिबलीनाम् उत्तरप्रदेशे **"विश्वेभ्यो देवेभ्यो नमः"**, **"विश्वेभ्यो भूतेभ्यो नम"** इति बलिद्वयं दद्यात्। ततः परं बल्योरुत्तरत **"उषसे नमः"**, **"भूतानां च पतये नम"** इति बलिद्वयं दद्यात्। विषयेऽस्मिन् मनोरभिमतम् यथा -

**विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्।**
**दिवाचरेभ्यो भूतेभ्यो नक्तञ्चारिभ्य एव च।।**[१२]

गृहस्योपरि यद् गृहं तत्पृष्ठवास्तु बलिदातुः पृष्ठदेशे, भूभागे वा तत्र 'सर्वात्मभूतये नमः' इत्येवं बलिं दद्यात्। उक्तवलिदानाऽवशिष्टं सर्वमन्नं दक्षिणस्यां दिशि दक्षिणामुखः **'स्वधा पितृभ्य'** इति बलिं हरेत्। प्राचीनावीतिना चायं बलिर्देयः। मनुना उक्तम् -

**पृष्ठवास्तुनि कुर्वीत बलिं सर्वात्मभूतये।**
**पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत्।।**[१३]

अन्यदन्नं पात्रे समुद्धृत्य श्वपतितादिभ्यः शनकैर्यथा रजसा न संयुज्य तथा भुवि दद्यात्। पापरोगी कुष्ठी, क्षयरोगी वा, तेषां कृतेऽपि भूम्नि वैश्वदेवान्नं दद्यात्। अतः - **शुनां च पतितानां च श्वपचां पापरोगिणाम्।**
**वायसानां कृमीणां च शनकैर्निर्वपेद् भुवि।।**[१४]

एवं प्रकारेण यः गृहस्थब्राह्मणः प्रतिदिनं सर्वेषां प्राणिनां सत्कारं करोति, सर्वभूतान्यन्नदानादिना नित्यं पूजयति, स ब्रह्मलोकं प्राप्नोतीत्यत्र नास्ति लेशोऽपि संशयः।

**नृयज्ञः**

**'नृयज्ञोऽतिथिपूजनम्'** इत्यस्मात् मनुवचनात् ज्ञायते यत् नृयज्ञो नाम अतिथिपूजनं, मनुष्ययज्ञश्च इत्युच्यते। अभ्यागतानामतिथीनां विधिपूर्वकपूजनं मनुष्ययज्ञः। अतिथिसत्कारपरम्परा ऋग्वेदकालादेव प्रचलति स्म। अपौरुषेये ऋग्वेदे अग्निः अतिथिरूपेण स्वीक्रियते। याज्ञिकाः अतिथिरूपेण अग्निं पूजयन्ति स्म। ऋग्वेदे **'स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वितारीत्'**[१५]इति। मनुना अतिथेः व्युत्पत्तिः एवं कथिता -

**एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः।**
**अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते।।** [१६]

एकरात्रमेव परगृहे निवसन्ब्राह्मणोऽतिथिर्भवति। अनित्यावस्थानान्न विद्यते द्वितीया तिथिरस्येत्यतिथिरुच्यते। वैश्वदेवादन्नात् षोडशग्रासपरिमितं ग्रासचतुष्टयपरिमितं वा अन्नं विप्राय 'हन्त ते' इति मन्त्रेण दद्यात्। कर्मण्यस्मिन् यः यथा अर्हति तदनतिक्रम्य भिक्षुकान् (परिव्राजक-ब्रह्मचारिप्रभृतीन्) अतिथीन् श्रोत्रियादीन् भिक्षाभोजनदानादिना तोषयेत्। भोजनवेलायां बालज्येष्ठाः पुत्रादयः यथायोग्यम् अश्नीयुः। पश्चाद् गृह्याणां भोजनानन्तरं गृहपतिः पत्नी च अश्नीयाताम्। पक्षान्तरे गृहपतिः पत्न्याः पूर्वम् अश्नीयात्। मनुना पुनश्च प्रतिपादितं यत् स्वयमागताय अतिथये आसनं, पादप्रक्षालनाद्युदकम्, यथासम्भवं व्यञ्जनादिभिरुपसिक्तम् अन्नं च दद्यात्। यथा -

**सम्प्राप्ताय त्वतिथये प्रदद्यादासनोदके।**
**अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम्।।**[१७]

अन्नासम्भवे पुनस्तृणविश्रामभूमिपादप्रक्षालनाद्यर्थं जलं प्रियवचनान्यपि, धार्मिकगृहेष्वातिथ्यार्थं न कदाचिदुच्छिद्यन्ते, अवश्यदेयानीति विधीयन्ते। यथोक्तम् -

**तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।**
**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।**[१८]

कूर्मपुराणानुसारम् **'अतिथिः परमेश्वर इत्युच्यते'**[१९]। इत्थमतिथिसेवायां मनुष्ययज्ञस्य महत्त्वं धर्मशास्त्रादिषु वर्णितमस्ति।

एतेषां पञ्चमहायज्ञानामनुष्ठानं प्रतिदिनं करणीयं, नोचेत् सर्वे पापेन पीडिताः स्युः। एतेषां महायज्ञानां गृहस्थाश्रमे महत्यावश्यकता वर्तते। गृहस्थः प्रतिदिनं प्रतिक्षणं च ज्ञानपूर्वकम् अज्ञानपूर्वकं वा गृह्योक्तकर्मसम्पादनसमये किमपि अवश्यं पापकर्म आचरति। तस्य पापस्य निराकरणार्थमेषां पञ्चमहायज्ञानामनुष्ठानमनिवार्यम् । तर्हि कानि तानि पापस्थानानि इति जिज्ञासायां भगवता मनुना उक्तं यत् - चुल्ली, पेषणी, उपस्करः, कण्डनी, उदकुम्भश्च पञ्चैतानि पापस्थानानि भवन्ति। यथा-

**पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः।**
**कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्।।**[२०]

पशुबन्धस्थानं सूना, सूना इव सूना हिंसास्थानगुणयोगाच्चुल्यादयः पञ्चगृहस्थस्य हिंसाबीजानि हिंसास्थानानि। चुल्लीशब्देनोद्वाहनी, पेषणीदृष्ठदुपलात्मिका, उपस्करः गृहोपकरणकुण्डसम्मार्जन्यादिः कण्डनी-उलूखलमुसले, उदकुम्भः - जलाधारकलशः, याः स्वकार्ये योजयन् पापेन सम्बध्यन्ते। तासां चुल्यादिस्थानानां यथाक्रमं निष्कृत्यर्थम् उत्पन्नपापनाशार्थं गृहस्थानां पञ्चमहायज्ञाः प्रतिदिनं मन्वादिभिरनुष्ठेयतया स्मृताः। यः गृहस्थः स्वशक्त्यनुसारं पञ्चमहायज्ञान् नित्यमाचरति, स गृहस्थाश्रमे स्थित्वापि सूनादोषैर्लिप्तो न भवति। अत उच्यते मनुना -

**पञ्चैतान्यो महायज्ञान्न हापयति शक्तितः।**
**स गृहेऽपि वसन्नित्यं सूनादोषैर्न लिप्यते।।**[२१]

**उपसंहारः -**

पञ्चमहायज्ञानामनुष्ठानेन मानवः देव-ऋषि-पितृ-ऋणेभ्यो मुक्तो भवति। एवञ्च प्रतिदिनं ज्ञानाज्ञानपूर्वकमाचरितानां पापानां विनाशोऽपि जायते। पुनश्च मानवानां सेवया सदुपकारेण च नृयज्ञः क्रियते। मानवानामध्यात्मज्ञानं प्रदूषणमुक्तपर्यावरणस्वस्थस्य समाजस्य च संरचना पञ्चमहायज्ञानां प्रयोजनीभूता भवति। अनेन समाजस्य महदुपकारः जायते। अतः पञ्चमहायज्ञानां परिपालनमवश्यं गृहस्थेन मानवेन करणीयम्।

## सन्दर्भाः


१. धर्मद्रुमः - १/१
२. मनुस्मृतिः - ३/७७
३. तत्रैव - ३/७८
४. तत्रैव - ३/७०
५. तत्रैव - ५/४
६. तैत्तिरीयारण्यकम् - २/१२
७. आरण्यकम् - ३/३/१
८. मनुस्मृतिः - ३/८२
९. तत्रैव - ३/२९३
१०. तत्रैव - ३/७६
११. पारस्कराचार्यः - २
१२. मनुस्मृतिः - ३/१०
१३. तत्रैव - ३/९१
१४. तत्रैव - ३/९२
१५. ऋग्वेदः - १/७३/१
१६. मनुस्मृतिः - ३/१०२
१७. तत्रैव - ३/९९
१८. तत्रैव - ३/१०
१९. कूर्मपुराणम्
२०. मनुस्मृतिः - ३/६८
२१. तत्रैव - ३/७१


## सहायकग्रन्थसूची


१) ऋग्वेदसंहिता - शिवनाथ आहिताग्नि, नाग प्रकाशक, जवाहरनगर, दिल्ली, १९९१
२) कूर्मपुराणम् - कन्हैयालाल जोशी, परिमलपब्लिकेशन्स्, शान्तिनगर, दिल्ली, २०११
३) गौतमधर्मसूत्रम् - डां. अमरेशचन्द्र पाण्डेय,चौखम्बासंस्कृतसंस्थान, वारणासी, २००५
४) मनुस्मृतिः - पं.हरगोविन्द शास्त्री, चौखम्बासंस्कृतसंस्थान, वारणासी, २००३
५) याज्ञवल्क्यस्मृतिः - डां. अमरेशचन्द्र पाण्डेय, चौखम्बासंस्कृतसंस्थान, वारणासी, २००८


□□□

# अश्रुतफलके विश्वजिदादौ प्रयुक्तिनिरूपणे पार्थसारथिमिश्रखण्डदेवाचार्यपद्धत्योः विवेचनम्

*ए. श्रीराम*
*(शोधच्छात्रः, मीमांसाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**'चोदनायां फलश्रुतेः कर्ममात्रं विधीयेत न ह्यशब्दं प्रतीयते।'**[१]

**'विश्वजिता यजेत'**[२] इति वाक्येन विहितः एकाहः अश्रुतफलकः। तत्र तप्रत्ययोपात्तभावनायाः भाव्याकाङ्क्षायां समानपदश्रुत्या बोधितस्य यागस्य न तावत् भाव्यत्वेनान्वयः। तस्यापुरुषार्थत्वात्। तदपेक्षया अन्तरङ्गश्रुत्या नाम समानाभिधानश्रुत्या बोधितप्रवर्तकत्वबलेन पुरुषार्थस्यैव भाव्यत्वेनान्वयः। इतरथा विधेः प्रवर्तकत्वमेव न सिध्येत। तृतीयान्तनामधेयसामानाधिकरण्येन यागस्य तु करणत्वेनैवान्वयः। अतः यत्र फलं न श्रूयते तत्र स्वर्गकामः इत्यादिफलवाचककामपदान्तफलपदाध्याहारेण पुरुषार्थफलकत्वम्। अध्याहृतमपि फलं वेदाकाङ्क्षया अध्याहृतत्वात् वैदिकमेव। अथवा पारायणादौ तस्य अनुपयोगात् वेदतुल्यत्वं वा। एकफलकल्पनया एव निराकाङ्क्षत्वात् तच्च कल्प्यमानं फलम् एकमेव कल्प्यते, न तु सर्वम्। तदपि कल्प्यमानं फलं स्वर्ग एव। न तु पुत्रपश्वादि। **'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतञ्च तत्सुखं स्वः पदास्पदम्'**[३]। इति वाक्यात् स्वर्गशब्दस्य सुखविशेषमात्रवाचित्वात् विजातीयस्वर्गत्वस्यैव जन्यतावच्छेदके लाघवम्। पुत्रादीनान्तु साक्षात् सुखाभावात् अपि तु सुखसाधनतया विलम्बोपस्थितिः सम्भवति। पुत्रादीनां तु सिद्धेन न प्रार्थ्यतेत्यतः, स्वर्गस्य बहुभिः अर्थ्यमानतया च विधिशास्त्रस्य महाविषयलाभोऽपि स्यात्।

लाघवाविशेषेऽपि ऐहिकामुष्मिकसाधारणसुखत्वस्य जन्यतावच्छेदकत्वं न कल्प्यते। यतः स्वरसतः दुःखासम्भिन्नसुखस्यैव सर्वेषाम् इच्छाविषयत्वात्।

दुःखासम्भिन्नसुखस्य तु फलत्वं न सिध्यति। व्याप्यधर्मेण जन्यत्वसम्भवे व्यापकधर्मेण अन्यथासिद्धत्वाच्च। सुखत्वस्य तु यागाजन्यत्वतिरिक्तेऽपि विद्यमानत्वात् व्यभिचारित्वात् कार्यतावच्छेदकत्वानापत्तिः। अतः विश्वजित्वावच्छिन्नकारणता-निरूपितजन्यतावच्छेदकत्वं विजातीयस्वर्गत्वस्यैव युक्तम्।

तदुपरि प्रश्नः - विश्वजित्फलत्वेन मोक्षः कल्प्यतामिति। स च मोक्षः यदि दुःखध्वंसरूपः, तर्हि पापक्षयादेव जन्यत्वात् न विश्वजिन्न्यायः। दुःखध्वंसत्वरूपजन्यता-वच्छेदकगौरवमपि आपद्येत। यदि आनन्दावाप्तिरूपः तर्हि तस्य नित्यत्वात् ज्ञानैकजन्यत्वात् न विश्वजिद्जन्यत्वम्।

यदा **'कर्मणैव हि संसिद्धिमास्थिता जनकादयः'**[४] इति वचनात् कर्मैकजन्यत्वम् अथवा ज्ञानकर्मसमुच्चयसाध्यत्वं मोक्षस्य उच्यते, तदा **'त्यक्त्वा कर्म फलासङ्गम्'**[५] इति उपक्रमोपसंहारानुसारेण कर्मशब्दस्य तु सर्वकर्मफलत्वमवगम्यते। अतः अश्रुतफलकविश्वजिदादिमात्रपरत्वे प्रमाणं न किञ्चिदुपलभ्यते।

तदुपरि प्रश्नः - कर्मत्वसामान्यात् विश्वजिदः अपि मोक्षफलसाधनत्वोपपत्तिः। विश्वजिद्वाक्यस्य तु उत्पत्तिपरत्वेनाप्यवसायात् फलकल्पना न कार्या इति चेत् क्लप्तप्रयोगविधीनामेव कर्मणां मोक्षफलकत्वकल्पने लाघवम्। अक्लृप्तप्रयोगकस्य विश्वजिदादिग्रहणे, प्रयोगः, विनियोगः इति कल्पनीयं, तदितरकर्मणि न किमपि कल्पनीयमिति वैरूप्यं सम्भवति। अतः तत्परिहाराय अवश्यं फलं कल्पनीयम्। एतेन **'विविदिषन्ति यज्ञेन'**[६] इत्यादिवाक्यात् **'कर्मणा पितृलोकः'**[७] इत्यादिवाक्यात् अक्लृप्तप्रयोगकत्वादेव विश्वजिदः विविदिषामात्रार्थत्वं पितृलोकमात्रार्थत्वमित्यपि अपास्तम्। इतरथा प्रयाजादीनामपि विविदिषाफलकत्वमापद्येत। एवमेव **'धर्मेण**

**पापमपनुदति'**[८] इत्यादिवाक्यात् पापक्षयफलकत्वमप्यपास्तम्। पापक्षयस्य तु नित्यनैमित्तिकानुषङ्गत्वेन विश्वजिति प्रयोजकत्वकल्पने वैरूप्यं स्यात्।

**पार्थसारथिमतम् -**

**१) विश्वजिदादीनां सफलत्वाधिकरणम् ।। ५।।**

**नैवास्ति विश्वजिद्यागे फलमस्त्युत नाश्रुतेः।।**
**भाव्यापेक्षाद्विधेः कल्प्यं फलं पुंसः प्रवृत्तये।।७।।**[९]

अश्रुतफलके विश्वजिदादौ फलमस्ति वा न वा इति विशयः। अर्थात् फलप्रयुक्तोयं यागः उत न इति।

विधिवाक्ये फलस्याश्रुतत्वात् एषां शब्दगम्यम् अदृष्टं विना फलं नास्ति। वाक्यस्य परिपूर्णत्वात् अध्याहारेणापि फलं कल्पयितुं न शक्यते।

तदुपरि आक्षेपः - यागेन भावयेत् इत्युक्ते, किं भावयेत् इत्यपेक्षायाम् अध्याहारः कार्यः इति चेत् परिपूर्णत्वादेव न अध्याहारापेक्षा। यदि उत्पत्तिवाक्ये फलं श्रूयते तदा एव समानपदोपात्तं धात्वर्थम् अतिक्रम्य फलस्य भाव्यत्वेन अन्वयः। इतरथा धात्वर्थस्यैव भाव्यत्वेनान्वयः।

तदुपरि आक्षेपः - यागमात्रस्य कर्तव्यत्वेन न कश्चित् प्रवर्तते इति चेत् तेन कोऽपि न दोषः। विध्यानर्थक्यं भवति इति चेत् अनाप्तवचनवत् अप्रमाणं भवतु। कर्तव्यताबलादेव फलं कल्पयितुं न शक्यते। कृतमात्रविनष्टेन यागेन फलं कल्पयितुमपि न शक्यम्। अपूर्वस्यापि कल्पने प्रमाणाभावः। तस्मात् निष्फलमेवेदं कर्म इति प्राप्ते

फलस्याश्रवणेऽपि प्रवर्तनात्मकविधिबलादेव धात्वर्थस्य न भाव्यत्वेनान्वयः। तदतिरिक्तस्य भाव्यापेक्षणात् तल्लाभाभावात् अपरिपूर्णं वाक्यमिति अध्याहारमपेक्षते। तच्च अध्याहृतमपि फलं वेदैकदेशभूतत्वात् वैदिकमेव भवति। अथवा वैदिकमेव अन्यत्र स्थितम् अध्याह्रियते। अतः सर्वेषां कर्मणां फलवत्वम्।

**२) विश्वजिदादीनाम् एकफलताधिकरणम्।। ६।।**

**सर्वं फलमुतैकं स्यात्सर्वमस्त्वविशेषतः।।**

**एकेन तन्निराकाङ्क्षमतोऽनेकं न कल्प्यते।। ८।।**[१०]

**एकमेव फलं कल्प्यम् उत अनेकम् इति संशयः।**

विशेषनिर्देशाभावात् सर्वार्थः इति प्राप्ते एकेन फलकल्पनेन नैराकाङ्क्षात् एकमेव फलं कल्प्यते।

**३) विश्वजिदादीनां स्वर्गफलताधिकरणम्।। ७।।**

**एकं यत्किंचिदथवा नियतं न नियामकम्।।**

**तस्मादाद्यः सर्वपुंसामिष्टत्वात्स्वर्ग एव तत्।।९।।**[११]

**कल्प्यमानम् एकं फलं किमिति विशयः।**

एकमेव फलं कल्प्यमिति स्थितम्। परं तच्च किमिति अज्ञानात् पुनः सर्वार्थमिति प्राप्ते शास्त्रस्य महाविषयत्वलाभाय सर्वैः अभिलप्यमाणत्वात् निरतिशयसुखरूपः स्वर्गः एव फलत्वेन कल्प्यः। पश्वादिकं तु दुःखसम्मिश्रम् । अतः कैश्चिदेव प्रार्थ्यते। यद्यपि प्रत्यवायपरिहारः सर्वैः अभिलष्यते। तथापि तस्य ज्ञानैकगम्यत्वात् विलम्बोपस्थितिकत्वाच्च स्वर्गः एव फलत्वेन कल्प्यते।

यद्यप्युभयमतेऽपि स्वर्गस्यैव प्रयोजकत्वं समानं, तथापि युक्तिविचारावसरे भाट्टदीपिकायाः गरीयस्त्वं परिदृश्यते। पूर्वपक्षं विना भट्टदीपिकायामधिकरणमारचितम्। शास्त्रदीपिकायां शिषतः पूर्वपक्षप्रदर्शनद्वारावान्तरभेदेनाधिकरणत्रयमारचितम्। तत्रापि प्रथमाधिकरणपूर्वपक्षे समानपदश्रुतिमाश्रित्यानिष्टस्यापि भाव्यत्वेन कथनात्, पुनः विधेः कथञ्चिदपि प्रवर्तनात्वं न रक्षितमिति, तस्य चाप्रामाण्यप्रतिपादनात्, स्वाध्यायविधि-बोधितस्य प्रथमप्रथमसिद्धस्य निखिलवेदस्य प्रयोजनवत्वकथनस्य भङ्गः बोभवीतीति अस्वारस्यं प्रतिभाति।

## सन्दर्भाः

१. मीमांसासूत्राणि ४-३-१०
२. शतपथब्राह्मणम् १०.२.१.१६
३. मीमांसामञ्जरी
४. भगवद्गीता ३.२०
५. तत्रैव ४.२०
६. भाट्टदीपिका ४.३.१०
७. छान्दग्योपनिषत्
८. तैत्तिरीयारण्यकम् १०.७९.१००
९. जैमिनीयन्यायमाला ४.३.५.७
१०. तत्रैव ४.३.६.८
११. तत्रैव ४.३.६.९

## परिशीलितग्रन्थाः

१) जैमिनीयन्यायमाला - माधवाचार्याः, आनन्दाश्रमः, पुने
२) भाट्टदीपिका - खण्डदेवाचार्याः, सद्गुरु, देहली
३) शाबरभाष्यम् - शबरस्वामिपादाः, गायकवाड, वरोडा
४) टुप्टीका - कुमारिलभट्टपादाः
५) शास्त्रदीपिका - पार्थसारथिमिश्राः
६) मीमांसामञ्जरी - तङ्गस्वामिनः

□□□

# परार्थाभिधानं वृत्तिः

*विघ्नेश्वर मिश्र*
*(शोधच्छात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

वृत् धातोः - वर्त्तते यया, वर्तते अनया वेति व्युत्पत्तौ अधिकरणे - वर्त्तेतेऽस्मिन्निति, भावे - वर्त्तनं वृत्तिरिति व्युत्पत्तौ वा क्तिन्[१] प्रत्यये सति वृत्तिशब्दो निष्पद्यते। विविधव्युत्पत्तिभिर्निष्पन्नस्य वृत्तिशब्दस्य विविधव्युत्पत्तिवशात् सम्बन्धह्रस्वदीर्घप्लुतद्रुतमध्यमविलम्बितशक्तिलक्षणाव्यञ्जनातात्पर्यप्रवर्त्तनाधेय-व्यवहारविवरणजीविकाशब्दार्थसम्बन्धपरार्थाभिधानार्थत्वादयः तत्तच्छात्रेषु समुपलभ्यन्ते। तत्र ''परार्थाभिधानं वृत्तिः'' इति कृदादिवृत्तिस्वरूपम्। शक्त्यादि-भेदेन वृत्तिस्त्रिधेत्यत्र वृत्तिस्वरूपनिर्णये प्राचीनाः - शाब्दबोधनिष्ठपदार्थोपस्थिति-जनकत्वं वृत्तित्वमिति[२] वदन्ति। नव्यास्तु - जन्यजनकभावकल्पने गौरवाच्छद्बानित्य-त्वापत्तेश्च शाब्दबोधहेतु - शब्दार्थोपस्थित्यनुकूलपदपदार्थसम्बन्धत्वं वृत्तित्वमिति[३] लक्षणमाहुः। केचित्तु शब्दतदर्थसम्बन्धत्वं वृत्तित्वमिति उचुः। सा च वृत्तिस्त्रिधा - शक्तिः लक्षणा व्यञ्जना चेति। वाच्यवाचकभावापरपर्याया शक्तिरेव वृत्तिरिति वैयाकरणानां सामग्रिकः सिद्धान्तः। तत्र शब्दानित्यवादिनां कृत्तद्धितसमासैकशेष-सनाद्यन्तधातुरूपान्यतमरूपवृत्तिसंज्ञकेषु याथार्थ्यबोधाय महाभाष्यकारेणापरं वृत्तिलक्षणं प्रतिपादितम् परार्थाभिधानं वृत्तिरिति[४]। प्रागुक्तवृत्त्यपेक्षया इयं वृत्तिः भिन्ना।

**अत्रेदं विचार्यते**

वैयाकरणनये शब्दस्य नित्यत्वात्समासादौ परार्थाभिधानात्मिकावृत्तिः कथं मान्यते? यतोहि भाष्यकारः ''किं पुनर्नित्यः आहोस्वित् कार्यः?'' इति

प्रश्नमुपस्थाप्य तत्समाधानाय ''सङ्ग्रहे तावत् प्राधान्येन परीक्षितम्, नित्यो वा स्यात् कार्यो वेति। तत्रोक्ताः दोषाः प्रयोजनान्यप्युक्तानि। तत्र त्वेषः निर्णयः यद्येव नित्यः अथापि कार्यः, उभयथापि लक्षणं प्रवर्त्त्यमिति''[५] व्याड़िकृत सङ्ग्रहनाम्ना ग्रन्थस्योद्धरणमुदधरत्। एवञ्च नानायुक्तिभिः पक्षद्वयमुपस्थाप्य अन्ते नित्यत्व-परीक्षणाय ''कूटस्थैरविचालिभिवर्णैर्भवितव्यमनपायोपजनविकारिभिः[६]'' इत्यस्य विकल्पे नित्यत्वस्य लक्षणत्वेन ''तदपिनित्यं यस्मिंस्तत्त्वं न विहन्यते''[७] इति जगाद। ''सिद्धे शब्दार्थसम्बन्धे[८]'' इति कात्यायनवचनेन शब्दस्य, अर्थस्य तयो सम्बन्धस्य च नित्यता अपि प्रकटी भवति। एवं सति परार्थाभिधानादिकल्पने किं मानम्? इति जिज्ञासा प्रवलायते। तत्समाधानाय भाष्यकारः-''अथ ये वृत्तिं वर्तयन्ति किं त आहुः- परार्थभिधान वृत्तिरिति[९]'' कथयामास। हरिरपि -

**अबुधान् प्रतिवृत्तिञ्च वर्त्तयन्तः प्रकल्पिताम् ।**
**आहुः परार्थवचने त्यागाभ्युच्चयधर्मताम्॥**[१०]

इति परार्थाभिधायिकावृत्तेः व्याख्यानं तत्तदाचार्यैस्तत्तद् ग्रन्थेषु विविधरूपेण विहितम्। यथा-

**नागेशः-** परस्योपसर्जनार्थकस्य राजपुरुष इत्यत्र राजरुपस्य शब्दान्तरेण प्रधानार्थकपुरुष- शब्देनार्थप्रत्यायनं स्वार्थविशेषणत्वेन यद् ग्रहणं सा वृत्तिः। अथवा परार्थस्य प्रधानार्थस्य पुरुषस्याप्रधानराजादिपदैर्यत्र स्वार्थविशेष्यत्वेन ग्रहणं सा वृत्तिरिति अन्वाचष्टे[११]।

**कैयटः-** परस्य शब्दस्य योऽर्थस्तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिः। यथा राजपुरुष इत्यत्र राजशब्देन वाक्यावस्थायामनुक्तः पुरुषार्थोऽभिधीयते[१२]।

**वासुदेवः-** विग्रहवाक्यावयवपदार्थेभ्यः परोऽन्यो योऽयं विशिष्टैकार्थस्तत्प्रतिपादिका वृत्तिरिति[१३]।

**हेलाराजः-** परस्यान्यस्य प्रधानस्य पदस्य योऽर्थः, तस्योपसर्जनपदेन प्रत्यायनं परार्थाभिधानम्।[१४]

**भट्टोजिदीक्षितः-** परः = विशिष्टः, यः अर्थः, तदभिधानम् = शक्त्या, लक्षणया, आकाङ्क्षादिवशात् संसर्गमर्यदया वा यत्र सा वृत्तिः। एकार्थीभावे शक्त्या, व्यपेक्षायां लक्षणया तदभिधानमस्ते व इति भावः।[१५]

**हरिः-** अधोन्यस्तकारिकया त्यागाभ्युच्चयधर्मतां वृत्तिं शब्दानित्यत्ववादिनाम् अबुधानां बोधाय इति वदति।

**अबुधान् प्रतिवृत्तिश्च वर्तयन्तः प्रकल्पिताम् ।**
**आहुः परार्थवचने त्यागाभ्युच्चयधर्मताम् ।।**[१६]

**ज्ञानेन्द्रसरस्वती -** प्रत्ययान्तर्भावेन पदार्थान्तर्भावेन वा यो विशिष्टोऽर्थः स परार्थः, स चाभिधीयते येन तत्परार्थाभिधानमिति व्याचख्ये[१७]।

परार्थाभिधानात्मिकायाः वृत्तेः एवंविधव्याख्यानादवगम्यते यत्ततत्तदर्थाभिधानात्मिकया वाच्यवाचकभावापरपर्यायाख्यया शक्त्या समन्विताः शब्दाः लोके तत्तदर्थैष्वेव प्रयुञ्जन्ति। अतएव शास्त्रकारैः शब्देनार्थस्य विलक्षणसम्बन्धो वृत्तिपदेनाभिहितः। ततोऽन्यार्थप्रत्ययनाय वृत्तिरियं परिकल्पिता। एवमुक्तरूपेण व्याख्याता परार्थाभिधायिका वृत्तिः कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपेषु कथ संघटते इति जिज्ञासायामुद्यते यत् ''समर्थः पदविधिः''[१८] इति महर्षिपाणिनेः परिभाषासूत्रस्य व्याख्यानात् एव परार्थाभिधानलक्षणायाः वृत्तेः प्रारम्भः। तस्मात् पदसम्बन्धिनो ये विधयः ते कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपा वृत्तिपदवाच्या भवन्ति। यः कश्चित इह शास्त्रे पदविधिः श्रूयते स समर्थो वेदितव्यः। विधीयते इति विधिः, पदानां विधिः पदविधिः। सः समासादिः। इह सूत्रे समर्थशब्दः शक्तार्थबोधकः। विग्रहवाक्यार्थाभिधाने यः शक्तः सः समर्थो वेदितव्यः इति। अथवा

समर्थपदाश्रयत्वात् समर्थः इति। अर्थात् विग्रहवाक्यार्थाभिधानरूपावृत्तिः समासे तद्धिते च वर्त्तते। परं पराङ्गवद्भावविभक्तिविधानयोः न सा वृत्तिः दृश्यते विग्रहवाक्यार्थानाभिधानात्। वस्तुतस्तु समर्थानि पदान्याश्रयो यस्य सः समर्थपदाश्रयः, तद् भावः समर्थपदाश्रयत्वम्। अनेन प्रकारेण समासादयः समर्थाः जायन्ते। यस्याश्रयः समर्थः सोऽपि आश्रयधर्माऽरोपात् समर्थ एव भवति। तच्च सामर्थ्यं द्विविधम्। एकार्थीभाव - व्यपेक्षेति भेदेन। तत्र न एकार्थोऽनेकार्थोऽनेकार्थस्यैकार्थत्वमेकार्थीभावः इति व्युत्पत्त्या ''पृथगर्थानामेकार्थीभावः समर्थवचनम्''[१९] इति वार्त्तिककारोक्त्या च यदा एकार्थीभावसामर्थ्यं तदा सङ्गतार्थः समर्थः, संसृष्टार्थः समर्थः इति विग्रह जायते। एकार्थीभावसामर्थ्यविषये प्रदीपकारेणतु एवं न्यगादि - ''यत्र पदान्युपसर्जनीभूतस्वार्थानि, निवृत्तस्वार्थानि वा प्रधानार्थोपपादनाद्, व्यर्थानि अर्थान्तराभिधायीनि वा सः एकार्थीभावः''[२०] इति। मञ्जूषाकारस्तु- यत् किञ्चित् पदजन्यपृथगुपस्थितिविषयार्थकत्वेन लोके दृष्टानां शब्दानां विशिष्टविषयैकशक्त्यैवोपस्थितिजनकत्वमेकार्थीभाव[२१] इति। वाक्ये हि राज्ञः पुरुषः इत्यत्र राजशब्दो राजार्थमेवाचष्टे, पुरुषशब्दोऽपि पुरुषार्थमेव। वृत्तौ तु राजपुरुष इत्यत्र राजशब्दोऽपि पुरुषार्थमेवाचष्टे इति द्वयोः एकार्थीभावः भवति। स्वार्थपर्यवसायिनां पदानामाकाङ्क्षावशात् यः यः परस्परान्वयस्तद् व्यपेक्षाभिधं सामर्थ्यं न इह संघटते। दृश्यते हि तावत् राज्ञः पुरुषः इत्युक्ते राजा पुरुषमपेक्षते ममायमिति, पुरुषोऽपि राजानमपेक्षते अहमस्येति। अतः समर्थशब्देन वाक्ये व्यपेक्षालक्षणसामर्थ्यम्, समासादिस्थलेषु एकार्थीभावलक्षणं सामर्थ्यमवगन्तव्यम्। एवमुक्तस्य सामर्थ्यस्यास्य पञ्चसु कृत्तद्धितसमासैकशेषसनाद्यन्तधातुवृत्तिषु संघटनप्रकारः इत्थं वर्त्तते। यथा-

**कृत् -**''आतोऽनुपसर्गे कः''[२२] इत्यद्युपपदनिमित्तकानां कृतां पदविधित्वं वर्त्तते। तेन च वृत्तिः सिद्धा।

**तद्धित-** सुबन्तात् तद्धितप्रत्ययानामुत्पत्तिरिति उक्तत्वात् तत्र पदविधित्वं सुस्पष्टमेव।

**समासः-** 'सुबामन्त्रितेपराङ्गवत्स्वरे'[२३] 'सह सुपा'[२४] इत्यनुवर्त्त्य समासविधानात् समासे पदविधित्वमस्त्येव।

**एकशेषः-** अपवाद एकशेषो द्वन्द्वं वाधिष्यते[२५] इति इति भाष्यवचनात् द्वन्द्वविषये तस्य विधानात् पदविधित्वमवगम्यते। **सनाद्यन्तधातुरूपः -** ''सुपः आत्मनः क्यच्''[२६] इत्यादिनां सुबन्तात् विधानात् पदविधित्वं सिद्धमेव।

अनेन प्रकारेण कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपेषु परार्थाभिधानरूपा वृत्तिः सिद्धा। एवञ्च एषा परार्थाभिधानरूपावृत्तिः अवयवशक्तिसहकृतसमुदाय-शक्तिसाध्या। तत्रावयवशक्तिः समासादौ लोकसिद्धा, तद्धितादौ तत्तदर्थे विहितप्रत्ययानां शास्त्रसिद्धा चेति।

## सन्दर्भाः


१. स्त्रियां क्तिन् (अ.३/३/९४)
२. वैयाकरणसिद्धान्तलघुमञ्जूषा(वृत्तिविचारप्रकरणे)
३. तत्रैव
५. महाभाष्यम् २ /१/१
५. महाभाष्यपस्पशाह्निकम्
६. तत्रैव
७. तत्रैव
८. तत्रैव
९. महाभाष्यम् २/१/१
१०. वाक्यपदीयम् ३/१४/९४
११. महाभाष्यप्रदीपोद्यतटीका २/१/१
१२. महाभाष्यप्रदीपटीका २/१/१
१३. बालमनोरमटीका (सिद्धान्तकौमुदी) सर्वसमासशेषप्रकरणे
१४. प्रकाशटीका हेळराजीयटीका (वाक्यपदीयम्)

१५. मतोन्मज्जन टीका (वाक्यपदीयम्)
१६. वाक्यपदीयम् ३/१४/९४
१७. तत्त्वबोधिनीटीका (सिद्धान्तकौमुदी) सर्वसमासशेषप्रकरणे
१८. अष्टाध्यायी २/१/१
१९. महाभाष्यम् २/१/१
२०. महाभाष्यप्रदीपटीका २/१/१
२१. वैयाकरणसिद्धान्तलघुमञ्जूषा(वृत्तिविचारप्रकरणे)
२२. अष्टाध्यायी ३/२/३
२३. तत्रैव २/१/२
२४. तत्रैव २/१/४
२५. महाभाष्यम् १/२/६४
२६. अष्टाध्यायी ३/१/८

## सहायकग्रन्थसूची

(१) अष्टाध्यायी, व्याख्याकारः - पं.ईश्वरचन्द्र, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००४

(२) सिद्धान्तकौमुदी, सम्पादकः - उमाशंकरशर्मा, चौखम्बाविद्याभवनम्, १९९४

(३) महाभाष्यम्, सम्पादकः - श्रीभार्गव शास्त्री, जोशी संस्कृत प्रतिष्ठान, दिल्ली, २०००

(४)वैयाकरणसिद्धान्तलघुमञ्जूषा, सम्पादकः- रामप्रसाद त्रिपाठी, सम्पूर्णानन्द संस्कृतविश्वविद्यालय, १९९०

(५) समासवृत्तिविमर्शः, डा. विजयप्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, १९९१

(६) बृहद्वैयाकरणभूषणम्, सम्पादकः - मनुदेव भट्टाचार्य, चौखम्बा अमरभारती प्रकाशनम्, १९८५

□□□

# पाणिनीय-जागदीशदिशा तद्धितप्रत्ययसमीक्षणम्

*आर्. गीता*
*(अनुसन्धात्री, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः -**

**'एकश्शब्दः सम्यग्ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुक् भवति'** इति महाभाष्यकारस्य पतञ्जलिमुनेः वचनम्। स्थूलतस्समालोचने इदं हि भाष्यकारवचनं शब्दज्ञानस्य, तत्प्रयोगस्य च महत्त्वं बोधयति। शब्दप्रयोक्तृणां व्यापारः प्रायेण तद्धितान्त-तिङन्त-कृदन्तेषु प्रवर्तते। प्रयोगदृष्ट्या तथा च त्रिविधानामेषां प्राधान्यं वरीवृत्यते।

एवं स्थिते त्रिविधेषु एषु प्रयोगेषु तद्धितान्तानां प्रयोगः इतरौ द्वौ अतिशेतेतराम्। अत एव **'तद्धित'** इति शब्दः अन्वितार्थको भवति। तेभ्यः प्रयोगेभ्यः हिताः = तद्धिताः। एवं रीत्या अन्वर्थस्वीकारे प्रमाणं **'तद्धित'** इति महासंज्ञाकरणमेव। अत एव **'तद्धितमूढो वैयाकरणः तद्धितमूढोऽवैयाकरणः'** इत्यभियुक्तोक्तिः संगच्छते। तद्धित = तद्धितान्तशब्दान् ऊढः इत्युक्ते यः वहति = प्रयुङ्क्ते स एव वैयाकरणः। यस्तु तद्धितप्रक्रियायां मूढः स तु न वैयाकरणः इति अभियुक्तोक्तेः अर्थः। मुनित्रये अन्यतमः वार्तिककारोऽपि तद्धितप्रक्रियायां प्रीतिं प्रदर्शयामास। अत एव पस्पशान्हिके क्वचित् **'यथा लोके वेदे च'** इति प्रयोक्तव्ये **'यथा लौकिकवैदिकेषु'** इति प्रायुङ्क्त सः। तदवसरे भगवान् भाष्यकारः **'प्रियतद्धिता दाक्षिणात्याः'** इत्येवं कात्यायनस्य प्रियतद्धितत्वं प्रशंसति। शब्दशक्तिप्रकाशिकायाः प्रणेता तार्किकमूर्धन्यः जगदीशतर्कालङ्कारः। श्रीमता जगदीशतर्कालङ्कारेण तत्र ग्रन्थान्ते तद्धितप्रत्ययविचारः विहितः। सम्प्रति प्रबन्धेऽस्मिन्

अष्टाध्यायीस्थां रीतिं, शब्दशक्तिप्रकाशिकायां विद्यमानां सरणिं च समाश्रित्य किञ्चिदिव प्रस्तूयते।

## १) तद्धितशब्दव्युत्पत्तिः

**१. अत्र पाणिनीयम् -**

**'तद्धिता'**[1] इति सूत्रव्याख्यावसरे शब्दकौस्तुभे, तत्त्वबोधिन्यां, वाचस्पत्ये च तेभ्यः प्रयोगेभ्यः हिताः, तस्मै = प्रयोगाय हितः इति च रीत्या तद्धितशब्दस्य व्युत्पत्तिः प्रदर्शिता।

**अत्र जगदीशः -**

**विभक्त्यादित्रिकादन्यः प्रत्ययस्तद्धितं मतम्।**
**नामप्रकृतिको नैवमतिव्याप्त्यादिदोषतः।।**[2]

विभक्ति-धात्वंश-कृद्भ्यः अन्यः प्रत्ययः तद्धितः इति तदर्थः।

**अत्र समीक्षा -**

**विभक्त्यादित्रिकादन्यः इत्युक्ते 'अजाद्यतष्टाप्'**[3] इत्यादिभिः सूत्रैः विहिताः टाबादयः अपि तद्धितसंज्ञां प्राप्नुयुः किल ? इति। अतः कृपया इमां जिज्ञासां शास्त्रविदः परिहरन्तु इति मे विज्ञप्तिः।

## २) तद्धितप्रत्ययविभागः

**२. अत्र पाणिनीयम् -**

तद्धितप्रकरणे **'तस्यापत्यम्'** (१-१-९२), **'तेन रक्तं रागात्'** (४-२-१), **'नक्षत्रेण युक्तः कालः'** (४-२-३), **'दृष्टं साम'** (२-३-४७), **'परिवृतो रथः'** (४-२-१०), **'सास्य देवता'** (४-२-२४), **'तस्य समूहः'** (४-२-३७), **'विषयो देशे'** (४-२-५७), **'तदधीते तद्वेद'**(४-२-९), **'तदस्मिन्नस्तीति देशे तन्नाम्नि'** (४-२-६७), **'तेन निर्वृत्तम्'** (५-१-७९), **'तस्य निवासः'** (४-२-६९), **'अदूरभवश्च'** (४-१-७०) इत्येवमादिभिः सूत्रैः अपत्यादिष्वर्थेषु अणादयः प्रत्ययाः उक्ताः। अनया रीत्या तद्धितप्रकरणे तत्तत्प्रत्ययानां विभागः कृतः।

**अत्र जगदीशः -**

> **तस्यापत्यं तद्विशेषस्तदृक्षेण युतेन्दुमान्।**
> **कालस्तथा तेन रक्तं व्यूहोऽथ वेत्ति तत्।।**
> **अधीते वा देवताऽस्य सैवमादीन् यथायथम्।**
> **बोधयन्विविधानर्थांस्तद्धितं स्यादनेकधा।।**[४]

**अत्र समीक्षा -**

प्राक् 'विभक्त्यादि'.... इति कारिकायां, प्रकृते 'अधीते वा' इत्यादिकारिकायां च तद्धितशब्दः नपुंसकलिङ्गे कथं वा प्रयुक्तः? किञ्च अत्र 'बोधयन्' इति विशेषणं पुंसि प्रयुक्तः। अतः तद्धितः इत्येव युज्यते इति मे भाति। अत एव अग्रे 'शिवादिभ्यस्त्वणेव' इति कारिकायां एषः इति पुंसि प्रयोगः।

**३) अत्र पाणिनीयम् -**

**'तस्यापत्यम्'**[५] इति सूत्रेण अपत्यसामान्वाचकात् षष्ठीविभक्त्यन्तात् **'अण्'** प्रत्ययः उक्तः। उदा- उपगोः अपत्यं औपगवः। अणः अपवादतया अकारान्तात् अपत्यवाचकात् **'अत इञ्'**[६] इति सूत्रेण **'इञ्'** प्रत्ययः उक्तः। यथा - दक्षस्य अपत्यं दाक्षिः। एवं स्थिते **'व्यासवरुड'**[७] इत्यादि वार्तिकेन **'इञ्'** प्रत्ययः, प्रातिपदिकसय अकङ् आदेशश्च उक्तः। यथा - वैयासकिः, वारुडकिः।

**अत्र जागदीशः -**

> **अण् नाम्नोऽपत्यसामान्ये षष्ठ्यन्ताद्बाधकं विना।**
> **अदन्तादिण् निषादादेरन्त्याचोऽक् चेण्णपेक्षितः।।**[८]

**अत्र समीक्षा -**

पाणिनीयव्याकरणे प्रोक्तस्य **'इञ्'** प्रत्ययस्य स्थाने जगदीशेन **'इण्'** प्रत्ययः प्रोक्तः। एवं **'व्यासवरुड'**[९] इत्यादि वार्तिकेन **'इञ्'** प्रत्ययः, प्रातिपदिकस्य अकङ् आदेशश्च पाणिनीये प्रोक्तः। जगदीशस्तु **'इण्'** प्रत्ययं अन्त्यस्य अचः अक् आदेशञ्च प्रोक्तवान्।

४. **अत्र पाणिनीयम् -**

'**अत इञ्**'[१०] इति सूत्रस्य अपपवादतया '**शिवादिभ्योऽण्**'[११] इति सूत्रेण '**अण्**' प्रत्ययः प्रोक्तः। यथा - शिवस्य अपत्यं शैवः। एवं गर्गादिगणे पठितेभ्यः शब्देभ्यः '**गर्गादिभ्यो यञ्**'[१२] इति सूत्रेण '**यञ्**' प्रत्ययः प्रोक्तः। उदा - गर्गस्य गोत्रापत्यं गार्ग्यः। ततः '**गात्रे कुञ्जादिभ्यश्चफञ्**'[१३] इति सूत्रे कुञ्जादिगणपठितेभ्यः '**च्फञ्**' प्रत्ययः उक्तः। आदिवृद्धौ, फस्य आयन् आदेशश्च प्रवर्तते। च्फञन्तेभ्यः '**व्रातच्फञोरस्त्रियाम्**'[१४] इति सूत्रेण '**ञ्य**' प्रत्ययः उक्तः। अयं प्रत्ययः स्त्रीलिङ्गे तु न प्रवर्तते इति सूत्रार्थः। यथा - कौञ्जायन्यः।

**अत्र जगदीशः -**

**शिवादिभ्यस्त्वणेव स्यात् ण्यो गर्गादिर्गणात्तथा।**
**कुञ्जादेरायनण् ण्यश्च तस्मान्नैष स्त्रियमिति।।**[१५]

**अत्र समीक्षा -**

१. '**गर्गादिभ्यो यञ्**'[१६] इति सूत्रविहितस्य यञः स्थाने जगदीशः '**ण्य**' प्रत्ययं प्रोक्तवान्। २. एवं '**च्फञ्**' स्थाने आयनन् प्रत्ययं, ३. एवं '**ञ्य**' प्रत्ययस्य स्थाने '**ण्य**' प्रत्ययञ्च प्रदर्शितवान्।

**उपसंहारः -**

एतावता पाणिनीयप्रोक्तानां तद्धितप्रत्ययानां जगदीशप्रोक्तानाञ्च तद्धितप्रत्ययानां मध्ये बहुत्र रूपे भेदः दृश्यते। तार्किकोऽयं जगदीशः किमपि व्याकरणमवलम्ब्यैव पूर्वोक्तानां प्रत्ययानां स्वरूपं पाणिनीयापेक्षया भिन्नतया निर्दिशति। अस्मिन् प्रसङ्गे शाकटायनव्याकरणं, सारस्वतव्याकरणं च किञ्चिदिव अवलोकितवती। तत्र बहुषु सूत्रेषु जगदीशोक्ता आनुपूर्वी दृश्यते। अतः क्वचित् सः तद्व्याकरणमवलम्ब्य प्रत्ययान् स्वीचकार इति मया गृहीतम्।

अनया रीत्या पाणिनीयेन साकं शब्दशक्तिप्रकाशिकायाः अध्ययनेन उभयोः साम्यं, भेदश्च निबन्धेऽस्मिन् यथामति विज्ञापितोऽस्ति।

## सन्दर्भाः

१. अष्टाध्याय्याम् ४-१-७६ २.शब्दशक्तिप्रकाशिकायाम् ६-११०
३. अष्टाध्याय्याम् ४-१-४ ४.शब्दशक्तिप्रकाशिकायाम् ६-१११,११२
५. अष्टाध्याय्याम् ४-१-९२ ६.अष्टाध्याय्याम् ४-१-९५
७. वार्त्तिकम् २६११ ८.शब्दशक्तिप्रकाशिकायाम् ६-११३
९. वार्त्तिकम् २६११ १०. अष्टाध्याय्याम् ४-१-९५
११. अष्टाध्याय्याम् ४-४-११२ १२. अष्टाध्याय्याम् ४-१-१०५
१३. अष्टाध्याय्याम् ४-१-९८ १४. अष्टाध्याय्याम् ५-३-११३
१५. शब्दशक्तिप्रकाशिकायाम् ६-११४ १६. अष्टाध्याय्याम् ५-१-१०५

## सन्दर्भग्रन्थसूची

१. अष्टाध्यायी - महर्षि पाणिनिः, शारदाप्रभाव्याख्या सहिता, महेन्द्रसंस्कृतविश्वविद्यालयः, काठमण्डू, नेपाल, वि.सं.,२०६०

२. वार्त्तिकप्रकाशः - आनन्दप्रकाशमेधार्थी, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, वि.सं.२०५०

३. वैयाकरणसिद्धान्तकौमुदी - श्रीभट्टोजीदीक्षितः (द्वितीयो भागः), बालमनोरमा-तत्त्वबोधिनी- व्याख्यया सनाथिता, मोतीलाल बनारसीदास, दिल्ली,२००६

४. वैयाकरणसिद्धान्तकौमुदी - श्रीभट्टोजीदीक्षितः, दीपिकाख्यहिन्दी व्याख्योपेता, व्या.श्रीगोपालदत्तपाण्डेयः, चौखम्बा सुरभारतीप्रकाशन, वाराणसी,२००९

५. शब्दशक्तिप्रकाशिका - महामहोपाध्याय श्रीजगदीशतर्कालङ्कारभट्टाचार्यविरचिता, चौखम्बा संस्कृतसंस्थान, वाराणसी, वि.सं.,२०५९, with the commentaries - The Krishnakanti, Prabodhini.

□□□

# व्याकरणशास्त्रे उपग्रहविचारः

*सुधाकर महान्ति*
*(शोधच्छात्रः, शाब्दबोधविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

भगवता पाणिनिमहर्षिणा ''लः कर्मणि च भावे चाकर्मकेभ्यः''[१] इति सूत्रेण सकर्मकधातुभ्यः कर्मणि, कर्त्तरि एवम् अकर्मकधातुभ्यः भावे, कर्त्तरि च लकारान् विधाय, ''लः परस्मैपदम्''[२] इति सूत्रेण अविशेषेण लादेशानां तिबाद्यष्टादशप्रत्ययानां परस्मैपदसंज्ञा विहिता। एवं स्थिते ''तङानावात्मनेपदम्''[३] इति सूत्रेण तादिनवकस्य शानच्कानचोश्च विशेषेण आत्मनेपदसंज्ञां परिकल्प्य, ''अनुदात्तङित आत्मनेपदम्''[४], ''स्वरितञितः कर्त्रभिप्राये क्रियाफले''[५], ''शेषात् कर्त्तरि''[६] परस्मैपदमिति सूत्रैः विशेषरूपेण लकारस्थाने आत्मनेपदपरस्मैपदप्रत्ययानां विधानमकारि।

एवं स्थिते केषाञ्चिद् धातूनामात्मनेपदित्वेऽपि तत्तदुपसर्गसंबन्धेन, अर्थविशेषेण हेतुना च परस्मैपदित्वमुक्तम्। एवं केषाञ्चिद् धातूनां परस्मैपदित्वेऽपि तत्तदुपसर्गसंबन्धेन, अर्थविशेषेण हेतुना च तेषामात्मनेपदित्वं प्रोक्तम् ।

उपग्रहः नाम आत्मनेपद-परस्मैपदविधानस्य हेतुभूतार्थविशेषः भवतीति। उपोपसर्गपूर्वक ''ग्रह उपादाने'' इति धातोः ''ग्रहवृदृनिश्चिगमश्च''[७] इति सूत्रेण 'अप्' इति कृत् प्रत्यये कृते 'उपग्रह' शब्दो निष्पद्यते। कोशवचनानुसारम्[८] अस्य बहवोऽर्थाः उपलभ्यन्ते । यथा - काराबन्धनार्थे, वन्दीकरणार्थे, उपयोगार्थे, आनुकूल्यार्थे, नक्षत्राद्यर्थे च। उपग्रहशब्दः पाणिनेः पूर्वाचार्यैः स्मृत इति बहवो लिखन्ति परन्त्वयमुपग्रहः कस्मिन् ग्रन्थे उपलभ्यते, कस्मिन् अर्थे प्रयुक्त इति विषये न कुत्रापि प्रमाणं दृश्यते । निरुक्ते अपि नैव दृश्यते अस्यार्थः । वार्तिके[९],

महाभाष्ये[१०], पाठान्तरत्वेन पाणिनिसूत्रे[११], मञ्जूषायाम्[१२], भाट्टरहस्ये[१३] केषुचित् मीमांसाग्रन्थेषु च उपग्रहशब्दः तदर्थविचारश्च परिदृश्यते । पाणिनिः स्वीयव्याकरण-सूत्रेषु उपग्रहशब्दं साक्षात् न प्रयुक्तवान्, किन्तु पाठान्तरत्वेन स्वीकरोति[१४]। कैयटोद्योतादिग्रन्थेष्वप्युपग्रहपदार्थः विचारितः दृश्यते। एवं न्यायमीमांसादि-दर्शनान्तरेष्वपि, श्रुतिकल्पसूत्रादिषु उपग्रहपदार्थविचारः कृतः। एवं हि उपग्रहशब्दार्थः कः? तस्य किं स्वरूपम्? इति विषये प्राचीनार्वाचीनवैयाकरणानां मतभेदाः दरीदृश्यन्ते । एवं स्थिते पदवाक्यप्रमाणज्ञभर्तृहरिणा वाक्यपदीयग्रन्थस्य तृतीयकाण्डे उपग्रहसमुद्देशे[१५] उपग्रहपदार्थः सविस्तरं निरूपितः। तद्यथा -

**य आत्मनेपदात् भेदः क्वचिदर्थस्य गम्यते ।**
**अन्यतश्चापि लादेशान्मन्यन्ते तमुपग्रहम्।।** इति।

अर्थात् 'पचति' 'पचते' इत्यादौ च कर्तृकर्मादिसाधनगतस्य क्रियापदार्थस्य भेदः कर्त्रभिप्रायतदितरादिरूपं लक्षणं हेत्वादिरूपश्च परस्मैपदात्, आत्मनेपदात् अथवा लादेशाच्चापि गम्यते व्यज्यते प्रतीयते तं क्रियापदार्थगतं विशेषम् उपग्रहं मन्यन्ते इति कारिकार्थः ।

"तङानावात्मनेपदम्" इति सूत्रेण आत्मनेपदसंज्ञा प्राप्नोतीति भाष्यात्[१६] उपग्रहस्य आत्मनेपदसंज्ञा इत्यर्थः। कैयटवचनानुसारम् उपग्रहशब्दस्य आत्मनेपदमित्यर्थः सिद्ध्यति। अतः उपग्रहशब्दस्य आत्मनेपदमात्रमर्थ इति केषाञ्चन मतम् । उप-समीपे, कर्त्तुः फलं गृह्यते = संगृह्यते = प्रतिपाद्यते अनेन इत्युपग्रह इति व्युत्पत्तिः प्रदर्शयितुं शक्यते । अत्रार्थे "चूर्णादीन्यप्राणिषष्ठ्याः"[१७] इति सूत्रस्थले चूर्णादिन्यप्राण्युपग्रहादित्येवं सूत्रस्य पाठान्तरं दृश्यते । तत्र 'उपग्रह' इति षष्ठ्यन्तमेव पूर्वाचार्येण गृह्यते इति काशिकायाम्[१८]। तेनोपग्रहशब्दस्य षष्ठ्यन्तवाचकत्वमपि पूर्वाचार्यैः स्वीकृतम् । षष्ठ्याश्च सम्बन्धवाचकत्वात् आत्मनेपदस्य यः अर्थः स एव उपग्रहस्यापीति वक्तव्यम् ।

उपग्रहविषये स्कन्दस्वामिना उपग्रहः कर्तृगामि-परगामिरूपेण स्वीकृतः[१९]। आत्मनेपदोच्चारणे कर्त्तृगामिफलत्वं भासते । परस्मैपदोच्चारणे परगामिफलत्व-मुपादीयते।

तद्यथा - उपग्रहः कर्त्तृगामि-परगामित्वलक्षणः । स्वरिञितः इत्यात्मनेपदे उच्चारिते 'स्वर्गकामो यजेत' इति कर्त्तृगामिफलत्वं प्रतीयते । परस्मैपदे तु "यजन्ति याजका" इति परगामिफलत्वं प्रतीयते ।

हेलाराजवचनानुसारम् आत्मनेपदं परस्मैपदञ्चेत्युभयं उपग्रहशब्देन गृह्यते[२०]। यद्युपग्रहशब्दस्य उभयार्थकवाचकत्वं प्रतिपाद्यते तर्हि उप = समीपे गृह्यते इति व्युत्पत्त्या उपग्रहशब्दस्य तिङ्-प्रत्ययः अर्थः,तदा तिबादयः तत् प्रकृतयश्चोप-ग्रहवाच्या भवितुमर्हन्ति। तेषु आत्मनेपद-परस्मैपदभेदेन प्रतिपाद्योऽर्थः उपग्रहविशेषः इति वक्तुं शक्यते।

जिनेन्द्रबुद्धिमतानुसारम्[२१] उपग्रहः क्रियायाः विशेषः कर्त्रभिप्रायतदितरादि-रूपो लादेशैः परस्मैपदात्मनेपदलक्षणैश्चाभिव्यज्यते । तथाच लादेशव्यङ्ग्यः क्रियाविशेषो मुख्योपग्रहः ।

भटोजिदीक्षितेनापि लादेशव्यङ्ग्यः क्रियासाधनविशेषरूपः स्वार्थपरार्थ-त्वादिश्चोपग्रहशब्दस्य वाच्यः इत्युक्तम्[२२] । क्वचित्तु साधनमेवोपग्रह इति पूर्वाचार्यैरभ्युपगतम् । साधनं कर्म, कर्त्ता, भावश्च । तत्र कर्मरूपोपग्रहे समभिव्याहृतात्मनेपदव्यङ्ग्यः पच्यते, गम्यते इति । कर्ता समभिव्याहृतलादेश-परस्मैपदात्मनेपदव्यङ्ग्यः एधते, याति इति । भावे अकर्मकधातुप्रकृतिक-यगादिसमभिव्याहृत आत्मनेपदव्यङ्ग्य आस्यते, शय्यते इति।

क्वचिदुपग्रहः साधनविशेषणरूपो व्यक्तो दृश्यते । विशेषरूपेण व्यक्तायां वाचि यथा- "सम्प्रवदन्ते ब्राह्मणाः" इति । अस्मिन् वाक्ये उपग्रहः साधन-विशेषणमिति ।

क्वचित् क्रियाविशेषः उपग्रहः भवति । यथा गन्धनार्थे, अवक्षेपणार्थे- ‘‘गन्धनावक्षेपण.......’’[२३] इत्यादिसूत्रेण कृधातोः आत्मनेपदं विधीयते । अत्र धातुवाच्यक्रियाविशेषः आत्मनेपदेनाक्षिप्तः अनुवृत्तौ वा धातुः कर्मव्यतिहारेण विशेष्यते। कर्मव्यतिहारोऽपि क्रियाविशेषरूप आत्मनेपदव्यङ्ग्यः उपग्रह इति । कर्मव्यतिहारो नाम क्रियाविनिमयः । उक्तञ्च काशिकाकारेण - यत्रान्यसम्बन्धिनीं क्रियामन्यः करोति इतरसम्बन्धिनीं चेतरः स कर्मव्यतिहारः। परस्परकरणमपि क्वचित् क्रियाव्यतिहारः। यथा - सम्प्रहरन्ते राजानः इति । अत्र एकैव क्रिया संचारिणीव लक्ष्यते। परिणामतः क्रियाव्यतिहारोऽपि उपग्रहः स्वीक्रियते ।

क्वचित् क्रियाविशेषणमुपग्रहो भवति । पाकयागादिक्रियाः क्रियाविशेषाश्रयेण भिद्यन्ते। भृत्यः पचति, देवदत्तः पचते, राजा यजते, ऋत्विजो यजन्तीति । स च क्रियायाः विशेषः कर्त्रभिप्राय तदितरादिरूपो लादेशैः परस्मैपदात्मनेपदलक्षणैः शतृशानजादिभिश्चाभिव्यज्यते। तद्यथा जीवनोपायत्वेन पाकयागादिरनुष्ठीयमानः परस्मैपदेनाभिव्यज्यते । पचन्ति, यजन्ति इति। प्रधानं ह्यत्र लौकिकमलौकिकं वा पाकयागादिक्रियाफलं भोजनं स्वर्गादिकञ्च न कर्त्तृगामि, प्रधानाफलोद्देश्येन भोजनरूपप्रधानफलोद्देश्येन च प्रवर्त्यमाना यागादिक्रिया आत्मनेपदात् कर्त्रभिप्रायफलत्वेन प्रतीयते । भजते, पचते इति ।

क्वचित् पुनः स एव क्रियाभेदः वाक्येष्वपि सत्स्ववधार्यते इति वाक्यगम्यः। तद्यथा- स्वं यज्ञं यजति, स्वं यज्ञं यजते इति । ‘‘विभाषोपपदेन प्रतीयमाने’’[२४] इति सूत्रेण परस्मैपदात्मनेपदरूपलादेशद्वयानुशासनात् स्वमिति पदान्तरेण सह यजते यजति इत्यस्य वा संसर्गः तद्रचितवाक्यावसेयं यागक्रियायाः प्रधानफलस्य पशुपुत्रस्वर्गादेः कर्त्तृगामित्वमिति।

कैश्चित् आत्मनेपदविषये मतान्तरमुपक्षिप्तं भवति। तथा हि - यः स्वर्गौदनादिरूपमुख्यफलार्थी स तत्र यागपाकादौ अन्यान् ऋत्विक् सूपकारादिन् व्यापारयति। ऋत्विक्सूपकारादीनां भूत्या संविधानं सामग्रीसम्पादानञ्च आरभते।

ततश्च तस्य संविधातुः मुख्यफलार्थीनः स्वार्थारम्भ इति तत्रात्मनेपदं यजमानादौ कर्त्तरि । यस्तु तत्प्रयुक्तः निर्वेशमात्रफलः सः स्वामिचित्तानुवर्त्तनादेव स्वस्य कृतार्थतां मन्यते इति तस्यासौ परार्थ आरम्भ इति न भवति आत्मनेपदम् । इत्थञ्च संविधाने आत्मनेपदं तत्रैव इत्यनयोः समानो विषयः। अत एवात्र तयोः विकल्पः उच्यते हरिणा[२५]-

**केषाञ्चित् कर्त्रभिप्राये णिचा सह विकल्पते ।**
**आत्मनेपदन्येषां तदर्था प्रकृतिर्यथा ।।** इति

अस्यार्थः भवति - केषाञ्चित् संविधानमात्रं णिजर्थ इति वादिनां कर्त्तृगामिनि क्रियाफले विवक्षिते णिचा सह आत्मनेपदं विकल्पते यथा यजते, याजयति । पचते पाचयतीति । अन्योषां मते तदर्था णिच् उत्पादनार्था प्रकृतिर्यथा आत्मनेपदेन सह विकल्पते, तथा णिचा सह आत्मनेपदं विकल्पते ।

वस्तुतस्तु "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इति सूत्रप्रत्याख्यानपर-भाष्यरीत्या 'उपग्रहशब्दार्थः संविधानमिति' वक्तुं न शक्यते । अन्यथा तद्भाष्यविरोधापत्तेः। अपि च संविधानस्य ग्रहणे वैयाकरणानां सिद्धान्तस्य तथा नैयायिकादिसिद्धान्तस्य, नव्यमीमांसकादीनां च सिद्धान्तस्य विरोधापत्तिः। अतः पूर्वोक्तसंविधानमात्रं नोपग्रहशब्दार्थः। किन्त्वात्मनेपद-परस्मैपदोभयार्थक-त्वमेवोपग्रहः। अत्रैवार्थे भर्तृहरि-हेलाराजयोश्च सूत्र-वार्तिक-भाष्यकाराणां सम्मतिरिति ।

## सन्दर्भाः

१. अष्टाध्यायी ३-४-६९
२. तत्रैव १-४-९९
३. तत्रैव १-४-१००
४. तत्रैव १-३-१२
५. तत्रैव १-३-७२

६. तत्रैव १-३-७८
७. तत्रैव ३-३-५८
८. वाचस्पत्यम्, Vol. II पृ.१२०२; अमरकोशः, पृ.३०२
९. अष्टाध्यायी ३-२-१२७
१०. तत्रैव ३-२-१२७
११. तत्रैव ६-२-१३४
१२. लघुमञ्जूषा, पृ.९२७-९४२
१३. प्र.भा., पृ.१०९
१४. अष्टाध्यायी ६-२-१३४ "चूर्णादीन्यप्राणिषष्ठ्याः" इति सूत्रस्थले "चूर्णादीन्यप्राण्युपग्रहात्" इति पाठान्तरं वर्तते।
१५. वाक्यपदीयम्, तृ.का, श्लो.१
१६. महाभाष्यम् ३.२.१२७, सूत्रव्याख्यानभाष्ये, पृ.२७६
१७. अष्टाध्यायी ६-२-१३४
१८. काशिकावृत्तिः ६.२.१३४, सूत्रव्याख्याने, पृ.१२२
१९. स्कन्दस्वामिभाष्यम्, पृ.९
२०. वाक्यपदीयम्, तृ.का.श्लो.१२.१
२१. काशिकावृत्तिः १.८५
२२. सिद्धान्तकौमुदी, पृ.८६९
२३. अष्टाध्यायी १-३-३२
२४. तत्रैव १-३-७७
२५. वाक्यपदीयम्, तृ.का., श्लो.१२

## सन्दर्भग्रन्थाः

१. अष्टाध्यायी । २. महाभाष्यम् । ३. काशिकावृत्तिः ।
४. वाक्यपदीयम् । ५. भाट्टरहस्यम् । ६. वैयाकरणलघुमञ्जूषा ।
७. वैयाकरणसिद्धान्तकौमुदी ।

□□□

# महाभारतस्थ वनपर्वणः कारकप्रयोगवैशिष्ट्यानि

*कु. अवन्तिका किशोर देशमुख*
*(शोधछात्रा, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

'नरत्वं दुर्लभं लोके' इति वचनं भाषाचिन्तनविषये नरस्य श्रेष्ठत्वं गमयति। मानवानां सर्वेऽपि व्यवहाराः भाषया एव सम्पद्यन्ते। सार्थकः व्यवहारः भाषाज्ञानेन विना न सम्भवति। तस्मात् भाषामूलकः लौकिकव्यवहारः। अतः भाषा सर्वत्र मुख्यं स्थानं भजते। संस्कृतभाषायां सर्वाणि शास्त्राणि शब्दशास्त्रमूलकानि। परं साधुशब्दज्ञानं व्याकरणमन्तरेण अशक्यम्। 'व्याक्रियन्ते विविच्यन्ते प्रकृतिप्रत्ययादयो यत्र तद् - व्याकरणम्' इति व्युत्पत्तिमाश्रित्य व्याकरणं शब्दशास्त्रं नाम। साधुशब्दज्ञापनमेव अस्य मुख्यं प्रयोजनम्। यथोक्तं भर्तृहरिणा -

"**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।**" (वाक्यपदीयम् १.१४३)

भारतीयसंप्रदायस्य मूलभूताः श्रुतिस्मृतिपुराणेतिहासादयः। तत्र वेदवाङ्मयम् अपौरुषेयम् अत्यन्तं प्राचीनञ्च भवति। ऋग्यजुस्सामाथर्वनामभिः चत्वारः वेदभागाः लोके प्रथिताः। एतेषां चतुर्णां वेदानाम् अर्थावगमाय स्वराद्यवबोधाय साधुविनियोगज्ञानाय वेदाङ्गानाम् अस्ति महत्यावश्यकता। इमानि च वेदाङ्गानि षट्। तत्रापि 'मुखं व्याकरणं स्मृतम्' इति उद्घोषयता शिक्षाकारेण षडङ्गेषु व्याकरणस्य मुख्यत्वं प्रतिपाद्यते। महाभाष्येऽपि कथितं[१] 'प्रधानं च षडङ्गेषु व्याकरणम्' इति। इत्थं व्याकरणशास्त्रमिदं वेदाङ्गेषु मुखरूपेण स्वीक्रियते। शब्दाधीनञ्च जगत्, शब्दश्च मुखेनोच्चारणीयः अतः तत्साधनरूपेण व्याकरणमपि वेदपुरुषस्य मुखमस्ति।

यथा शरीरावयेषु मुखस्योत्कृष्टत्वं न केनाप्याक्षिप्यते, तथैव भाषातत्त्वविवेचने तथा च शब्दब्रह्मस्वरूपप्रकाशने च व्याकरणस्य सर्वशास्त्रेषु सर्वोत्कृष्टत्वं न केनापि व्याक्षेप्तुं शक्यते। भगवता भर्तृहरिणापि उक्तम् - "**पवित्रं सर्वविद्यानामधिविद्यं**

**प्रकाशते**"।[२] इति। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' इत्याभाणकानुसारं प्रयोजनेन विना मानवः कस्मिन्नपि कार्ये निमग्नो न भवति। अत एव पतञ्जल्याचार्यैः[३] 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति प्रतिपादितम्। वेदानां रक्षकत्वान्, वेदार्थावबोधने सहायकत्वात् 'व्याकरणम्' नितान्तमेव महत् श्रेष्ठञ्च वर्तते। वेदाङ्गेषु प्रधानमिदं शास्त्रं योऽधीते स एवेतराणि शास्त्राण्यधिगन्तुं पारयति। तद्यथा -

**यो वेद वेदवदनं सदनं हि सम्यक्**
**ब्राह्म्या स वेदमपि वेद किमन्यशास्त्रम्।**
**यस्मादतः प्रथममेतदधीत्य धामान्**
**शास्त्रान्तरेषु भवति श्रवणेऽधिकारी।।**[४]

न हि व्याकरणशास्त्रस्य काश्चित्सीमाऽस्ति। शास्त्रान्तरेषु अपि व्याकरणस्य महती उपयोगिता विद्यते एव। अत कथ्यते 'काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम्' इति। वाचः संस्कारकं व्याकरणम्। व्याकरणेन विना भाषा दुर्बोधा भवति। अत एवोक्तम् आचार्यदण्डिना -

**इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।**
**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।** इति।[५]

तथैव ध्वन्यालोके आनन्दवर्धनेनापि उक्तम् - 'प्रथमे हि विद्वांसो वैयाकरणाः' इति अपि च काव्यमीमांसायां कथितं राजशेखरेण -

**तेषां च सामग्र्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ।।** इति।[६]

आलङ्कारिकाः व्याकरणविरुद्धप्रयोगेषु 'च्युतसंस्कृति' रूपं दोषं प्रदर्शयन्ति।[७]

'शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति'[८] इति वचनेन ज्ञायते यद् व्याकरणशास्त्रस्य परमप्रयोजनं मोक्ष एव।

अत एव साधूच्यते-

**उपासनीयं यत्नेन शास्त्रं व्याकरणं महत्।**
**प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम्।।**[९] इति।

**महाभारतमहत्त्वम् -**

अपारे संस्कृतवाङ्मयेऽस्ति महाभारतस्यानुपमं वैशिष्ट्यम्। महर्षिणा वेदव्यासेन प्रणीतस्य पौरुषेयस्य महाभारतस्य पञ्चमवेदत्वं प्रसिद्धम्। "इतिहासपुराणः पञ्चमो वेदानां वेदः" इति हि श्रुतिवचनम्। विना महाभारतं वेदतात्पर्यावधारणं दुश्शकमिति सूचयतीदमन्यत् वेदवचनम् "इतिहासपुराणेभ्यो वेदं समुपबृंहयेत्" इति। "रामायणम्" इव महाभारतमपि न केवलं महाकाव्यम्; अपि तु अस्माकं राष्ट्रियः इतिहासः। समग्रस्यापि संस्कृतवाङ्मयस्य साररूपेण व्यासमहर्षेः कृतिरियं स्वीक्रियते। रामायणप्रणेता महर्षिवाल्मीकिरिव महाभारतप्रणेता श्रीवेदव्यासोऽपि संस्कृतकव्युपजीव्यत्वेन मतः। अत एवोच्यते -

**व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्।**
**पराशरात्मजं वन्दे शुकतातं तपोनिधिम्।।**इति।

पञ्चमवेदत्वेन प्रथितस्य महाभारतस्य वेदतत्त्वबोधकत्वं व्यासैः प्रतिपादितम्। भगवता व्यासेन वेदानुक्तार्थभूषितत्वेन महाभारतस्य वेदादप्युत्तमत्वं स्वयमेव पौनःपुन्येन प्रोक्तम्। यथोक्तं स्कन्दपुराणे-

**भारतं चापि कृतवान् पञ्चमं वेदमुत्तमम्।**
**दशावरार्थं सर्वत्र केवलं विष्णुबोधकम्।।**
**परोक्षार्थं तु सर्वत्र वेदादप्युत्तमं तु यत्।।** इति।

महाभारतमिति नामैव तस्य महत्त्वं, भारवत्त्वं कथयतीत्ययमपरो विशेषः।

**महत्त्वात् भारवत्त्वाच्च महाभारतमुच्यते।** इति।[१०]

अखण्डपरिश्रमे आत्मानं नियोज्य महर्षिणा व्यासेन ग्रन्थोऽयं निर्मितः इत्येतत् आदिपर्वस्थितश्लोकेन प्रकाश्यते -

**त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः।**
**महाभारतमाख्यानं कृतवानिदमुत्तमम्।।** इति।[११]

अद्य महाभारतं यद् स्वरूपं बिभर्ति; तत्र शतसहस्रसङ्ख्याकाः श्लोकाः विराजन्ते। अतः इदानीमिदं "शतसाहस्री संहिता" इत्येतेन नाम्ना प्रसिद्धम्। अष्टादशपर्वसु

आदि-सभा-वन-विराट-उद्योग-भीष्म-द्रोण-कर्ण-शल्य-सौप्तिक-स्त्री -शान्ति-अनुशासन-अश्वमेध-मौसल-आश्रमवासिक-महाप्रस्थान-स्वर्गारोहणक्रमेण ग्रन्थराजोऽयं विभक्तः। शताधिक-उपपर्वसु तथा च पञ्चशतोपाख्यानेषु लौकिकालौकिकविषयाणां चिन्तनं प्रतिबिम्बितम्। महाभारतस्य पाठसम्प्रदायः प्राधान्येन द्विविधो विलोक्यते। तयोरेकतर उत्तरभारते इतरश्च दक्षिणभारते प्रचलति।

महाभारते विशिष्टाः व्याकरणप्रयोगाः समुपलभ्यन्ते। तेषाम् अध्ययनस्य लघुप्रयत्नः अयम्।

**कारकप्रयोगवैशिष्ट्यानि -**

१. **वर्धमानपुरद्वारादभिनिष्क्रम्य पाण्डवाः।**
**उदङ्मुखाः शस्त्रभृतः प्रययुः सह कृष्णया।।** १० (१) - वनपर्वणि

अत्र "कृष्णया" इति तृतीया। "सह" इत्येतस्य प्रयोगात्। "सहयुक्तेऽप्रधाने" (२-३-१९) इति पाणिनीय सूत्रेण सहार्थकशब्दानां योगे अप्रधानस्य तृतीयाविभक्तिः। अत्र पाण्डवानां गमनक्रियायां प्राधान्यम्। कृष्णायाः तु अप्राधान्यमेव। अतः अत्र तृतीयान्तम्।

२. **भुक्तवत्सु च विप्रेषु भोजयित्वानुजानापि।**
**शेषं विघससंज्ञं तु पश्चात् भुङ्क्ते युधिष्ठिरः।।** ८३ (४)

श्लोकेऽस्मिन् विप्रानुजादीनां भोजनानन्तरं युधिष्ठिरस्य भोजनक्रिया लक्षिता। अतः "यस्य च भावेन भावलक्षणम्" (२-३-३७) इति सूत्रेण "भुक्तवत्सु" "विप्रेषु" इत्यत्र सप्तमी विभक्तिः।

३. **भीष्माद् द्रोणात् कृपात् कर्णात् द्रोणपुत्राच्च भारत।**
**दुर्योधनान्नृपसुतात् तथा दुःशासनादपि।।२५।।**
**यत् ते भयममित्रघ्न हृदि सम्परिवर्तते।**
**तत् तेऽहं नाशयिष्यामि विधिदृष्टेन कर्मणा।।२६।।**

अत्र "भीष्मद्रोणकृपकर्णद्रोणपुत्र-दुर्योधननृपसुतदुःशासन" इत्येषां सर्वेषां

भयहेतुत्वात् "भीत्रार्थानां भयहेतुः" (१-४-२५) इति अपादानसंज्ञा। "अपादाने पञ्चमी" (२-३-२८) इति पञ्चमी विभक्तिः।

४. **नमो धात्रे विधात्रे च यौ मोहं चक्रतुस्तव।**
**पितृपैतामहे वृत्ते वोढव्ये तेऽन्यथा मतिः।।१।।** (३०)

श्लोकेऽस्मिन् "धात-विधातृ"शब्दयोः "नमः"शब्देन सह संयोगत्वात् "नमः स्वस्तिस्वाहास्वधाऽलंवषट्योगाच्च" (२-३-१६) इति चतुर्थी विभक्तिः।

५. **तद् यथा सुरभिः प्राह समवेतास्तु ते तया।**
**सुतेषु राजन् सर्वेषु हीनेष्वधिका कृपा।।९।।**

यत्र जातिगुणाक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणं वा भवति, तत्र सप्तमीविभक्तिः। "यतश्च निर्धारणम्" (२-३-४१) इति सूत्रेण सप्तमी विधीयते। अत्र गुणेन निर्धारणम्, अतः "हीनेषु","सुतेषु","सर्वेषु", इत्यत्र सप्तमी विभक्तिः।

६. **न क्रोधो न च मात्सर्यं नानृतं मधुसूदन।**
**त्वयि तिष्ठति दाशार्ह न नृशंस्यं कृतोऽनृजु।।३५।।**

मधुसूदनस्य "युष्मद्" - रूपकर्तृगतां सत्ताक्रियां प्रति कृतस्न्व्याप्तित्वात्, सर्वाधारत्वाच्च "आधारोऽधिकरणम्" (१-४-४५) इति अधिकरणत्वम्। तस्मात् "सप्तम्यधिकरणे च" (२-३-३६) इति "त्वयि" इति सप्तमी। कृत्स्नव्याप्तित्वात् अभिव्यापक - आधारः।

७. **ततः स विध्दः साम्बेन क्षेमवृद्धिश्च भूपतिः।**
**अपायाज्जवनैरश्वैः साम्बबाणप्रपीडितः।।६४।।**

"साम्बेन" "जवनैरश्वैः" इत्युभयत्र "कर्तृकरणयोस्तृतीया" इति (२-३-१८) तृतीया। अत्र क्रियायां प्राधान्यत्वात् "साम्ब" इत्यस्य "स्वतन्त्रः कर्ता" (१-४-५४) इति कर्तृसंज्ञा। तथा च "जवनाश्वयोः" इत्यत्र क्रियायां प्रकृष्टोपकारकत्वात् "साधकतमं करणम्" इति करणसंज्ञा।

८. **एतद् ब्रह्मा ददौ पूर्वं शक्राय सुमहात्मने।**
**शक्राच्च नारदः प्राप्तो धौम्यस्तु तदनन्तरम्।। ७८।।**

"शक्र" इत्यस्य प्रकर्षरूपेण अभिमुखत्वात् "कर्मणा यमभिप्रैति स सम्प्रदानम्" (१-४-३२) इति सम्प्रदानसंज्ञा। यथोच्यते - "सम्यक् प्रदीयते अस्मै स-सम्प्रदानम्" इति। दानक्रियायाः कर्मेण यद् लक्ष्यते, तदेव सम्प्रदानम्। तेनैव "चतुर्थी सम्प्रदाने" (२-३-१३) इति चतुर्थी।

९. **अश्वमेधस्य यत् पुण्यं तन्मासेनाधिगच्छति।**
**सर्वतीर्थवरे चैव यो वसेत महाह्रदे।। १४४।।** वनपर्वणि

श्लोकेऽस्मिन् "मासेन अधिगच्छति" इति प्रयोगः। अत्र "मासेन" इत्यत्र "अपवर्गे तृतीया" इति सूत्रेण (२-३-६) तृतीया। अपवर्गः - फलप्राप्तिः; पुण्यमेव अत्र फलम्। पुण्यरूपिणी फलप्राप्तिः, तस्य पुण्यस्य "मासेन" - कालेन अत्यन्तसंयोगः। अतः अत्र तृतीया।

१०. **आचक्ष्व न हि मे ब्रह्मन् रोचते तमृतेऽर्जुनम्।**
**वनेऽस्मिन् काम्यके वासो गच्छामोऽन्यां दिशं प्रति।।२१।।**

"न हि मे रोचते" इत्यत्र द्धरुच्यार्थानां प्रीयमाणः" (१-४-३३) इति सूत्रेण "मे" इति चतुर्थी। "तेमयावेकवचनस्य" (८-१-२२) इति सूत्रेण "मे" उ "अस्मद्" इत्यस्य चतुर्थी एकवचनस्य वैकल्पिकरूपम्।

११. **स भवान् कथयत्वद्य यथा रामेण निर्जिताः।**
**आहवे क्षत्रियाः सर्वे कथं केन च हेतुना।।८।।**

श्लोकेऽस्मिन् "केन च हेतुना" इति प्रयोगः। "किम्" इति सर्वनामस्य प्रयोगात्, हेतुशब्दस्य प्रयोगाच्च। "सर्वनाम्नस्तृतीया च" (२-३-२७) इति सूत्रेण अत्र तृतीयाविभक्तिः।

१२. **आनर्तमेवाभिमुखाः शिवेन**
**गत्वा धनुर्वेदरतिप्रधानाः।**
**तवात्मजा वृष्णिपुरं प्रविश्य**
**न दैवतेभ्यः स्पृहयन्ति कृष्णे।।२६।।**(१८३)

श्लोकेऽस्मिन् "दैवतेभ्यः स्पृह्यन्ति" इति प्रयोगः। "स्पृहेरीप्सितः" (१-४-३६) इति सूत्रेण "स्पृह्" धातोः प्रयोगत्वात् ईप्सितस्य "दैवत" शब्दस्य सम्प्रदानसंज्ञा। सम्प्रदानत्वात् "चतुर्थी सम्प्रदाने" (२-३-१३) इति चतुर्थी।

१३. **तमहं प्राञ्जलिर्भूत्वा नमस्कृत्येदमब्रुवम्।**
**ज्ञातुमिच्छामि देव त्वां मायां चैतां तवोत्तमाम्।।१३५।।** (१८८)

वस्तुतः "तम्" इत्यत्र "नमः स्वस्तिस्वाहास्वधाऽलंवषट्योगाच्च" (२-३-१६) इति चतुर्थी भवितुमर्हति। परं "उपपदविभक्तेः कारकविभक्तिः बलीयसी" इति वार्तिकानुसारेण द्वितीया। नमस्कारक्रियारूपी फलस्याश्रयत्वात् द्वितीया एव साधु।

१४. **तस्मात् स्नेहं न लिप्सेत मित्रेभ्यो धनसञ्चयात्।**
**स्वशरीरसमुत्थं च ज्ञानेन विनिवर्तयेत्।। ३२ ।।** (२)

मित्रेभ्यो - इत्यत्र "ल्यब्लोपे कर्मण्यधिकरणे च" इति वार्तिकाधारेण पञ्चमी। "मित्राणि प्राप्य" इत्यत्र ल्यप् प्रत्ययः। "मित्राणि" इत्यत्र कर्मत्वम्। ल्यब्लोपत्वात् "मित्रेभ्यो" इति पञ्चमी।

१५. **वयं पुनः सप्तदशेषु कृष्णे**
**कुलेषु सर्वेऽनवमेषु जाताः।**
**षड्भ्यो गुणेभ्योऽधिका विहीनान्**
**मन्यामहे द्रौपदि पाण्डुपुत्रान्।।११।।**(२६८)

"षड्भ्यो गुणेभ्यो" इत्यत्र "ल्यब्लोपे कर्मण्यधिकरणे च" इति वार्तिकानुसारेण पञ्चमी। "षड्गुणान् प्राप्य" पाण्डवेभ्योऽधिकाः। ते च शौर्यतेजोधृतिर्दाक्षिण्यदानैश्वर्याणि उक्ताः। एवं महाभारते बहवः कारकविशेषाः समुपलभ्यन्ते।

भगवता वेदव्यासेन अज्ञानान्धकारविनाशाय, ज्ञानसूर्यप्रकाशनाय लोकनयनोन्मीलनाय च ग्रन्थराजोऽयं सृष्टः। वेदचतुष्टय्यां द्विजानामेव विशिष्टा गतिः, धर्मत्वेनाभिरुचिश्च, परं महाभारते समेषामपि वर्णानां सामान्याभिरुचिः प्रीतिर्गतिश्च। एवं विशिष्टतमोऽयं ग्रन्थः अतिप्राचीनकाले संवृत्तस्येतिहासस्य कथननिमित्तेन इतिहासः, परमगहनानाम् आध्यात्मिकतत्त्वानां निरूपणेन शास्त्रमिति च यथा समाद्रियते तथा

सहृदयहृदयाह्लादकस्य काव्यात्मभूतस्य रसविशेषस्य ध्वननेन काव्यरसिकैः साहित्यिकैः स्तूयते।

अत एव स्वस्य महत्त्वद्योतकान् सर्वानपीन् अंशान् हृदि कृत्वैव स्वयं महाभारतेनैवासाधारणं स्ववैशिष्ट्यम् एकेनानेन वाक्येन उदघोषि यथा[११] "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"। इति।

## सन्दर्भाः

१. महाभाष्यम् आ -१
२. वाक्यपदीयम् - ब्रह्मकाण्डम् - (१४)
३. महाभाष्यम् - १ - आह्निकम्
४. सुभाषितरत्नभाण्डागारः
५. काव्यादर्शः - १.३४
६. काव्यमीमांसा - षष्ठोऽध्यायः
७. काव्यप्रकाशः - प्रथमोल्लासः
८. ऋषिकल्पन्यासः - व्याकरणम्।
९. ऋषिकल्पविन्यासः - व्याकरणम्।
१०. महाभारतम् - आदिपर्व (१.२७४)
११. महाभारतम् - आदिपर्व. ५६.३२
१२. महाभारतम् - (आदिपर्व ६३-५३)

## अनुशीलितग्रन्थसूची


१. **भारतदीपः,** नीलकण्ठदीक्षितविरचितः, नागप्रकाशन, देहली, १९८८
२. **महाभारतम्** (मूलम्) - द्वितीयखण्डः, साहित्याचार्यः पण्डित रामनारायणदत्तशास्त्री पाण्डेयः, गीताप्रेस, गोरखपुर, २००६
३. **महाभाष्यम्** - मधुसूदनप्रसाद मिश्र, चौखम्बाविद्याभवन, वारणसी, २००३
४. **लघुसिद्धान्तकौमुदी**, गोविन्दप्रसाद शर्मा, चौखम्बाप्रकाशन, वाराणसी
५. **वाक्यपदीयम्** - शिवशङ्कर अवस्थी, चौखम्बाविद्याभवन, वारणसी, २००१
६. **सिद्धान्तकौमुदी,** गोपालदत्त पाण्डेय, चौखम्बासुरभारतीप्रकाशन, वारणसी, २००३


□□□

# वर्णसमाम्नायोपदेशविमर्शः

*जयप्रकाश साहु*
*(शोधच्छात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

महामुनिपाणिनिविरचितेऽष्टाध्यायीग्रन्थे वर्णसमाम्नायस्य पाठः चतुर्दशसूत्रक्रमेण प्राप्यते। स एव चतुर्दशसूत्रक्रमो वैयाकरणसिद्धान्तकौमुदीकारेण महावैयाकरणेन श्रीभट्टोजिदीक्षितेनाविकलरूपेण प्रस्तुतः। एतेषां चतुर्दशसूत्राणां विषये नन्दिकेश्वरकृत**काशिकायां** प्रोक्तम् -

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम्।**
**उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम्।** इति।[१]

एतेन एतेषां सूत्राणां माहेश्वरसूत्रत्वं ध्वन्यते।

**श्रीभट्टोजिदीक्षितेनापि एतेषां सूत्राणां माहेश्वरत्वं प्रतिपादितम्।**[२]

प्रसङ्गेऽस्मिन् वैयाकरणसिद्धान्तकौमुदीव्याख्याने **लघुशब्देन्दुशेखरे** प्रोक्तं यद् एतानि चतुदर्श सूत्राणि क्रमबोधकानि सन्ति। क्रमपदेनात्र वर्णविषयकः क्रमो विवक्षितः। अर्थाद् येन क्रमेण वर्णसमाम्नाये वर्णा उपदिष्टाः सन्ति तेनैव क्रमेण तत्-तत्-प्रत्याहारेषु तेषां वर्णानां ग्रहणं कर्त्तव्यम्। एषैव एतेषां सूत्राणां क्रमबोधकता। यद्येषा क्रमबोधकता न स्यात् तदा तु इण् प्रत्याहारे उकारस्य स्थाने अकारस्यापि ग्रहणं प्रतिपद्येत। इत्थम् एतानि सूत्राणि क्रमबोधकानि सन्ति किन्तु एतेषां क्रमविषयिण्युपयोगिता प्रत्याहारं विनाऽसंभाविनी। प्रत्याहारविधायकसूत्रं तावत् 'आदिरन्त्येन सहेता'[३] वर्तते। एतेषां चतुर्दशसूत्राणां एकवाक्यतानेन प्रत्याहारविधायकसूत्रेण भवति। एकवाक्यतानन्तरमेव प्रत्याहारसूत्रेण अणप्रत्याहारे सिद्धे सति अणपदे अकारादि-णान्तसमुदायनिरूपितशक्तिरिति बोधो भवति। इत्थम्

'आदिरन्त्येन सहेता' इति सूत्रेण संयुज्य एतानि चतुर्दश सूत्राणि प्रत्याहारसूत्रवृत्ति-परिच्छेदकशक्तिनियामकानि भवन्ति। **शक्तेर्नियामकत्वादेव** एतानि संज्ञासूत्रत्वेन गृह्यन्ते। वस्तुत: शक्तिनियमनमेव संज्ञासूत्राणां कार्यम्। यथा- वृद्धिसंज्ञां विधाय भगवता पाणिनिना वृद्धिपदे आदैचनिरूपिता शक्ति: सुस्पष्टं प्रतिपादिता। इत्थमेव अणादिप्रत्याहारविषयेऽपि वर्णक्रमसमुदायनिरूपितशक्ति: तत्तत्प्रत्याहारेषु गृह्यते।

'आदिरन्त्येने'ति सूत्रेण सिद्धेषु प्रत्याहारेषु क्रमबोधकताज्ञानं 'अइउण्'-इत्यादि चतुर्दशसूत्राधीनं इति तदैव संगतं यदा 'आदिरन्त्येन सहेता' इति सूत्रेण 'अण्'-'अच्'-इत्यादिप्रत्याहाराणां सिद्धिर्भवेत्। सूत्रेणानेन प्रत्याहारसिद्ध्यर्थम् अन्त्येत्वर्णसहितादिर्वर्णोऽपेक्षितो भवति किन्तु अन्त्येनेता सहादिवर्णो न मिलति। यदा अच् प्रत्याहारसिद्ध्यर्थम् अन्त्येत्पदेन 'ऐ औच्' इति सूत्रस्य चकारो गृह्यते तदा तेन सहादिवर्ण: अकारो नास्ति। अकारस्तु 'अइउण्' सूत्रे पठितो वर्तते। इत्थं वयं पश्याम: यद् अन्त्येत्वर्णानाम् आदिवर्णानां मध्ये अनेकेषां सूत्राणां व्यवधानत्वात् अन्त्येतादिवर्णसाहित्यं नैव दृश्यते। 'इको यणचि'[४] इतिसूत्रे तु यत्र द्वयो: साहित्यं अच्पदेन प्रदर्श्य सप्तमीविभक्तेरेकवचनत्वं प्रदर्शितं तत्र अकारचकारयो: साहित्ये सत्यपि चकारस्य इत्संज्ञात्वं नास्ति। यतो हि इत्संज्ञा तु 'ऐ औच्' सूत्रनिष्ठस्य चकारस्य भवति।

आदिपदस्य आदिसदृशे, अन्त्यपदस्य अन्त्यसदृशे पदे लक्षणां विधाय 'आदिरन्त्येन सहेता' सूत्रार्थस्तावदित्थं क्रियते-'अन्त्येत्सदृश-सहितो य आदिसदृशस्तद्घटितं पदं स्वविशिष्टानां संज्ञा भवति' इति। अत्र वैशिष्ट्यञ्च ह्व 'स्वघटकवर्णनिष्ठानुयोगितानिरूपक सादृश्यप्रतियोगित्वेन विवक्षितवर्णनिष्ठा-द्यवयवतानिरूपकसमुदायघटकत्वस्वघटकवर्णनिष्ठानुयोगितानिरूपकसादृश्य-प्रतियोगित्वेन विवक्षितवर्णनिष्ठान्त्यावयवतानिरूपकसमुदायघटकत्वे' त्युभयसम्बन्धेन।

परिष्कारसमन्वयस्त्वित्थम् - अन्त्येत् 'ऐऔच्' सूत्रस्य चकार:, तत्सदृश: 'इको यणचि' इति सूत्रे 'अच्' इत्यत्र चकार:, तत्सहित: आदिसदृश:, आदिशब्देन -'अइउण्' सूत्रस्य अकार:, तत्सदृश: 'अच्' इत्यस्य अकारोऽस्ति।

एतद्द्वयघटितं पदं 'अच्' अस्ति। एतत् अच्पदं स्वघटकवर्णेऽकारे विद्यमानायाः सादृश्यप्रयुक्तानुयोगितायाः निरूपकं यत् सादृश्यं तत्सादृश्यप्रतियोगितायाः आश्रयत्वेन अर्थात् प्रतियोगित्वेन विवक्षितो वर्णः 'अइउण्' सूत्रस्य अकारो भवति। अकारोऽयम् आद्यवयवो यस्य समुदायस्य तथा स्व=अच् पदं स्वघटकवर्ण-(चकार)निष्ठानुयोगितानिरूपकसादृश्यप्रतियागित्वेन विवक्षितो वर्णः 'ऐऔच्' इत्यस्य चकारोऽन्त्यावयवो यस्य स समुदायोऽस्ति 'अइउण्' इत्यत 'ऐऔच्' पर्यन्तम्। समुदायस्यास्य घटकवर्णाः सन्ति अकारादारभ्य चकारपर्यन्तं वर्णाः। एते वर्णाः स्वविशिष्टाः सन्ति। एतेषां स्वविशिष्टवर्णानां बोधक 'इको यणचि' इति सूत्रस्य अच्' पदं भवति। इत्थमेवान्यप्रत्याहाराणां विषयेऽपि प्रपञ्चः।

पर्यालोचनेन स्पष्टं भवति यद् 'अइउण्' इत्यादि चतुर्दशसूत्रैः सह एकवाक्यतां विना 'आदिरन्त्येन सहेता' इति सूत्रस्य सफलतया वाक्यार्थो नैव सम्भाव्यते। एषा एकवाक्यता उपजीव्योपजीवकभावापन्नबोधप्रयोजकत्वाद्वाक्यैकवाक्यतास्ति। अत्र 'अइउण्' इत्यादीनि चतुर्दश सूत्राणि उपजीव्यानि सन्ति, 'आदिरन्त्येन सहेता' इति सूत्रं तावद् उपजीवकम्, एतत्सर्वं मनसि निधाय श्रीनागेशभट्टः प्राह- **'एकवाक्यताचादिरकारादिरन्त्येनेता तत्सदृशेनणकारादिना सहोच्चार्यमाण आद्यन्ताक्षिप्तानां सञ्ज्ञे'ति**[५]**।**

अत्र शङ्केयमुदेति यद् 'अइउण्' इत्यादिसूत्रेषु गुणादिसन्धिकार्यं कथन्न भवति? एतेषु सूत्रेषु संहितायाः अविवक्षावशात् सन्धिकार्यमत्र न भवति। सन्धिप्रकरणे संहिताधिकारः प्रवर्तते न त्वत्र। इह संहिताभावान्न सन्धिकार्यम्।

अत्र विषये केचिद्वदन्ति 'उपसर्गविभक्तिस्वरप्रतिरूपकाश्च' इति सूत्रेण 'अ इ उ' इत्यादि स्वरवर्णानां निपातसंज्ञा भवति। अत एव 'निपात एकाजनाङ्'[६] इति सूत्रेण प्रगृह्य संज्ञायां सत्यां 'प्लुतप्रगृह्या अचि नित्यम्'[७] इति सूत्रेण प्रकृतिभावे कृते न भवति गुणदिसन्धिकार्यम्।[८]

पुनश्च शङ्का भवति यद् अकारादेः प्रत्येकस्माद् वर्णात् सुब्विभक्तिः कथं नोत्पद्यते। ग्रन्थकारोऽत्र समादधाति यत् 'अइउण्' इत्यादिसूत्रेषु वर्णिता अकारादयो

वर्णास्ते प्रयोगानुकरणस्वरूपा:। यतो हि अनुकरणाद् अनुकार्यबोधो भवति। एतद्बोधलाभाय अनुकरणानुकार्ययोरभेद:, भेदश्चेति पक्षद्वयं स्वीकृतम्। अभेदपक्षस्यायमाशय: अनुकरणम् अनुकार्यादभिन्नं तत्सदृशमित्यर्थ:। अभेदपक्षे तावत् अनुकरणेऽनुकार्यस्य या समानानुपूर्विता तन्मूलकाभेदाध्यवसाय: अनुकार्येऽनुकरणे च भवति।

भेदविवक्षापक्षे अनुकरणादनुकार्यबोध: कथं स्यात्? इति जिज्ञासायां समाधीयते यद् अनुकरणाद् अनुकार्यबोधे सति अनुकार्यनिरूपितबोधजनकत्व-शक्तेरनुकरणे समारोप: क्रियते। इत्थं भेदविवक्षापक्षे अनुकरणादनुकार्यबोध: समारोपितशक्तिजन्योपस्थित्या भवति।

अत्र खलु प्रश्नोऽयं भवति यद् यदा अनुकरणशक्त्यानुकार्यबोधस्तदा 'शक्तिमत्त्वमर्थवत्त्वम्' इति 'अर्थवत्त्व'लक्षणम् अनुकरणेऽतिक्रान्तम्। एवं सति प्रातिपदिकसंज्ञां विधाय तस्मात् कथन्न सुबाद्युत्पत्ति:? समाधीयते यत् पक्षेऽस्मिन् प्रातिपदिकसंज्ञां विधाय अकारादिप्रत्येकवर्णतो विभक्तिसम्पादनेऽपि न दोष:, चादिगणपठितत्वात् तेषामव्ययत्वम्। फलतो भेदविवक्षापक्षे अनुकरणाद् विभक्तिलोपोऽत्र 'अव्ययादाप्सुप:'[९] इति सूत्रेण जायते। वस्तुतस्तु भेदविवक्षापक्षस्तु नोचित:। यतो हि अकारादिस्वरवर्णानां चादिगणपाठाद्विभक्तिलोप: किन्तु हकारादिव्यञ्जनानां तु नास्ति तत्र पाठ:, एतेभ्यो व्यञ्जनवर्णेभ्य: समागतविभक्ते-र्लोपोऽसम्भव:। अत एव श्रीनागेशभट्टेन प्रोक्तम्-'अनुकरणत्वेन सौत्रत्वाच्च वर्णेभ्यो न विभक्त्युत्पत्ति:' इति[१०]।

सौत्रत्वाच्चेति पदे चकारो हेत्वर्थक:। अनुकरणत्वेन अर्थात् अभेदानुकरणेन। अयमाशय: यत: सौत्रत्वम् अत: अभेदानुकरणत्वम्, तस्मात् न विभक्त्युत्पत्ति:।

सारांशोऽयमस्ति यद् 'अइउण्' इत्यादीनां सूत्रत्वादत्र अनुकार्यानुकरण-योरभेदविवक्षापक्ष: स्वीक्रियते। अत एव अकारादिवर्णेभ्य: सुबाद्युत्पत्तिर्न भवति।

## सन्दर्भाः

१. नन्दिकेश्वरकृतकाशिका, कारिका १, पृ.१
२. इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि। - वैयाकरणसिद्धान्तकौमुदी, टीकात्रयोपेता, पृ. ३
३. अष्टाध्यायी, १.१.७१
४. अष्टाध्यायी, ६.१.७४
५. लघुशब्देन्दुशेखरे,षट्टीकोपेते, पृ. ११
६. अष्टाध्यायी, १.१.१४
७. अष्टाध्यायी, ६.१.१२५
८. 'विभक्तिस्वरप्रतिरूपकाश्च' इत्यनेन निपातत्वात्, 'निपात एकाज्' इति प्रगृह्यत्वेन 'प्रकृतिभावान्न सन्धिः' इत्यपरे। - बृहच्छब्देन्दुशेखरे, पृ. ३
९. अष्टाध्यायी, २.४.८२
१०. लघुशब्देन्दुशेखरे,षट्टीकोपेते, पृ. १३

## सन्दर्भग्रन्थसूची

१. **अष्टाध्यायी,** पाणिनिः, वाराणसी,१९८०

२. **काशिका न्यासः,** जिनेन्द्रबुद्धि, (सम्पादक-श्रीनारायण मिश्र), रत्नापब्लिकेशन वाराणसी, १९८५

३. **कौमुदीकल्पलतिका,** शुक्लश्रीवेणीमाधवशास्त्री, चौखम्बा-संस्कृत-सीरिज, बनारस सिटी-संवत् १९९१

४. **लघुशब्देन्दुशेखरः,** नागेशभट्टः, सुबोधिनी हिन्दी व्याख्या (आचार्य विश्वनाथ मिश्र), चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९९८

५. **लघुशब्देन्दुशेखरः,** शाङ्करी टीका (श्रीटिप्पणीसहिता), शङ्करभट्ट (सं. डॉ. जयकान्तसिंह शर्मा), मान्यता प्रकाशन, नई दिल्ली, २००६

६. **वैयाकरणसिद्धान्तकौमुदी,** भट्टोजिदीक्षितः, **लक्ष्मीटीका १, सभापति-शर्मोपाध्याय;** मोतीलाल बनारसीदास, वाराणसी

७. **व्याकरणशास्त्र का इतिहास, भाग-द्वितीय,** पण्डित युधिष्ठिर मीमांसक, सोनीपत,१९८४

□□□

# गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्यय इति परिभाषाविचारः

*प्रियदर्शिनी मल्लुल इ*

*(शोधच्छात्रा, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः -**

**शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं तथा ।**

**कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।**

शिक्षादीनि वेदाङ्गानि षट्। तेषु व्याकरणं मुखस्थानीयमित्युच्यते। उक्तञ्च मुखं व्याकरणं स्मृतम्[१] । व्याक्रियन्ते शब्दाः अनेनेति करणल्युडन्तः व्याकरणशब्दः। लोके हि अनादितया साध्वसाधुशब्दाः अनन्ताः सन्ति। तेषु साधुशब्दज्ञानेन प्रयोगद्वारा पुण्यविशेषो जायते। व्याकरणं हि साध्वसाधुशब्देभ्यः साधुशब्दान् पृथक्कृत्य प्रकृतिप्रत्ययविभागद्वारा तान् विवेचयति । तदर्थमेव व्याकरणशास्त्रमाविर्भूतम् । सत्सु बहुषु ऐन्द्रचान्द्रादिषु व्याकरणेषु पाणिनीयं व्याकरणमेव महत्त्वपूर्णत्वेन, वेदाङ्गत्वेन च परिकीर्त्यते । पाणिनिकात्यायनपतञ्जलिविरचितं सूत्रवार्तिकभाष्यात्मकं पाणिनीयव्याकरणमिति व्यवह्रियते। पाणिनिमहर्षिणा विरचितः सूत्रात्मकः अष्टाध्यायीग्रन्थः। विभिन्नानि प्रक्रियोपकारीणि सूत्राणि अत्र उपनिबद्धानि।

**संज्ञा च परिभाषा च विधिर्नियम एव च।**

**अतिदेशश्चाधिकारश्चेति षड्विधं सूत्रलक्षणम् ।।**

**अनियमे नियमकारिणी परिभाषेति व्यवह्रियते ।**

**व्याकरणशास्त्रे परिभाषाणां प्रकारद्वयं दृश्यते ।**

प्रथमः प्रकारः - पाणिनिद्वारा उच्चारितसूत्रात्मिकाः परिभाषाः यथाः "तस्मिन्निति निर्दिष्टे पूर्वस्य[२]" तस्मादित्युत्तरस्य[३] षष्ठी स्थानेयोगा[४]आद्यन्तौ टकितौ[५] इत्याद्याः

परिभाषा: षड्विधसूत्रप्रकारेषु परिभाषासूत्रप्रकारेषु परिभाषासूत्रप्रकार एव प्रथम: परिभाषाप्रकार:। द्वितीयस्तु पाणिनिसूत्रै: ज्ञापिता: बोधिता: परिभाषा: वाचनिक्य: लोकन्यायसिद्धा: वा।

उभयविधपरिभाषासु द्वितीयप्रकारपरिभाषाणां विषय एव संचर्च्यते। तत्रादौ परिभाषाणां स्वरूपं निरूपयति भूतिकार: श्रीरामकृष्णशास्त्री।

सङ्केतग्राहकभिन्नत्वे सतिशब्दधर्मिक,साधुत्व प्रकारकशास्त्रजन्याप्रमाण्यज्ञाना-नास्कन्दितबोधसहकारित्वेन मुन्यभिप्रेतत्वे सति पाणिन्युच्चारितभिन्नत्वं परिभाषात्वम्।[६]

या सङ्केतग्राहकसूत्रेभ्य: भिन्ना सा परिभाषा। अत्र ध्यातव्योऽश: यत् संज्ञासूत्राणां सङ्केतग्राहकत्वमस्ति । यथा वृद्धिरादैच् इतीदं शास्त्रम् आदैजित्यस्मिन्नर्थे वृद्धिं संकेतयति। प्रकृते व्याख्येयपरिभाषा: एवं विधसंज्ञासूत्रेभ्य: भिद्यन्ते।

"षष्ठीस्थानेयोगा"[७]इत्यादीनां पाणिन्युच्चरित्वेऽपि निर्दिश्यमानस्यादेशा: भवन्ति इत्यानुपूर्वीमद्वाक्यस्य प्रकारान्तरेण सिद्धत्वात न दोष:। स्वातन्त्येण व्यवस्थापकानाम् ।

"असिद्धं बहिरङ्गमन्तरङ्गे"[८] इत्यादीनामेवंविधत्वेऽपि पाणिनिप्रयत्नानुमित-त्वादारोपितं परिभाषात्वमनुसन्धेयमिति। यद्यपि व्याकरणाकरेषु सर्वेष्वपि ग्रन्थेषु परिभाषाशब्दस्तु विलोक्यते किन्तु तस्य निर्दुष्टं लक्षणं न क्वापि दृश्यते । किं बहुना पाणिनिं विना तु तस्य नामापि नोच्चारितम्। एवञ्च परिभाषापदार्थनिरूपणप्रसङ्गे वैयाकरणै: किञ्चित् काठिन्यमनुभूयते। तथापि परिवर्तिनो विद्वांस: परिभाषा पदार्थनिरूपणे लेखनीं व्यापारयामासु:। तथा च पदमञ्जरीकारो हरदत्तमिश्र: -"परित: सर्वत्र पूर्वत्र व्यवहितेऽनन्तरे च भाष्यते कार्यमनया सा परिभाषा"[९] इति परिभाषा लक्षणम् अवोचत्।

परिभाषावृत्तिविधायकेषु सर्वेष्वपि ग्रन्थेषु परमप्राचीन: प्रौढश्च व्याख्याता व्याडिर्विलोक्यते। तेन परिभाषासूचनापरपर्याया परिभाषावृतिर्विरचिता। अतस्तस्य प्रथमसम्प्रदायप्रवर्तकत्वं प्रतिपादयितुं शक्यते परिभाषाविवरणविषये। प्रकृते व्याडि विरचिते परिभाषा वृत्तिग्रन्थे एकां परिभाषां स्वीकृत्य विचार: क्रियते।

**गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः**

गौणमुख्ययोः मुख्ये संप्रत्यय इति व्याडिना व्याख्याता तृतीया परिभाषा। आदौ अर्थवदनर्थकयोः अर्थवत एव ग्रहणमित्युक्तम्। तस्यापि सति संभवे प्रतिपदोक्तस्यैव ग्रहणम्, न तु लाक्षणिकस्येति स्पष्टीकृतम्। तदपि क्वचित् मुख्यं भवति क्वचित् गौणम्। यथा गङ्गाशब्दः प्रवाहे मुख्यः, तीरे गौणः। उभयोर्मध्ये मुख्ये संप्रत्ययः = ज्ञानमिति विव्रियते। कस्य संप्रत्यय इत्याकाङ्क्षायां कार्यपदमध्याहार्यम्। अत एव नव्यैः गौणमुख्ययोः मुख्यकार्यसंप्रत्यय इति पठितम्। ज्ञापनेन इयं परिभाषा साधिता व्याडिना। तथाहि – द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च (4-2-32) इति तद्धितेषु रक्ताद्यर्थकप्रकरणस्थं सूत्रम्। अनेन साऽस्य देवता इत्यर्थे छप्रत्ययः विधीयते। चात् यत्। अग्नीषोमीयम्, अग्नीषोम्यम्। अत्र सूत्रे अग्नीषोम इति शब्दः षत्वघटितः पठितः। षत्वं तावत् 'अग्नेः स्तुत् स्तोमसोमाः' इति सूत्रेण ह्रस्वेकारान्तात् अग्निशब्दात् परस्य सोमादेः विधीयते। परन्तु अग्नीसोम इत्यत्र दीर्घान्तात् कथं षत्वमिति प्रश्नः। न च अग्निशब्दात् परस्य सोमशब्दस्य षत्वं विधीयते। तत्र सर्वदा दीर्घान्त एव अग्निशब्दः वर्तते न ह्रस्वान्त इति विधानसामर्थ्यात् दीर्घान्तादपि परस्य षत्वं भवतीति वाच्यम्। इदं च वचनमन्यत्र चरितार्थम्। अग्निसोमशब्दौ न मुख्यौ किन्तु लाक्षणिकौ। तयोः समासे अग्निश्च सोमश्च अग्निसोमौ। देवताद्वन्द्वाभावात् नात्र ईत्वस्य प्राप्तिः। तत्र षत्वस्य चारितार्थ्ये सति द्यावापृथिवीति सूत्रे अग्नीषोम इति पठति। तेन ज्ञाप्यते मुख्ये कार्यसंप्रत्यय इति। अग्नीषोम इति षत्वघटितपाठः परिभाषायाः ज्ञापक इति ग्रन्थकृतः आशयः। वस्तुतस्तु परिभाषाज्ञापनात् पूर्वम् अस्याः अभावेन लाक्षणिके अग्निगुणोऽग्निः सोमगुणः सोमः। अग्निसोमावित्यत्र इकारान्तः उपलभ्यते इति ग्रन्थकृत्कथनं पूर्वोत्तरग्रन्था संगतिरिति भासते। भवतु नाम। अग्नीषोमशब्दपाठः गौणमुख्यपरिभाषायाः ज्ञापक इति वृत्तिकारस्याशयः।

परिभाषाज्ञापनात् अग्निसोमौ इति लाक्षणिकस्थले न षत्वप्रसङ्गः। एवं गोऽभवत् इति च्व्यन्तस्य गौणत्वेन तत्र ओत् इति प्रगृह्यसंज्ञायाः प्रसक्तिर्नास्ति। च्विरव्ययमिति

उणादिसूत्रेण च्व्यन्तस्य निपातत्वात् ओत् इति प्रगृह्यसंज्ञा प्राप्नोति। अनया वार्यते। तेन एङः पदान्तादति इति सूत्रेण पूर्वरूपे गोऽभवदिति सिध्यति।

वस्तुतस्तु गौणमुख्येति नेयं परिभाषेति वृत्तिकारस्याशयः। तथा हि – अग्निरिव सोम इवेति अग्निसोमशब्दौ गौणौ लाक्षणिकौ भवतः। योऽयं मुख्यः सः प्रतिपदोक्त इति अग्निसोमौ, गोऽभवदित्यादिकं लक्षणप्रतिपदोक्तपरिभाषयैव सिध्यतीति गौणमुख्यपरिभाषायाः अवसरो नास्तीति ग्रन्थकर्तुराशयः। उक्तं तेन – "तस्मादेषा लक्षणप्रतिपदोक्तयोः औपदेशिक- प्रायोगिकयोर्वा अन्यतरया प्रत्युक्ता भवतीति"।

इत्थं परिभाषां निरस्य तस्याः ज्ञापकत्वमिति प्रत्याचख्यौ। अग्नीषोमेति पाठः प्रकृतपरिभाषायाः ज्ञापक इति नोचितम्। **अग्नेः स्तुत्स्तोमसोमाः** इति ह्रस्वात् अग्निशब्दात् परस्य विधीयमानं षत्वं दीर्घात् न प्राप्नोतीति तदर्थम् अग्नीषोमपाठस्य सार्थक्येन न तस्य ज्ञापकता। अग्निसोमौ इति लाक्षणिकस्थले षत्ववारणं तु दीर्घे, षत्वविधायके च विभाषेति अनुवर्तते। सा च व्यवस्थितविभाषेति दीर्घादेव षत्वं भविष्यति न ह्रस्वादिति नैतत् प्रयोजनम्। गोऽभवदित्यपि न प्रयोजनम्। यतः **ओत्** इति सूत्रे तपरकरणं कृतम्। तच्च सवर्णग्रहणव्यावृत्त्यर्थम्। परन्तु ओकारस्य सवर्णाभावात् तपरकरणं व्यर्थं सत् निपात एवेति अवधारणं कल्पयति। तेन निपात एव यः ओकारः तस्यैव प्रगृह्यसंज्ञेत्यर्थो लभ्यते। तेन निपातानिपातसाधारणस्य न भवतीति गोऽभवदित्यत्र न प्रगृह्यसंज्ञापत्तिः। गो इत्यस्य च्व्यन्ते निपातत्वम्। अन्यथाऽनिपातत्वम्। तस्मात् ज्ञापकाभावात् लक्षणप्रतिपदोक्त-परिभाषया गतार्थत्वाच्च नास्त्येषा परिभाषेति वृत्तिकारमतम्।

अमहान् महान् भूतः महद्भूत इति च्व्यन्तस्थले महापुरुष इत्यत्रेव **आन्महत** इति आत्वापत्तिरिति अवतारिका उक्ता शेखरकृता। व्याडिरीत्या तस्य लाक्षणिकत्वेन लक्षणप्रतिपदोक्तपरिभाषयैव गतार्थतेति बोध्यम्। महद्भूत इत्यत्र अमहति महत्वारोपेण गौणलाक्षणिकत्वात् न तत्र आत्वापत्तिः। गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः। अप्रसिद्धत्वं गौणलाक्षणिकत्वं चात्र गौणत्वम्। प्रियाः त्रयः येषां ते प्रियत्रयाणामित्यादौ त्रिशब्दार्थस्य अन्यपदार्थं प्रति विशेषणत्वेन अप्रधानत्वेऽपि प्रकृतपरिभाषायां गौणपदेन न तस्य ग्रहणमिति **त्रेस्त्रयः** इति त्रयादेशो भवत्येव। व्याड्युक्तरीत्या तस्य लाक्षणिकत्वाभावेन न दोषः।

त्रिपदार्थस्यान्यपदार्थविशेषणत्वेऽपि अग्नेः गुणः अग्निरितिवत् नान्यार्थोपदेशकः। लक्षणनिष्पन्नस्येव अन्यर्थोपदेशकस्यापि लाक्षणिकत्वमङ्गीकरोति व्याडिः।

परिभाषेन्दुकर्ता अभिप्रैति यदयं गौणमुख्यन्यायः पदकार्ये एव प्रवर्तते न तु प्रातिपदिककार्ये। यतः न केवलं पदस्य शक्यार्थसंबन्धरूपलक्षणा युज्यते। किन्तु पदस्य पदान्तरसंबन्धे एव। तदानीमेव पदार्थस्य पदार्थान्तरान्वये अन्वयानुपपत्तिः तात्पर्यानुपपत्तिर्वा युज्यते। अतः परिनिष्ठितपदस्य पदान्तरसंबन्धे एव तत्प्रवृत्त्या प्रातिपदिकदशायां पदत्वसंपादककार्यप्रवृत्तौ गौणमुख्यन्यायो न प्रवर्तते इति पदकार्ये एवायं न्याय इत्यर्थात् सिद्धम्। किञ्च सूत्रोपात्तपदकार्ये एव। न तु सर्वत्र। यथा **अग्नेर्ढक्** इत्यादौ अग्निसदृशार्थस्वीकारे न ततः नायं प्रत्ययः। श्वशुरशब्दस्य तत्सदृशे लक्षणायां तस्योपात्तत्वाभावेन **अत इञ्** सिद्ध्यति। सुबन्तात् तद्धितोत्पत्तिरिति सिद्धान्तः।

लक्षणप्रतिपदोक्तपरिभाषया गतार्थत्वात् नेयं परिभाषेति व्याड्युक्तं न युक्तम्। **अग्नेः स्तुत्स्तोमसोमाः** इति सूत्रस्थेन अग्निसोमौ माणवकावित्यत्र गौणमुख्यन्यायेन षत्ववारणपरभाष्येण विरोधात्। किञ्च लक्षण्या निष्पन्नस्यैव लाक्षणिकत्वमिति व्यवहारः। अन्यार्थोपदेशकस्य लाक्षणिकत्वे प्रसिद्धिर्नास्ति। एवञ्च गौणमुख्यन्यायः भाष्यसम्मत इति बोध्यम्।

## सन्दर्भाः


१. पाणिनीयशिक्षा, श्लोकसंख्या - ४२

२. पाणिनीय अष्टाध्यायी सूत्रसंख्या - १.१. ६६

३. तत्रैव १.१.६७

४. तत्रैव १.१.४९

५. तत्रैव १.१.४६

६. परिभाषेन्दुशेखरभूतिव्याख्या, पृष्ठसंख्या - ०९

७. पाणिनीय-अष्टाध्यायी, सूत्रसंख्या -१.१.४९

८. परिभाषेन्दुशेखरः, परिभाषासंख्या - ५०
९. काशिकापदमञ्जरी - १.१.३

## सन्दर्भग्रन्थाः

१. पाणिनीय शिक्षा महर्षि पाणिनी, श्रीनारायणमिश्रः चौखम्बापब्लिशर्स गोकुलभवन, के-३७/१०९, गोपालमन्दिर लेन, वाराणसी -२२१००१
२. पाणिनीय - अष्टाध्यायी, सम्पादकः कैलाशनाथ भार्गवः, भार्गवभूषण प्रेस, गायघाट, बनारस, १९९४
३. परिभाषेन्दुशेखरस्य भूतिटीका, टीकाकार म.म.रामकृष्ण परवर्धन तात्याशास्त्री, राजराजेश्वरी प्रेस पुस्तकालयः, दुर्गाघाट, वाराणसी, १९४३
४. काशिका (पदमञ्जरी), सम्पादकः स्वामी द्वारिकादास, प्राच्यभारतीय, वाराणसी, प्रथमसंस्करणम्, १९६५
५. (व्या.प.सू) परिभाषा.सङ्ग्रहः, सम्पादकः के.वी.अभ्यङ्करः, एम.ए.भण्डारकर, ओरिएण्टल रिसर्च इंस्टीच्यूट् , पूना - १९६७

□□□

# महाभारतस्थोद्योगपर्वणि तद्धितान्तरमणीयता

*जयवन्त चौधरी*
*(शोधच्छात्र:, व्याकरणविभाग:, राष्ट्रियसंस्कृतविद्यापीठम् तिरुपति:)*

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।**
**पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।।**

विदितचरमेवैतत् सर्वेषां यत् प्रकृतिप्रत्ययतत्तदर्थविभागज्ञानपूर्वकं सुशब्दान् तत्तदर्थेषु प्रयोक्तुं य: प्रभवति , स एव सर्वत्र प्रशस्यो भवति , तच्च ज्ञानं व्याकरणशास्त्राधीनमेव । तत्र सत्स्वप्यनेकेषु चान्द्रादिषु व्याकरणेषु अद्यत्वे पाणिनीयमेव परमप्रमाणतया स्वीक्रियते विद्वद्भि: । तत्र च कारणं व्याकरणान्तरपेक्षया लघुनोपायेन सकलशब्दज्ञापनाय पाणिनिमहर्षिणा विहित: सफल: प्रयास: एव। उक्तं च महाभाष्ये **आकुमारं यश: पाणिने:** इति । बालान् बोधयितुं सुगममिदं व्याकरणमिति तात्पर्यम्।

## पाणिनीयव्याकरणे तद्धितानुशासनम्

पाणिनीयया दृष्ट्या विमर्शे सति विज्ञायते यदष्टाध्याय्या भागत्रयम् ,तत्र प्रथमद्वितीयाध्यायात्मके प्रथमभागे वाक्यै: पदसंकलनं, तृतीयचतुर्थपञ्चमाध्यायात्मके द्वितीयभागे पदानां प्रकृतिप्रत्ययात्मकं विश्लेषणं, तृतीये च भागे षष्ठसप्तमाध्यायात्मके आगमादेशादिविधानानन्तरं विश्लिष्टप्रकृतिप्रत्यययोगात्पदनिर्माणम् । त्रिपादी ऐच्छिकी। आपञ्चमाध्यायं तध्दितप्रकरणं विद्यते । सिध्दान्तकौमुद्याम् अवान्तराधिकारमाश्रित्यार्थ-सामान्याश्रितानि सप्तदश प्रकरणानि तध्दितान्तानां कृतानि सन्ति । तेभ्य: प्रयोगेभ्यो हिता: इति तद्धिता: । इयमन्वर्थसंज्ञा विज्ञायते।

महर्षिपाणिनिनाष्टाध्याय्यां **तद्धिता:** (४.१.७०) इत्यस्य सूत्रस्याधिकारे तद्धितप्रत्यया: विहिता:। न तु तद्धितसंज्ञा पृथक् कृतापितु तद्धिता: इत्यधिकारेणैव तद्धितप्रत्यया: विहिता: ।

**प्रत्ययेषु तद्धितानां प्राधान्यम्**

प्रधानभूतेऽप्यत्र भागे प्रत्ययान्तर्रापेक्षया तद्धितसंज्ञकप्रत्ययानां वैलक्षण्यं प्रामुख्यं चास्ति । एषामर्था अपि व्यापका: ।

१.तद्धितप्रत्ययविधायकानि सूत्राणि प्रत्ययान्तर्र विधायकसूत्राण्यपेक्षया अधिकसंख्याकानि।

२.तद्धितप्रत्यया: प्रत्ययान्तर्रापेक्षया अधिकसंख्यका: ।

३.तद्धितप्रकृति: क्वचित् सुबन्तम् ,क्वचित्तिङन्तम् ,क्वचित् प्रातिपदिकम्,क्वचित् पदसमुदाय: इति अनेकधा वर्तते ।

**महाभारतस्य महत्त्वम्**

भगवत: वेदव्यासस्य विज्ञानभूम्न: सर्वोत्तमं रत्नमिदं महाभारतं भारतीयजीवनं सम्पूर्णमालोकयति। अयमेक: ग्रन्थ: सकलवेदवाङ्मयस्य चतुर्विधपुरुषार्थाणां सामाजिक-सांस्कृतिक-राजनैतिकचेतनायाश्च प्रतिनिधिभूतो वर्तते । सकलविषयै-स्समुल्लसितमिदं महाभारतं विचिन्तकै: पञ्चमो वेद: इति सम्मान्यते। एकेन महाभारतज्ञानेन चतुर्दशविद्याप्रतिपाद्यं सर्वमेव विज्ञातं भवेदिति कथने नातिशयोक्ति:। अत एवोक्तम् -

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ: ।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्** [१]।।

अस्मिन्महाभारते सकलशास्त्रतत्त्वैसाकं प्रत्येकं मानवस्य जीवनपरमार्थभूतानां चतुर्विधपुरुषार्थानां सन्निवेश: कृत: इत्यपि विज्ञायते । यथा -

**अर्थशास्त्रमिदं पुण्यं धर्मशास्त्रमिदं परम् ।**
**कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना** [२]।।

**महाभारते उद्योगपर्वणः महत्त्वम्**

महाभारतमहाकाव्यमष्टादशपर्वभिः विभूषितं वर्तते । तेषु पर्वसु पञ्चमस्थान-युद्योगपर्व राजते ।

**उद्योगपर्वणः व्याकरणदृष्ट्या महत्त्वम्**

उद्योगपर्वणः व्याकरणदृष्ट्यातीवमहत्त्वमस्ति। यथा- सन्धि, समास, कारक, कृदन्तशब्दाः, तद्धितान्तशब्दाः, केचनार्षप्रयोगाः, महाभारतस्थोद्योगपर्वणि बहुत्र दृश्यन्ते।

**उद्योगपर्वणि केचन तद्धितान्तशब्दाः**

**शैशुपालिः**

शिशुपालस्यापत्यम् इति विग्रहे शिशुपालशब्दादपत्यार्थे **अत इञ्**[३] इति सूत्रेण इञि प्रत्यये कृते, शिशुपाल + इञ्, अनुबन्धलोपे शिशुपाल + इ, **यचि भम्**[४] इत्यनेन भसंज्ञा, **यस्येति च**[५] अकारलोपे शिशुपाल् + इ, आद्यचो वृद्धौ, सोः रुत्वे विसर्गे शैशुपालिः इति सिद्धम् । शैशुपालिः अर्थात् धृष्टकेतु।

**जामदग्न्यः**

जमदग्नेर्गोत्रापत्यम् इति विग्रहे **गर्गादिभ्यो यञ्**[६] अनेन यञ् प्रत्यये जमदग्नि + यञ् अनुबन्धलोपे जमदग्नि + य, आद्यचो वृद्धौ सत्यां जामदग्नि + य, **यचि भम्**[७] भत्वात् इ लोपे ,सोः रुत्वे विसर्गे च जामदग्न्यः इति सिद्धम् । अर्थात् जमदग्निनन्दनः परशुरामः ।

**केशवः**

प्रशस्ताः केशा अस्य सन्तीति इति विग्रहे केशशब्दात् **केशाद्वोऽन्यतरस्याम्**[८] इत्यनेन वप्रत्ययः केश + व ,केशव, सोः रुत्वे विसर्गे च केशवः इति सिद्धम् । केशवः इति महाभारते कृष्णस्य नामविशेषः।

**सांग्रामिकम्**

संग्रामाय प्रभवति इति विग्रहे संग्रामशब्दात् तस्मै **तस्मै प्रभवति सन्तापादिभ्यः**[९] इति ठञि कृते, संग्राम + ठञ् , अनुबन्धलोपे संग्राम + ठ , **ठस्येकः**[१०] सूत्रेण इकादेशः, संग्राम + इक् , **किति च**[११] इत्यनेन आद्यचो वृद्धौ सांग्राम + इक् , भसंज्ञायामकारलोपे सांग्रामिकेति जाते, सुविभक्त्युत्पत्तौ सोरमि पूर्वरूपे च सांग्रामिकम् इति सिद्धम् ।

**कालिङ्गः**

कलिङ्गस्यापत्यं तेषां राजा वा इति विग्रहे कलिङ्गशब्दात् **द्व्यमगधकलिङ्गसूरमसादण्** [१२]सूत्रेण अणि कलिङ्ग + अण्, अनुबन्धलोपे कृते कलिङ्ग + अ, भत्वेनाकारलोपे, आद्यचो वृद्धौ कालिङ्गेति जाते, प्रातिपदिकत्वेन सु , सोः रुत्वे विसर्गे च कालिङ्गः इति सिद्धम् । एवमेव वैदर्भ्यः, कौशल्यः , आवन्त्यः, काम्बोजः इत्यादयः देशवाचितद्धितान्ताः शब्दाः सन्ति ।

**गाङ्गेयः**

गङ्गायाः अपत्यम् पुमान् , इति विग्रहे गङ्गाशब्दात् अपत्यार्थे **द्व्यचः**[१३] इति सूत्रेण ढक् प्रत्यये कृते सति गङ्गा + ढक्, **आयनेयीनीयियः फ़ढखछघां प्रत्ययादीनाम्**[१४] इति एयादेशे गङ्गा + एय, आद्यचो वृद्धौ, भत्वात् आकारलोपः। ततः प्रातिपदिकत्वेन सु, रुत्वे विसर्गे च गाङ्गेयः इति सिद्धम् । भीष्मः इत्यर्थः।

**माहेन्द्रः**

महेन्द्रो देवताऽस्य इति विग्रहे महेन्द्रशब्दात् **महेन्द्राद्घाणौ च**[१५] इति अण् प्रत्यये महेन्द्र + अण् अनुबन्धलोपे महेन्द्र + अ, आद्यचो वृद्धौ माहेन्द्र + अ, भत्वेनाकारलोपः माहेन्द्र् + अ, प्रातिपदिकत्वेन सौ रुत्वे विसर्गे च माहेन्द्रः इति रूपं सिद्धम् । माहेन्द्रः इत्युक्ते शस्त्रविशेषः । एवमेव तद्धितान्तशस्त्रनामानि सन्ति ऐन्द्रम्, ब्राह्मम्, प्राजापत्यम्, वायव्यमित्यादि ।

**फल्गुनः**

फल्गुनीषु नक्षत्रेषु जातः इति विग्रहे फल्गुनीशब्दात् **सन्धिवेलाद्यृतु-नक्षत्रेभ्योऽण्**[16] सूत्रेणाण् प्रत्ययः, फल्गुनी + अण् **श्रविष्ठाफल्गुन्यनुराधास्वाति-तिष्यपुनर्वसुहस्तविशाखाऽषाढाबहुलाल्लुक्**[17] सूत्रेण अणः लुक्, ततः **लुक्तद्धितलुकि**[18] सूत्रेण ङीप् इति स्त्रीप्रत्ययस्यापि लोपे सति फल्गुणः इति रूपं सिध्यति । फल्गुनः अर्थात् अर्जुनः ।

इत्थमत्र महाभारतस्थोद्योगपर्वणि तद्धितान्तप्रयोगाणां विचारः दिङ्मात्रं प्रदर्शितः। विस्तरभयाद्विरम्यते ।

## सन्दर्भाः

| | |
|---|---|
| १.महा.आदि.५६.३३ | २.महा. आदि.५६.२१ |
| ३.पा.अ.४.१.९५ | ४.पा.अ.१.४.१८ |
| ५.पा.अ.६.४.१४८ | ६.पा.अ.४.१.१०५ |
| ७.पा.अ.१.४.१८ | ८.पा.अ.५.२.१०९ |
| ९.पा.अ.५.१.१०१ | १०.पा.अ.७.३.५० |
| ११.पा.अ.७.२.११८ | १२.पा.अ.४.१.१६८ |
| १३.पा.अ.४.१.१२१ | १४.पा.अ.७.१.२ |
| १५.पा.अ.४.२.२९ | १६.पा.अ.४.३.१६ |
| १७.पा.अ.४.३.३४ | १८.पा.अ.१.२.४९ |

## सन्दर्भग्रन्थसूची

१. अष्टाध्यायी, प्रकाशक- वैदिक पुस्तकालय दयानन्द आश्रम, केसरगंज,अजमेर। (वि.स.२०६५)

२.वैयाकरणसिद्धान्तकौमुदी, चौखम्बा सुरभारती प्रकाशन,वाराणसी। (२०११)

३.महाभारत, स्वाध्याय मण्डल प्रकाशक ।(१९७२)

४.महाभारत, गीताप्रेस, गोरखपुर, कोलकाता संस्थान। (२०११)

□□□

# नैषधमहाकाव्यस्थ तद्धितान्तप्रयोगाणां सङ्ग्रहः

*तिरुमल*
*(शोधछात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

अथ अष्टाध्याय्यां ''तद्धिताः''[१] इति, ''प्रत्ययः''[२] ''परश्च''[३] इति चाधिकारसूत्राणि। तद्धिताः प्रत्ययाः परे भवन्तीति अर्थो लभ्यते। कस्मात् परे इत्याकांक्षायां ''समर्थानां प्रथमाद्वा''[४] इत्यधिकारात् प्रथमोच्चारितात्समर्थात् इति समाधानं भवति। प्रातिपदिकादित्यधिकृतम्[५] ''घकालतनेषु कालनाम्नः''[६] इति तरप्तमप्तनेषु तद्धितेषु परेषु सप्तम्या अलुक् विधानात् सुबन्तात्तद्धितोत्पत्तेर्ज्ञापितत्वात् सुप्शिरस्कात्प्रातिपदिकादिति अर्थो लभ्यते। प्रथमोच्चारितत्वं तु सूत्रेषु इत्यर्थः।

**I. अपत्याधिकारप्रकरणम् -**

प्रकृतविचारे ''तस्यापत्यम्''[७] इति अपत्याधिकारः आरभ्यते। अत्र योगे तस्य इति प्रथमोच्चारिते पदे ङसः उपस्थितत्वात् षष्ठी एव परिगृह्यते। ततः षष्ठ्यन्तादिति फलति। सामर्थ्यं कृतसन्धिकार्यत्वं भवति। ''समर्थः पदविधिः''[८] इत्यनेन समर्थात् इति लभ्यते। इत्थं षष्ठ्यन्तात् कृतसन्धेः समर्थात् अपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः। इति सूत्रार्थो फलति। अत्र उक्ताः ''प्राग्दीव्यतोऽण्''[९] इत्याद्या औत्सर्गिकाः, वक्ष्यामाणाः ''अत इञ्''[१०] इत्याद्या वैशेषिका इत्यर्थः। अपत्यशब्दः पुत्रपौत्रादिसन्ततिपर्यायोऽस्ति। इति ''अपत्यं प्रौत्रप्रभृति गोत्रम्''[११] सूत्रविविरणसन्दर्भे सिद्धान्तकौमुद्यां बालमनोरमायां वर्तते। अपत्याधिकारः तस्यापत्यम् सूत्रतः न प्राच्य-भर्गादि-यौधेयादिभ्यः सूत्रपर्यन्तं वर्तते।

**प्रत्ययाः-** अण् - ण्य इत्यादि।

**नैषधीयचरिते श्रीहर्षीयप्रयोगाः -**

१. **प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती।**
**धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरायिता।।**[१२]

अत्र आदित्यम् इति तद्धितान्तप्रयोगोऽस्ति। अदितेः अपत्यम् इत्यर्थे अदिति इत्यस्मात् ''दित्यदित्यादित्यपत्युत्तरपदाण्यः''[१३] इति सूत्रेण ण्य - प्रत्ययो विधीयते। अदिति + ङस् + ण्य इति स्थिते ''कृत्तद्धितसमासाश्च''[१४] इति प्रातिपदिकत्वे ''सुपोधातुप्रातिपदिकयोः''[१५] इति सुपः लुकि प्रत्ययाद्यौ चुटू इतौ स्तः इत्यर्थकेन ''चुटू'' [१६] इति सूत्रेण प्रत्ययादेः णकारस्य इत् संज्ञा। ''तस्य लोपः''[१७] इति इत्संज्ञकस्य णकारस्य लोपो भवति। णित्वात् ''तद्धितेष्वचामादेः''[१८] सूत्रेण आदिवृद्धौ, ''यचि भम्''[१९] इति भसंज्ञायां, ''यस्येति च''[२०] इति इकारलोपः प्रवर्तते। आदित्य इति स्थिते तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां ''स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्य-स्ङसोसाम्ङ्योस्सुप्''[२१] सूत्रेण द्वितीयविभक्त्यैकवचने अम् प्रत्यये अमिपूर्वः इति पूर्वरूपे आदित्यम् इति सिध्यति।

अदितिर्देवमाता दक्षदुहिता, महर्षिकश्यपेन परिणीता, तस्यां द्वादशपुत्राः सञ्जाताः। तत्र आदित्य इति सूर्यस्यापरं नाम - अत्रामरः[२२] -

**सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः।**
**आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः।**[२३]

२. **श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरुपया धृतः।**
**विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः।।**[२४]

**भैमीम् -** भीमः विदर्भदेशस्य राजा।

भीमस्य अपत्यम् इत्यर्थे भीम इत्यस्मात् ''तस्यापत्यम्''[२५] सूत्राधिकारे ''अत इञ्''[२६] सूत्रेण इञ् प्रत्ययो विधीयते। भीम + ङस् + इञ् इति स्थिते प्रातिपदिकत्वे[२७] सुपः लुकि भीम + इञ् इति जाते ''हलन्त्यम्''[२८] इति सूत्रेण ञकारस्य इत्संज्ञायां ''तस्य लोपः''[२९] इति लोपः प्रवर्तते। ञित्वादादिवृद्धिः[३०]। ''यस्येति च''[३१] इत्यनेन

अकारलोपः। स्त्रीत्वविवक्षयां इतो मनुष्यजातेः सूत्रेण ङीष्प्रत्यये भैमी इत्यस्य प्रातिपदिकत्वे ततः द्वितीयैकवचने अम् प्रत्यये ''अमिपूर्वः''[३२] इति पूर्वरूपे भैमीम् इति रूपं सिध्यति।

एवं नैषधे अपत्यार्थे बहवः शब्दाः वर्तन्ते। यथा - हारिः, सावर्णिः, दाक्षी, वैरोचनिः, दैतेयः, गाङ्गेयः, रैणुकेयः, ऐणेयः, वार्ष्णेयः, पाञ्चाली, पार्थः, चाम्पेयम्, काव्यः, वैदर्भी इत्यादयः।

**II. रक्ताद्यर्थप्रकरणम् -**

''तेन रक्तं रागात्'' [३३] सूत्रादारभ्य ''छन्दो ब्राह्मणानि च तद्विषयाणि''[३४] सूत्रपर्यन्तं वर्तते।

**श्रीहर्षीयप्रयोगाः -** हैङ्गुलम्, माञ्जिष्ठम्, आलक्तम्, काषायम्, वार्धकम्, वारुणम्, भैक्षम्, ज्यैष्ठी, मौहूर्तिकाः, वामदेव्यम्, कार्तिकी, क्रमकः इत्यादयः।

**III. चातुरर्थिकप्रकरणम् -**

''तदस्मिन्नस्तीति देशे तन्नाम्नि ''[३५] सूत्रतः ''नडादीनां कुक् च ''[३६] सूत्रपर्यन्तं भवति। तत्र

**श्रीहर्षीयप्रयोगाः -** वेतस्वती, कुमुद्वती इत्यादयः।

**IV. शैषिकप्रकरणम् -**

''शेषे ''[३७] सूत्रादारभ्य ''अथर्वाणिकस्येकलोपश्च'' [३८] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** शारदः, पार्विकः, नैषधीयः, शैवः, औपयिकी, सामुद्रकम्, अदसीयम्, राजव्रजीयः, नलीयः, आर्यपुत्रीयम्, दामोदरीयम्, पौरस्त्यम्, पश्चात्तनैः, नैषधम्, एतदीयाम्, नारदीयम्, इदमीयम्, स्वर्गीयः, नारकीयान्, कार्यीयाः, स्वात्मीयम्, मामकम्, तावकीना, तावकम्, यौष्माकी, अस्माकम्, सौवर्गः, कौशिकीया, वाक्परीणा, प्राभातिकीम्, प्राह्णेतनीम्, ग्राम्यः, अपाङ्क्तेयताम्, कौक्षेयकः, ललाटिका, आन्तःपुरीभिः, अन्तिमः, आर्णवम्, मानसः, सैन्धवः, आन्तरेण, स्वयूथ्यैः इत्यादयः।

**V. प्राग्दीव्यतीयप्रकरणम् -**

"तस्य विकार:" [३९] सूत्रादारभ्य "कंसीयपरशव्ययोर्यञञौ लुक्च" [४०] सूत्रपर्यन्तं वर्तते।

**श्रीहर्षीयप्रयोगा: -** काञ्चनम्, हैमेषु, केतकम्, नागकेसरम्,वाङ्मयै:, हिरण्मयम्, माणिक्यमया, मणिवेश्ममयम्, गोमयाञ्चनम्, आयसम्, कांसीकृता, जाम्बूनदम् इत्यादय: सन्ति।

**VI. प्रग्वहतीयप्रकरणम् -**

"प्राग्वहतेष्ठक्" [४१] सूत्रादारभ्य " आवसथात् ष्ठल् "[४२] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगा: -** वैणिकै:,सारसिक:, यामिकान्, दौहृदिक:, याचितकम्, दौवारिक:, नाविका:, दाम्भिक:, पारिपार्श्विकान्, आसिकता, नास्तिक:, ऐन्द्रजालिक:, वैतालिक:, वैहासिक: इत्यादय:।

**VII. प्राग्घितीयप्रकरणम् -**

"प्राग्घिताद् यत् "[४३] सूत्रादारभ्य "सोदरादय:" [४४] सूत्रपर्यन्तं वर्तते। "भवे छन्दसि" [४५] सूत्रादाभ्य "भावे च" [४६] सूत्रपर्यन्तं ३५ सूत्राणि छन्दसी प्रवर्तन्ते।

**श्रीहर्षीयप्रयोगा: -** वश्या:, युग्य:, धन्या, तुल्या, वयस्यम्, तथ्यवाक्, शरण्यम्, एकधुरीणा, अपथ्यम्, पद्या, पाथेयम्, न्याय्यम्, औरसी, हृद्यै:, आतिथेयीम् इत्यादय:।

**VIII. छयद्विधिप्रकरणम् -**

"प्राक् क्रीताच्छ:" [४७] सूत्रादारभ्य "परिखाया ढञ्" [४८]सूत्रपर्यन्तं भवति।

**श्रीहर्षीयप्रयोगा: -** आत्मनीनम्, आयुष्यम्, शरव्यम्, नाकीयान्, कार्यीया: इत्यादय: वर्तन्ते।

**IX. आर्हीयप्रकरणम् -**

"प्राग्वहतेष्ठञ् "[४९] सूत्रत: "यज्ञर्त्विग्भ्यां घ-खञौ" [५०] सूत्रपर्यन्तं वर्तते।

**श्रीहर्षीयप्रयोगा: -** पण्यम्, साहस्रै:, रुच्य:, पार्थिव:, सार्वभौम, चतुष्कम् इत्यादय:।

**X. ठञधिकारप्रकरणम् (प्राग्वहतीयप्रकरणम्, कालाधिकारश्च) -**

"पारायण-तुरायण चान्द्रायणं वर्तयति" [५१] सूत्रादारभ्य "आकलिकडाद्यन्त-वचने"[५२] सूत्रपर्यन्तं वर्तते।

**श्रीहर्षीयप्रयोगाः -** पथिकः, दाम्भिकः, माङ्गालिकः, आजानिकः, वारयात्रिकाः, तौष्टिकपौष्टिकानि इत्यादयः वर्तन्ते।

**XI. भावकर्माधिकारप्रकरणम् -**

"तेन तुल्यं क्रिया चेद् वतिः"[५३] सूत्रतः "ब्रह्मणस्त्वः"[५४] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** वत्सिमा, वैद्यकम्, मानुष्यकम्, स्तैन्यम्, आचार्यकम्, श्वेतिमा, दाम्पत्यम्, शैष्यकम्, कामनीयकम्, द्रढिमा, दूत्यम्, मौनम्, यौवनम्, पौरुषम्, अणिमा, नीलिमा, चापलम् इत्यादयः सन्ति।

**XII. पाञ्चमिकप्रकरणम् -**

"धान्यानां भवने क्षेत्रे खञ् "[५५]सूत्रतः " इन्द्रियमिन्द्रालिङ्गमिन्द्रदृष्टमिन्द्र-सृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा" [५६] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** श्रोत्रियः, अभिकः, अधित्यकासु, शालीनम्, सहस्रांशम्, चतुर्दशीयम्, अधीती, कर्मठम्, सेवाचणः, अध्वन्यम्, पक्षती, हैयङ्गवीनम्, कोरकितः, पल्लवितः इत्यादयः वर्तन्ते।

**XIII. मत्वर्थीयप्रकरणम् -**

"तदस्यास्त्यस्मिन्निति मतुप् "[५७] सूत्रतः "अहं -शुभमोर्युस् "[५८]- सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** गरुत्मतः, भानुमान्, अंशुमान्, रतवत्, भास्वतः, भगवन्, उदन्वता, पांसुलम्, ग्रहिला, वलिभम्, शशिन्, श्वासमलीमसः,ज्योत्स्नीः, निशीथिनी इत्यादयः।

**XIV. प्राग्दिशीयप्रकरणम् -**

"प्राग्दिशो विभक्तिः" [५९] सूत्रतः "था हेतौ छन्दसि "[६०] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** यथा-तथा, यदा-तदा, अत्र, तत्र, कुत्र, कथम्, इह, क्व, अद्य, मत्तः, इतः, इतरथा, उभयथा, अधुना, इयत् इत्यादयः।

**XV. प्रागिवीयप्रकरणम् -**

"दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः"[६१] सूत्रतः "अवक्षेपणे कन्"[६२] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** द्विधा, एकिका, नैकधा, तीव्रतरैः, सूतराम्, जातचरीम्, वरीयान्, उपरि, महीयसी, पश्चात्, प्रत्यक्, वदामतमाम् इत्यादयः।

**XVI. स्वार्थिकप्रकरणम् -**

"इवे प्रतिकृतौ" [६३] सूत्रतः "मद्रात् परिवापणे" [६४] सूत्रपर्यन्तं प्रवर्तते।

**श्रीहर्षीयप्रयोगाः -** प्रदक्षिणीकृत्य, पङ्क्तीभवत्, अतिथीचकार, गमिकर्मीकृतः, तृणीकृतः, स्वजैत्रम्, मृत्स्ना, पाद्यम्, अर्घ्यम्, वैसारिणः, दुःखाकृता, अलङ्कर्मीणः, बान्धवः, गुणमयम्, अर्थिसात्कृतः इत्यादयः सन्ति।

**XVII. समासान्ताः (पाणिनियसूत्रम् ) -**

समासान्ताः प्रत्ययाः सर्वेऽपीमे "तद्धिताः" [६५] इत्यधिकारे पठिताः वर्तन्ते। अतः समासान्त-प्रयोगविचारोऽपि क्रियतेऽत्र।

उदाहरणार्थं यथा नैषधीयचरिते -

**रसैः कथा यस्य सुधावधीरणी नलः स भुजानिरभूद्गुणाद्भुतः।**
**सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः।।** (नैषध.१.२)

**भूजानिः -** इति समासान्तप्रयोगोऽस्ति।

भूः जाया यस्य इत्यर्थे भू + सु - जाया + सु इतिस्थिते "अनेकमन्यपदार्थे" [६६] सूत्रेण बहुव्रीहिसमासो भवति। ततः "कृत्तद्धितसमासाश्च"[६७] इति समुदायस्य

प्रातिपदिकसंज्ञायां ‘‘सुपोधातु-प्रातिपदिकयो:’’[६८] सूत्रेण सुप: लुग् भवति। भू जाया इति जाते आकारस्थाने ‘‘जायाया निङ्’’[६९] सूत्रेण निङ् आदेशो विधीयते। ‘‘हलन्त्यम्’’[७०] ङकारस्य इत्वे ‘‘तस्य लोप:’’[७१] इति लोपो भवति। भूजानि इति जाते - तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां विशिष्टात् प्रथमाविभक्त्यैकवचने सुप् प्रत्यये उकारलोपे रुत्वे विसर्गे च भूजानि: इति रूपं सिध्यति। महीपति: इत्यर्थ:।

अनया रीत्या मदीयशोधप्रबन्धे प्रस्तोष्यमाणान् अंशान् सङ्ग्रहेण निबन्धेऽस्मिन् प्रादर्शयम्। विबुधा: प्रमाणमत्र इति शम्।

## सन्दर्भा:


१. पाणिनिसूत्रम् - ४.१.७६
२. तत्रैव - ३.१.१
३. तत्रैव - ३.१.२
४. तत्रैव - ४.१.८२
५. तत्रैव - ४.१.१
६. तत्रैव - ६.३.९७
७. तत्रैव - ४.१.९२
८. तत्रैव - २.१.१
९. तत्रैव - ४.१.८३
१०. तत्रैव - ४.१.९५
११. तत्रैव - ४.१.१६२
१२. नैषधीयचरितम् - १.११५
१३.तत्रैव - ४.१.८५
२७. तत्रैव - १.१.४६, २.४.७१
२८. तत्रैव - १.३.३
२९. तत्रैव - १.३.९
३०. तत्रैव - ७.२.११७
३१. तत्रैव - ६.४.१४८
३२. तत्रैव - ४.१.६५
३३. तत्रैव - ६.१.९७
३४. तत्रैव - ४.२.१
३५. तत्रैव - ४.२.६६
३६. तत्रैव - ४.२.६७
३७. तत्रैव - ४.२.९१
३८. तत्रैव - ४.२.१३३
३९. तत्रैव - ४.३.१३४
४०. तत्रैव - ४.३.१६८
४१. तत्रैव - ४.४.१
४२. तत्रैव - ४.४.७४
४३. तत्रैव - ४.४.७५
४४. तत्रैव - ४.४.१०१
४५. तत्रैव - ४.४.११०
४६. तत्रैव - ४.४.१४४
४७. तत्रैव - ५.१.१
४८. तत्रैव - ५.१.१७


□□□

# हैमव्याकरणे कातन्त्रव्याकरणप्रभावः

*श्री अशोक आर्य*
*(शोधछात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

"एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति" इति भगवतः पतञ्जलेः वचनम् ।[१] संस्कृतवाङ्मये विद्यमानानां शब्दानां ज्ञानाय, साधुशब्दप्रयोगाय च साधनं भवति व्याकरणशास्त्रम् । व्याक्रियन्ते शब्दाः अनेनेति व्याकरणम् । तथा च असाधुशब्देभ्यः साधुशब्दानां पृथक्करणाय व्याकरणशास्त्रमुपयुज्यते । इदं च व्याकरणमष्टविधमिति, नवविधमिति च मतद्वयं वर्तते । मतद्वयेऽपि पाणिनीयव्याकरणस्य स्थानमस्त्येव । इतरेषां व्याकरणानामपेक्षया पाणिनीयं विस्तृतं, दुरूहञ्चेत्याशयेन वैयाकरणैः कैश्चित् व्याकरणशास्त्रस्य सरलतया बोधाय कानिचन व्याकरणानि प्रणीतानि । तादृशेषु व्याकरणेषु कातन्त्रव्याकरणमन्यतमं भवति । आचार्येण शर्ववर्मणा इदं व्याकरणं प्रणीतम् । पाणिनीयपरवर्तिषु चत्वारिंशत्संख्याकेषु व्याकरणेषु कातन्त्रं प्रथमं, संक्षिप्तं, सरलं, मूर्धन्यञ्च वर्तते ।

राज्ञः सातवाहनस्य शब्दविद्याधिगमाय शर्ववर्माचार्येणेदमध्यायत्रितये निबद्धमासीत् । एकदा जलक्रीडया श्रान्तिमनुभवन्ती विदुषी राज्ञी "मोदकं देहि" इति वचनं जगाद, तदनन्तरं मोदकसमर्पणकृत्यमवलोक्य राज्ञी व्याकरणज्ञानशून्यं राजानमुपहसितवती । तेन नितान्तं विमना राजा व्याकरणज्ञानमासादयितुं प्रतिजज्ञे । तदीयां प्रतिज्ञां पूरयितुमेवाचार्यः शर्ववर्मा कुमारं कार्तिकेयमाराध्य व्याकरणमिदं निबबन्ध । "मोदकम्" इति पदे "मा + उदकम्" इति सन्धिर्वर्तते, तस्मात् सर्वप्रथमं पञ्चपादात्मकं सन्धिप्रकरणमेकोनाशीतिसूत्रबद्धं (७९) प्रस्तुतम् । "मोदकम्" इति स्यादिपदम् । तस्माद् द्वितीयं प्रकरणं वर्तते नामचतुष्टयम्, इदं षट्सु पादेषु निबद्धं

षड्लिङ्ग-कारक-समास-तद्धितात्मकं सप्तत्रिंशदुत्तरशतत्रयसूत्रात्मकम् (३३७) अस्ति । "देहि" इति आख्यातपदम्, तेन तृतीयं प्रकरणम् आख्यातविषयस्य वर्ततेऽष्टपादात्मकमेकोनचत्वारिंशदुत्तरशतचतुष्टयसूत्रात्मकं (४३९) चेति । शर्ववर्माचार्येण विरचितान्येतावन्त्येव पञ्चपञ्चाशदुत्तराष्टशतमितानि सूत्राणि (८५५) इति ज्ञायते[२] ।

**ग्रन्थाभिधानकृतं वैशिष्ट्यम्**

कु = ईषद् अल्पं संक्षिप्तं वा, तन्त्रम् = व्याकरणं कातन्त्रम् । ईषदर्थककुशब्दस्य "का" आदेशः । "का त्वीषदर्थेऽक्षे" (कात० २/५/२५) । तन्त्र्यन्ते व्युत्पाद्यन्ते शब्दा अनेनेति तन्त्रम् = व्याकरणम् । एवं कातन्त्रमिति संक्षिप्तव्याकरणाभिधानम् । संक्षेपश्च पाणिनीयव्याकरणापेक्षया पूर्ववर्तिसमस्त-व्याकरणापेक्षया वाऽवगन्तव्यः । कार्तिकेयतन्त्रस्य, काशकृत्स्नतन्त्रस्य, कात्यायनतन्त्रस्य, कालापकतन्त्रस्य वा संक्षिप्तं नामधेयं कातन्त्रमित्यपि केचिद् वदन्ति[३] ।

**सूत्रशैलीगतं वैशिष्ट्यम्**

पूर्वाचार्याः कार्यिणं प्रथमान्तम्, कार्यं च द्वितीयान्तमेव निर्दिष्टवन्तः । इमामेव पद्धतिं कातन्त्रकारोऽप्यनुससार । अत एव "समानः सवर्णे दीर्घी भवति परश्च लोपम्" (१/२/१) इति सूत्रे कार्यिणः समानस्य प्रथमया निर्देशः, लोपमिति कार्यस्य च द्वितीयया निर्देशस्तेन कृतः । एवमेव "अकारो दीर्घं घोषवति" (२/१/१४) इत्यादिसूत्रेष्वपि पद्धतिरियं दृश्यते । अत्र पाणिनीयः पन्था भिन्न एव ।

सारल्येन विवक्षितार्थावबोधाय "अवर्ण इवर्णे ए, उवर्णे ओ, ऋवर्णे अर्, लृवर्णे अल्" (१/२/२-५) इति सूत्रचतुष्टयं कृतम्, यदर्थं पाणिनीयं केवलमेकमेव सूत्रमुपलभ्यते – "आद् गुणः" (६/१/८७) इति । एवम् "एचोऽयवायावः" (६/१/७८) इति पाणिनीयाभिप्रेतार्थे "ए अय्, ऐ आय्, ओ अव्, औ आव्" (१/२/१२-१५) इत्येतानि चत्वारि सूत्राणि पृथक्त्वेन कृतानि ।[४]

व्याकरणेऽस्मिन् प्रत्याहाराभावादचो बोधाय "स्वरेऽक्षरविपर्ययः" (२/५/२३) इत्यादौ स्वरपदम्, हलश्च बोधाय "व्यञ्चने चैषां निः" (२/२/३८) इत्यादौ व्यञ्जनपदं च प्रयुक्तम् । पाणिनीयवैदिकप्रकरणे स्वरार्थं येऽनुबन्धा विहितास्ते कातन्त्रे नैव प्रयुज्यन्ते, अत्र वैदिकप्रकरणाभावात् ।

**लोकव्यवहारसमादरवैशिष्ट्यम्**

कातन्त्रे लोकव्यवहारः पाणिनीयादप्याधिक्येन समाद्रियते । तद्यथा – "सिद्धो वर्णसमाम्नायः" (१/१/१) इति सूत्रेण वर्णानां पाठक्रमो लोकप्रसिद्ध एव गृह्यते । अत एवात्र चतुर्दशसु स्वरेषु दीर्घस्वरा अपि पठ्यन्ते । पाणिनीये दीर्घवर्णा नैव सन्ति। कातन्त्रे "ए-ऐ-ओ-औ" इति लोकव्यवहृतः पाठः । पाणिनीये तु कृत्रिमता दृश्यते "ए-ओङ्-ऐ-औच्" इति पाठे।

कातन्त्रे स्वरवर्णानन्तरमनुस्वार-विसर्ग-जिह्वामूलीय-उपध्मानीया अपि पठिताः, अत एव ते योगवाहा भवन्ति, पाणिनीये पाठाभावादेषामयोगवाहत्वम् । किं च पाणिनीये वर्णसमाम्नाये श्-ष्-स्-ह् इत्येतान् हल्वर्णान् विहायान्ये सर्व एव हल्वर्णा व्यत्यासेनैव पठ्यन्ते, तत्रापि च हकारस्य द्विः पाठस्य व्याख्यानप्रयोजनं नैकगम्यम् ।

लोकव्यवहारसाधकमपरम्पयेकं सूत्रं वर्तते – "लोकोपचाराद् ग्रहणसिद्धिः" (१/१/२३) इति । उपचारो व्यवहारः । गृह्यतेऽर्थोऽनेनेति ग्रहणः शब्दः । एतेन लोकव्यवहारात् शब्दसिद्धिर्वेदितव्या इत्यर्थः । केषां शब्दानाम् ? अत्रात्यन्तमनुक्तानां वैदिकानां केषाञ्चिल्लौकिकानां चापि । कलापचन्द्रकारेण कविराजसुषेण विद्याभूषणेनेदमप्युक्तं यद् ये शब्दाः "वा-अपि" इत्यादिशब्दानां सूत्राणां चाप्यनुवृत्त्या न सिद्ध्यन्ति ते लोकव्यवहारप्रसिद्ध्या साधनीयाः ।यथोक्तं[५] –

**वाशब्दैश्चापिशब्दैर्वा शब्दानां (सूत्राणाम्) चालनैस्तथा ।**
**एभिर्येऽत्र न सिद्ध्यन्ति ते साध्या लोकसम्मताः ।।** इति ।

अनया रीत्या बहुभिः प्रकारैः कातन्त्रव्याकरणमितरेषां व्याकरणानामपेक्षया प्रशस्ततरं भवति ।

**हैमव्याकरणम्**

पूर्वोक्तया रीत्या पाणिनीयपरवर्तिषु चत्वारिंशत्संख्याकेषु व्याकरणेषु हैमव्याकरणमपि अन्यतमं भवति ।

**हेमचन्द्रस्य परिचयः**

हैमानुशासनस्य कर्ता श्रीमान् हेमचन्द्रः । अस्य "कालिकालसर्वज्ञः" इति उपाधिः वर्तते । सिद्धराजजयसिंहः मालवदेशाधिपतिं यशोवर्माणं पराजित्य ततः पर्याप्ताः हस्तलेखप्रतीः प्राप्तवान् । तेषु हस्तलेखेषु भोजराजप्रणीतः सरस्वतीकण्ठाभरणाख्यः अपि लब्धः । तं लेखं दृष्ट्वा स्वयमपि व्याकरणस्य रचनां करोमीति चिन्तितवान् । सा इच्छा हेमचन्द्रेण पूरिता । अत एव अस्य व्याकरणस्य नामधेये "सिद्ध"शब्दः योजितोऽस्ति । अस्य व्याकरणस्य रचनाकालः वि.सं.द्वादशे शताब्दे अन्तिमः दशक इति मन्यते ।[६]

**हेमचन्द्रव्याकरणस्य पञ्चाङ्गानि**

इदं व्याकरणं पञ्चभिः अङ्गैः परिपूर्णं वर्तते । तानि च अङ्गानि – (१) सूत्रपाठः (२) धातुपाठः (३) गणपाठः (४) उणादिपाठः (५) लिङ्गानुशासनमिति। एतेषां पञ्चानामुपरि हेमचन्द्रो वृत्तिग्रन्थमपि लिखितवान् । वृत्तिसहितमिदं व्याकरणं पञ्चाशत्सहस्राधिकलक्षश्लोकात्मकमित्यंशः "प्रबन्धचिन्तामणिः" इति ग्रन्थात् ज्ञायते।[७]

**हेमचन्द्रस्य बाल्यम्**

हेमचन्द्रस्य पिता चाचिङ्गमहाशयः । माता पाहिणी (पाहिनी) महोदया । पिता वैदिकमतानुयायी आसीत् । माता तु जैनमतानुयायिनी । हेमचन्द्रः अहमदाबादनगरे वि.सं.११४५ कार्तिकपूर्णिमायां जन्म प्राप्तवान् । हेमचन्द्रस्य बाल्ये चाङ्गदेव इति नाम आसीत् । श्वेताम्बरसम्प्रदायान्तर्गतवज्रशाखायाः आचार्यः चन्द्रदेवः हेमचन्द्रं शिष्यत्वेन स्वीकृत्य सोमचन्द्र इति नामकरणं कृतवान् । ततः सूरिपदस्य प्राप्तिवेलायां हेमचन्द्र इति अस्य नाम आगतम् ।

आचार्यस्य हेमचन्द्रस्य कातन्त्रव्याकरणे महान् आदरः वर्तते । अत एव सः स्वस्य सूत्रेषु प्रायेण आचार्यशर्ववर्माणमेव अनुसरति । बहुषु सूत्रेषु हेमचन्द्रः कातन्त्रमाश्रयतीत्यत्र प्रमाणतया कानिचन सूत्राणि अत्र प्रदर्शयिष्यामि ।

**सोमचन्द्र एव हेमचन्द्रः**

विक्रमस्य ११६६ वत्सरे यदा सोमचन्द्रस्य वयः एकविंशतिः वर्षाणि आसीत् तस्मिन् समये सोमचन्द्रः हेमचन्द्रसूरिः जातः । युवावस्थायामेव असाधारणपाण्डित्य-कारणेन नामधेयस्य परिवर्तनं जातम् ।[८]

**हेमचन्द्रव्याकरणे कातन्त्रस्य प्रभावः**

कातन्त्रव्याकरणे चतुर्दश स्वरवर्णाः प्रतिपादिताः । यथा – अ, आ, इ, ई, उ, ऊ, ऋ, ॠ, लृ, लॄ, ए, ऐ, ओ, औ इति । एते एव स्वरवर्णाः हेमचन्द्रेणापि "औदन्ताः स्वराः" (१/१/४) इति सूत्रेण उक्ताः ।

कातन्त्रव्याकरणस्य प्रथमे पादे स्वर-समान-सवर्ण-ह्रस्व-दीर्घ-नामी-सन्ध्यक्षर-व्यञ्जन-वर्ग-अघोष-अन्तस्थाः इत्यादयः संज्ञाः निर्दिष्टाः । हेमचन्द्रोऽपि इमाः एव संज्ञाः स्वीकृतवान् । कातन्त्रे इव अत्रापि वज्राकृतिवर्णस्य जिह्वामूलीय इति, गजकुम्भकृतिवर्णस्य उपध्मानीय इति व्यवहारः दृश्यते ।[९]

बहूनां ग्रन्थानामध्ययनेन स्पष्टमिदं ज्ञायते यत् आचार्यहेमचन्द्रप्रणीतं सिद्धहैमानुशासनं कातन्त्रव्याकरणमाश्रित्यैव प्रवृत्तमिति । अत्राधस्तात् उभयोरपि व्याकरणयोः केषाञ्चन सूत्राणां साम्यं प्रदर्श्यते ।

| **कातन्त्रम्** | **हैमम्** |
|---|---|
| | **संज्ञाप्रकरणम्** |
| १) सिद्धोवर्णसमाम्नायः (१/१/१) | १) सिद्धिः स्याद्वादात् (१/१/२) |
| २) दश समानाः (१/१/३) | २) लृदन्ताः समानाः (१/१/७) |
| ३) स्वरोऽवर्णवर्जो नामी (१/१/७) | ३) अनवर्णा नामी (१/१/६) |

| | |
|---|---|
| ४) एकारादीनि सन्ध्यक्षराणि | ४) ए-ऐ-ओ-औ सन्ध्यक्षरम् (१/१/८) |
| ५) ते वर्गाः पञ्च पञ्चशः (१/१/१०) | ५) पञ्चको वर्गः (१/१/१२) |

| **कातन्त्रम्** | **हैमम्** |
|---|---|

**सन्धिप्रकरणम्**

| | |
|---|---|
| १) समानः सवर्णे दीर्घी भवति | १) समानानां तेन दीर्घः (१/२/१) |
| २) परश्च लोपम् (१/२/१) | |
| १) अवर्ण इवर्णे ए (१/२/२) | १) अवर्णस्येवर्णादिनैदोदरल् (१/२/६) |
| २) उवर्णे ओ (१/२/४) | |
| ३) ऋवर्णे अर् (१/२/४) | |
| ४) लृवर्णे अल् (१/२/५) | |
| १) एकारे ऐ ऐकारे च (१/२/६) | १) ऐदौत् सन्ध्यक्षरैः (१/१/१२) |
| २) ओकारे औ औकारे च (१/२/७) | २) उपसर्गस्यानिणेधेदीति (१/२/१९) |

## सन्दर्भाः


१. महाभाष्यम् - पस्पशाह्निकम् - पृ.३४
२. कातन्त्रे भूमिकायाम् - पृ.१
३. कातन्त्रे भूमिकायाम् - पृ.४
४. तत्रैव पृ.६
५. कातन्त्रे भूमिकायां पृ.८
६. संस्कृत वाङ्मय का बृहद् इतिहास (भाग - १५) पृ.४५१
७. तत्रैव - पृ.४५२
८. प्रमाणमीमांसायाः प्रस्तावनायां पृ.३८
९. संस्कृत वाङ्मय का बृहदितिहास (भाग - १५) पृ.४५०

## सन्दर्भग्रन्था:

१) कातन्त्रव्याकरणम्, सम्पादकः - जानकीप्रसादद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी - १९९७

२) हैमव्याकरणम्, सम्पादकः - विजयमुनिः, उमरा, सूरत - २०१२

३) व्याकरणमहाभाष्यम् - चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली - १९९२

४) संस्कृत वाङ्मय का बृहद् इतिहास – रामलाल कपूर ट्रष्ट, वहालगड़, हरिआणा, १९७८

५) प्रबन्धचिन्तामणिः, सरस्वतीपुस्तकभण्डार, पाटणा, गुजरात - १९३३

६) प्रमाणमीमांसा, सरस्वतीपुस्तकभण्डार, पाटणा, गुजरात - १९८९

□□□

# लम्बनसाधनम्

*राजश्री पाढी*
*(शोधच्छात्रा, ज्योतिषविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः -**

सूर्यग्रहणे यद्वैशिष्ट्यं तयोः लम्बन - नतिसंज्ञयोः अर्थात् नतिलम्बनयोरभावेन अमायां सूर्यग्रहणं सम्भवति। लम्बनं नाम सूर्यग्रहणे विभिन्नकक्षोः रवीन्दूभूगर्भाभिप्रायेण समावपि पृष्ठक्षितिजाप्रायेण लम्बितौ भवतः । अतः गर्भीयग्रहात् पृष्ठीयग्रहो यावान् लम्बितस्तावान् लम्बन(पूर्वपरान्तरम्) मुच्यते तथा रविगोले यत्र क्रान्तिवृत्ते रविस्तद्गतं भूगोलकेन्द्राद्यत् सूत्रं भवेत्तद्गर्भसूत्रं, तद्यत्र चन्द्रगोले लग्नं तत्र गर्भीयरविः । तथा च पृष्ठस्थानाद्रविगोलीयरविगतं सूत्रं पृष्ठसूत्रं, तद्यत्र चन्द्रगोले लग्नं तत्र पृष्ठीयरविः। अत्र गर्भसूत्र-पृष्ठसूत्र-भूव्यासार्धेति त्र्यवयवजनितत्रिभुजस्य दृङ्मण्डलभूतलगतत्वाच्चन्द्र-गोले यत्र पृष्ठीयरविः पृष्ठीयसूत्रच्छिन्नचन्द्रगोलप्रदेशे सिद्धस्तदुपरिगतं दृङ्मण्डलं गर्भीयरविगतं भवत्येवातस्तद्दृङ्मण्डले पृष्ठीयग्रहादगर्भीयग्रहावधिदृग्लम्बनमुच्यते । दृग्वृत्तीयं लम्बनं दृग्लम्बनमिति ।

तत्र पृष्ठीयरव्युपरिगतकदम्बप्रोतवृत्तक्रान्तिवृत्तयोः सम्पाताद्गर्भीयग्रहावधि-क्रान्तिवृत्तेः स्पष्टलम्बनमुच्यते । पृष्ठीयरव्युपरिगतकदम्बप्रोतवृत्तेः पृष्ठीयग्रहात् क्रान्तिवृत्तावधि नतिरुच्यते। तत्र चन्द्रगोले गर्भसूत्रात् पृष्ठसूत्रस्य खस्वस्तिकासन्न-स्थितत्वात् पृष्ठीयरविः खस्वस्तिकासन्नस्थः, परन्तु गर्भीयपृष्ठीयसूत्रद्वयं रविगोलीय-रविकेन्द्रे योगं कृत्वोपरिभागे भगोलावधिवर्धितं सत् खमध्यासन्नस्थो गर्भीयरविरेव भवति। क्षितिजासन्नस्थपृष्ठीयरविरेव भवति । तत्र चन्द्रगोले परकपाले रविगत्यधिक-गतिवांश्चन्द्रः स्वगत्या प्रथमं गर्भीयरविणा सह योगं कृत्वा तदनु पृष्ठसूत्रस्थपृष्ठीयरविणा

मिलित्वा पश्चाद्गर्भीयरविणा मिलत्यतः प्रथमं तत्र गर्भीयदर्शान्तः पश्चात् पृष्ठीयदर्शान्तो भवति । पूर्वकपाले तु चन्द्रः प्रथमं पृष्ठसूत्रस्थपृष्ठीयरविणा मिलित्वा पश्चाद्गर्भीयरविणा मिलत्यतः पूर्वकपाले प्रथमं पृष्ठीयदर्शान्तः पश्चाद्गर्भीयदर्शान्तः सम्भवति, तत्र गर्भीयपृष्ठीयदर्शान्तकालयोरन्तरं लम्बनकालः ।

**लम्बनसाधनप्रक्रिया -**

वस्तुतः सूर्यग्रहणे भगोले लम्बितयोः रविचन्द्रयोर्लम्बनान्तरवशेन स्पष्टलम्बनघटीभिर्भवितव्यम् । अत उक्तविधिना रविचन्द्रयोः पृथक्-पृथक् लम्बनघटिका भवितुमर्हति । तत्र सूर्यस्य शराभावात् तत्कोटिज्या = त्रि तथा ग्रहणे चन्द्रशरस्य परमाल्पत्वात् स्वल्पान्तरात् तत्कोटिज्याऽपि त्रिज्यासमा, तथा लम्बनस्य परमाल्पत्वात् तत्त्यागात् लं. = 0 तदा ज्या (अं + लं) = ज्या अं, इत्थमेवाङ्गीकृत्य लम्बनघटिकाः साधिता आचार्येण यथा -

$$\text{लम्बनघटिकाः} = \frac{4 \times \text{ज्या अं} \times \text{विंश}}{\text{त्रि}^2} = \frac{\text{ज्या अं}}{\frac{\text{त्रि}^2}{4\ \text{विंश}}} = \frac{\text{ज्यां अं}}{\text{फल}}$$

$$\therefore \frac{\text{त्रि}^2}{4\ \text{विंश}} = \text{फल}$$ । +अत उपपन्नमाचार्योक्तम् ।

एवं रविचन्द्रयोः पृथक् पृथक् लम्बनघटिकाः भवेयुः । परं च सूर्यग्रहणे रविचन्द्रस्थानयोरत्यल्पान्तरत्वात्साम्यं, तयोर्लम्बनयोश्च परमाल्पत्वात् तयोरभेदं च स्वीकृत्य केवलं तयोः परमलम्बनान्तरवशादेव स्पष्टलम्बनान्तरघटिकारूपं स्पष्टलम्बनं साधितमाचार्येणेति बोद्धव्यम् ।

---

* अं = अंश

अत्र स्पष्टदर्शान्ततो लम्बनानयनं साधु भवितुमर्हति । परमत्र दर्शान्तस्थाने पूर्णान्त एव गृहीतः, तत्रापि स्पष्टपूर्णान्तस्याज्ञानात् गणितागतपूर्णान्तत एव लम्बनं साधितमतस्तत्स्थूलमित्यतोऽसकृद्विधिना स्पष्टलम्बनं साधितमाचार्येणेति । परन्तु यस्य स्पष्टलम्बनस्याऽऽनयनं क्रियते तस्यैव मानं शून्यं तथा शरकोटिज्या = त्रि स्वीकृता, ज्याचापयोरभेदत्वजनितदोषोऽपि वर्त्तत एवात आचार्योक्तमिदमानयनं न समीचीनमिति ।

एतेनैव - ''[1]वेदघ्नशङ्कुविहतात् त्रिगुणस्य वर्गाल्लब्धेन वित्रिभदिनेशविशेषजीवा। भक्ता विलम्बनमिदं ह्युदितं दिनेशे न्यूनाधिके धनमृणं त्रिगृहो न लग्नात्'' । इति सिद्धान्तशेखरे श्रीपत्युक्तमाचार्योक्तानुरूपमप्युपपद्यते ।

**तथा च भास्कराचार्यः -**

[2]''त्रिभोनलग्नार्कविशेषशिंजिनी कृताहता व्यासदलेन भाजिता । हृतात् फलाद्वित्रिभलग्नशङ्कुना त्रिजीवयाप्तं घटिकादिलम्बनम्'' । इति आचार्योक्तानुरूपमेव।

$$\text{अत्र पूर्वोक्तलम्बनघटी} = \frac{\text{ज्या अं}}{\frac{\text{त्रि}^2}{4 \times \text{विशं}}} = \frac{\text{ज्या अं}}{\frac{(\text{त्रि}/2)^2}{\text{विंश}}}$$

$$= \frac{\text{ज्यां अं}}{\frac{\text{एकराशिज्या}^2}{\text{विंश}}} = \frac{\text{ज्या अं}}{\frac{\text{एकराशिज्या}^2}{\text{दृग्गतिज्या}}} = \frac{\text{ज्या अं}}{\text{छेदः}}$$

$$\text{अत्र} \quad \frac{\text{एकरा. ज्या}^2}{\text{दृग्गतिज्या}} = \text{छेदः ।}$$

एतेन सूर्यसिद्धान्तोक्तमुपपद्यते । **तद्यथा सूर्यसिद्धान्ते -**

[3]''एकज्यावर्गतश्छेदो लब्धं दृग्गतिजीवया ।
मध्यलग्नार्कविश्लेषज्या छेदेन विभाजिता ॥

रवीन्द्वोर्लम्बनं ज्ञेयं प्राक्पश्चाद्‌घटिकादिकम् ॥''

अत्र परमतेष्वानयनेषु न कश्चिदभेद इति ।

**अथात्र वास्तवानयनमुच्यते -**

अथ $\frac{\text{पलंज्या} \times \text{पृ दृज्या}}{\text{त्रि}} = \text{दृलंज्या}$

परन्तु पृदृज्या = ज्या (न + लं) । अत्र गर्भीयनतांशाः = न, दृग्लम्बनम् = लं ।

ततः - [४]''चापयोरिष्टयो'' रित्यादिना -

$$\frac{\text{पलंज्या}}{\text{त्रि}} \times \frac{(\text{दृज्या} \times \text{लंकोज्या} + \text{लंज्या} \times \text{शं})}{\text{त्रि}} = \text{लंज्या},$$

छेदगमेन - पलंज्या दृज्या X लंकोज्या + पलंज्या X लंज्या X शं = $\text{त्रि}^2$ X लंज्या

समशोधनेन - $\text{त्रि}^2$ X लंज्या - पलंज्या X लंज्या X शं + पलंज्या X दृज्या X लंकोज्या = लंज्या ($\text{त्रि}^2$ - पलंज्या X शं)

अतः $\frac{\text{लंज्या}}{\text{लंकोज्या}} = \frac{\text{पलंज्या} \times \text{दृज्या}}{\text{त्रि}^2 - \text{पलंज्या} \times \text{शं}}$ पक्षौ द्वादशगुणितौ

तदा $\frac{\text{लंज्या} \times 12}{\text{लंकोज्या}} = \frac{\text{पलंज्या} \times \text{दृज्या} \times 12}{\text{त्रि}^2 - \text{पलंज्या} \times \text{शं}}$

$$\frac{\dfrac{\text{पलंज्या} \times \text{दृज्या} \times 12}{\text{पलंज्या} \times \text{शं}}}{\dfrac{\text{त्रि}^2}{\text{शं} \times \text{पलंज्या}} - 1} = \frac{\text{इछाया}}{\dfrac{\text{त्रि}^2}{\text{शं} \times \text{पलंज्या}} - 1}$$

= दृग्लम्बनतुल्याक्षदेशीयपलभा ।

अतो येऽक्षांशास्तदेव दृग्लम्बनमेतेन म.म. पण्डित श्री सुधाकरद्विवेदिनोक्त-सूत्रमवतरति- [५]''त्रिज्याकृतिः परमलम्बनमौर्विकाप्तान्न भाजिता च विधुना रहिताऽथ तेन । भक्तेष्टभा फलमितां पलभां प्रकल्प्य साध्या पलांशकलिकेष्टविलम्बनं वा।।'' एतद्वशेन स्पष्टलम्बनज्ञानं भवेदिति।

तथा च -

**[६]''गर्भीयशङ्कुगुणिता परलम्बनशिंजिनी**
**तथा त्रिज्याकृतिर्भक्ता फलं रूपोनितं च यत् ।**
**तदुद्भूतेष्टभायास्तु नतांशज्या विलोमतः**
**दृष्टिलम्बनजीवा स्यात् स्पष्टं लम्बनकं ततः ।।''**

इत्यनेन सिद्धं यद् गर्भीयनतांशवशात् परमलम्बनसमनतांशे छायाज्ञानं भवितुमर्हति । ततश्छायातो नतांशज्यानयनविधिना या नतांशज्या सा दृग्लम्बनज्या भवेत् । तदुक्तवत्स्पष्टलम्बनायनं स्यादेव । इत्येनन सकृदेव लम्बनानयमुपपद्यते ।

अत्रैव यदि स्वल्पान्तरात् लंकोज्या = त्रि

तदा पूर्वसमीकरणेन -

$$\frac{\text{लंज्या}}{\text{त्रि}} = \frac{\text{ज्यादृ} \times \text{ज्यापलं}}{\text{त्रि}^2 - \text{ज्यापलं} \times \text{श}}$$

$$\therefore \text{लंज्या} = \text{ज्यादृलं लंकोज्या} = \text{कोज्यादंल}$$

$$\therefore \text{लंज्या} = \frac{\text{ज्या दृ} \times \text{ज्या पलं}}{\text{त्रि} - \frac{\text{ज्या पलं} \times \text{शं}}{\text{त्रि}}}$$

**अनेन संशोधकोकतम -**

> **बृहज्ज्यकाभिर्ग्रहशङ्कुदृग्ज्ये**
> **साध्ये हते ते पललम्बनस्य ।**
> **कलाभिराद्यान्यसमाह्वये स्त-**
> **स्त्रिज्योद्धृताद्योनितया त्रिमौर्व्या ॥**
> **अन्यो विभक्तः समवाप्ततुल्याः**
> **खेटस्य दृग्लम्बनलिप्तिकाः स्युः ॥**

इति उपपद्यते ।

अथ यदि पूर्वोक्तसमीकरणे -

$$\text{ज्या स्पलं} = \text{ज्या लं} = \frac{\text{ज्या (अं + लं)}}{\text{त्रि}} \times \frac{\text{विशं} \times \text{पलंज्या}}{\text{शकोज्या}}$$

$$\text{अत्र यदि} \quad \frac{\text{ज्या पलं} \times \text{विशं}}{\text{शकोज्या}} = \text{परमलम्बनज्या}$$

= ज्या पलं , कल्प्यते । तदा -

$$\text{ज्या पलं} = \frac{\text{ज्या पलं}}{\text{त्रि}} \times \text{ज्या (अं + लं)}$$

एतेन ''[७]अथ कला याः परलम्बनस्य त्रिभोनलग्नस्य नरेण निघ्न्याः । खेटेषु कोटिज्याकया विभक्ताः कल्प्याः कलास्ताः परलम्बनस्य ।'' इति संशोधकोक्तं तथा ''[८]त्रिभोनलग्नस्य नरस्त्रिभूघ्नो दन्तैः विभक्तः परसंज्ञकः स्यात् ।'' इत्यादि भास्करोक्तं चोपपद्यते। अत्र भास्करस्य परो न समीचीनस्तेन लम्बने स्थूलता भवत्यत एव वासनाटीकायां स्वयमेव भास्कराचार्यः ''एतदानयनं किञ्चिस्थूलम्'' इत्याह ।

**प्रकारान्तरेणाचार्योक्तिलम्बनायनमाह -**

**[९]कर्णगुणाद् व्यासार्धाद् वसुवेदविभाजितात्फलविभक्ता ।**
**लम्बननाड्यो भास्करवित्रिभलग्नान्तरज्या वा ।।**

अर्थाद् व्यासार्धात् (त्रिज्यातः) कर्णगुणात् (वित्रिभलग्नच्छायाकर्णगुणितात्) वसुवेद 48 भक्ताद्यत् फलं तेन भास्करवित्रिभलग्नान्तरज्या (वित्रिभलग्नाक्रान्तिज्या) भक्ता तदा वा (प्रकारान्तरेण) लम्बनाड्यो भवेयुरिति ।

**तथा च श्रीपतिः -[१०]**

**''श्रुतिसंगुणात् त्रिभगुणाद्विभाजिता -**
**द्वसुसागरैरथ फलेन वा हृता ।**
**रविवित्रिभोदयवियोगशिंजिनी**
**घटिकादिलम्बनमिहासकृत् भवेत् ।।''**

इति आचार्योक्तानुरूपमेवास्ति ।

एवं स्पष्टदर्शान्तस्याज्ञानात् गणितागतदर्शान्तकाले लम्बनमानमानीतम- तोऽसकृद्विधिना (वारं-वारं) अवशेषपर्यन्तमानीतस्फुटदर्शान्तकालेऽसकृत् साधितं स्फुटलम्बनं वास्तवमिति । परन्तु पूर्वोक्तिस्थौल्यमत्रापि वरीवर्ति इति स्पष्टमेव विदुषाम् ।

**उरसंहारः -**

तल्लम्बनस्याभावः खस्वस्तिके भवति गर्भपृष्ठसूत्रयोरेकत्वात् न तदन्तरसंभवः, अथ क्रान्तिवृत्तक्षितिजवृत्तसम्पातः प्राग्भागतः प्रथमलग्नमुच्यते, तस्मान्नवत्यंशैर्यद्वृत्तं तद् दृक्क्षेपवृत्तमुच्यते, तद्यत्र खत्वस्तिकासन्नभागे क्रान्तिवृत्ते लगति तत्र वित्रिभलग्नम् । तत्र दृक्क्षेपवृत्तौ यदा रविर्यात् तदा दृग्वृत्तकदम्बप्रोतवृत्तयोरैक्यात् क्रान्तिवृत्तेऽन्त- राभावात्तत्र स्पष्टलम्बनाभावः।

अनेन प्रकारेण वस्तुतः रवेःश्चन्द्रस्य च पृथक् लम्बनमुपपद्यते। लम्बनयोरल्प- त्वाद्रविग्रहणे द्वयोः स्थानयोश्च स्वल्पातरात् साम्यात् तयोः परमलम्बनान्तरवशेन स्फुटलम्बनान्तरघटिका एव आनीता आचार्यैरिति। एवं स्फुटदर्शान्ताज्ञानाद्

गणितागतदर्शान्ते लम्बनमानीतमतोऽसकृद्विधिनाऽऽनीतस्फुटदर्शान्तेऽसकृत्कर्मणा भवं स्फुटलम्बनं च वास्तवमिति।

## सन्दर्भाः

1. सिद्धान्तशेखरे सूर्यग्रहणाधिकारे श्लोकः 3
2. सिद्धान्तशिरोमणौ सूर्यग्रहणाधिकारे श्लोकः 4
3. सूर्यसिद्धान्ते सूर्यग्रहणाधिकारे श्लोकः 7-8
4. सिद्धन्ताशिरोमणौ गोलाध्याये ज्योप्तति श्लोकः 21
5. सूर्यसिद्धान्तस्य सुधावर्षिणीटीकायां पृ. संख्या. 172
6. सूर्यसिद्धान्तस्य तत्त्वामृतभाव्योपपत्ति टिप्पण्यां पृ. संख्या 176
7. उपपत्तीन्दुशेखरे पृ. संख्या. 414
8. सिद्धान्तशिरोमणौ सूर्यग्रहणाधिकारे श्लोकः - 7-9
9. ब्रह्मस्फुटसिद्धान्ते सूर्यग्रहणाधिकारे श्लोकः 5
10. सिद्धान्तशिरोमणौ सूर्यग्रहणाधिकारे श्लोकः 4

## परिशीलितग्रन्थसूची

1. सिद्धान्तशेखरः - श्रीपतिप्रणीतः, श्रीबवुआजिमिश्रेण प्रकाशितः।
2. सिद्धान्तशिरोमणिः - भास्कराचार्यविरचितः, पं. श्री मुरलीधर, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी, 1978
3. सूर्यसिद्धान्तः सुधावर्षिणीटीकासहितः - म.म.पं. सुधाकरद्विवेदी टीकाकरः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी, 1978
4. सूर्यसिद्धान्तः - श्रीतत्त्वामृतटीका, पं. कपिलेश्वरशास्त्रिणा सम्पादितः, 1946 ई. सन्
5. ब्राह्मस्फुटसिद्धान्तः - गणकचक्रचूडामणि श्रीब्रह्मगुप्तविरचितः, म.म.पं.सुधाकरद्विवेदी कृतनूतनतिलक समेतः, 1999
6. उपपत्तीन्दुशेखरः - म.म.पं. श्री दुर्गाप्रसाद द्विवेदी लेखकः।

□□□

# हेत्वाभासलक्षणे सर्वांशे प्रमात्वविचारः

***ओ.जि.पि.कल्याण शास्त्री***
*(शोधच्छात्रः, न्यायविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

'अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वम्'[1] प्रथमदोषसामान्य-लक्षणम्। 'ह्रदो वह्निमान् धूमात्' इति स्थलीयबाधे समन्वयस्तु इत्थम् - अनुमितिः - 'ह्रदो वह्निमान्' इत्यनुमितिः, तत्कारणीभूतः यः अभावः - बाधनिष्टायाभावः (प्रतिबन्धकसंसर्गाभावस्य कार्यमात्रं प्रति कारणत्वम् इति नियमः। बाधनिष्टायस्य अनुमितिं प्रति विरोधित्वं वर्तते, अतः तदभावः अनुमितिं प्रति कारणम्) तत्प्रतियोगि यत् यथार्थज्ञानं, ह्रदो वह्न्यभाववान् इति निष्टायः, तद्विषयत्वं वह्न्यभाववद्ध्रदे इति ।

उदासीनघटेऽतिव्याप्तिवारणाय लक्षणं एवं परिष्करणीयम् - प्रकृतानुमितित्वव्यापक-प्रतिबध्यतानिरूपितप्रतिबन्धकताशालियथार्थज्ञानविषयत्वम्। अत्र लक्षणे यथार्थपदाभावे सद्धेतौ 'पर्वतो वह्निमान्' इत्यत्र 'पर्वतो वह्न्यभाववान्' इति बाधभ्रमैकदेशे वह्न्यभावेऽतिव्याप्त्यापत्तिः। तथा हि - प्रकृतानुमितिः - 'पक्षः साध्यवान्, साध्यव्याप्यहेतुमाँष्टा इत्याकाराकानुमितिपरं वा'[2] इति दीधितिकारवचनात् 'पर्वतो वह्निमान्, वह्निव्याप्य धूमवाँष्टोति', तादृशानुमितित्वव्याक-प्रतिबध्यतानिरूपितप्रतिबन्धकता 'पर्वतो वह्न्यभाववान्' इति निष्टायनिष्ठा, तच्छालिज्ञानं - 'पर्वतो वह्न्यभाववान्' इति ज्ञानं, तद्विषयत्वं - वह्न्यभावे पर्वते च वर्तते इति। यथार्थपदनिवेशे तु 'पर्वतो वह्न्यभाववान्' इति ज्ञानस्य वह्न्यभावावाभाववति (वह्निमति) वह्न्यभावप्रकारकत्वेन अयथार्थतत्वात् न तद्ज्ञानमादाय दोषप्रसक्तिः । परन्तु , एवमपि 'पर्वतो वह्निमान्' इत्यत्र बाधभ्रमैकदेशे अतिव्याप्तिः तदवस्थैव। 'पर्वतो वह्न्यभाववान्' इति ज्ञानस्य पर्वततत्ववति पर्वतत्वप्रकारकत्वेन यथार्थत्वमस्त्येव। अतः पुनः तद्ज्ञानस्य स्वीकारसंभवात्, तद्ज्ञानविषयताश्रयत्वस्य वह्न्यभावे सत्वादतिव्याप्तिः।

अतः यथार्थपदेन लक्षणे सर्वांशे प्रमात्वं विवक्षणीयम्। यथार्थपदेन स्वव्यधिकरणप्रकारवच्छिन्ना या या विषयता तत्तदनिरूपकत्वस्य सर्वांशे प्रमात्वस्य

विवक्षणीयतया दर्शितभ्रमाणां किञ्चिदंशे प्रमात्वेऽपि न तानादाय दोष इति भावः[3]। यादृशविशेष्यतायाः स्वपदेनोपादाने तादृशविशेष्यत्वाधिकरणावृत्तिः प्रकारः प्रसिद्ध्यति तादृशविशेष्यतैव स्वपदेन ग्राह्या। एवञ्च पूर्वोक्तस्थले यथार्थज्ञानपदेन 'पर्वतो वह्न्यभाववान्' इति ज्ञानं ग्रहीतुं न शक्यते, स्वपदेन तद्ज्ञानीयपर्वतनिष्ठविशेष्यतायाः ग्रहणे तादृशविशेष्यताव्यधिकरण यः प्रकारः वह्न्यभावाख्यः तन्निष्ठप्रकारतानिरूपिता या विशेष्यता पर्वतनिष्ठविशेष्यता, तन्निरूपकत्वमेव 'पर्वतो वह्न्यभाववान्' इति ज्ञाने वर्तते न तु अनिरूपकत्वम् इति न तद्ज्ञानस्य याथार्थ्यमिति न दोषः। स्वव्यधिकरण-प्रकारावच्छिन्ना या या विषयता तत्तदनिरूपकत्वं इति परिष्कारे या या इति वीप्सायाः अनादरे पुनः 'पर्वतो वह्न्यभाववान्' इति ज्ञानस्य प्रमात्वापत्तिः। 'जलं वह्निमत्' इति ज्ञानीयजलनिष्ठविशेष्यतायाः स्वपदेनग्रहणे तद्व्यधिकरणः प्रकारः वह्निरूपः तन्निष्ठप्रकारतानिरूपिता जलनिष्ठविशेष्यता तन्निरूपकत्वं 'जलं वह्निमत्' इति ज्ञाने, अनिरूपकत्वं 'पर्वतो वह्न्यभाववान्' इति ज्ञानेति 'पर्वतो वह्न्यभाववान्' इति ज्ञानस्य यथार्थत्वेन तद्ज्ञानमादायातिव्याप्तितादावस्थ्यात्। अतो या येति वीप्सादारः। वीप्सायाः यावदर्थकतया, तादृशयावदन्तर्गता 'पर्वतो वह्न्यभाववान्' इति ज्ञानीया पर्वतनिष्ठ-विशेष्यताऽपि, तद्व्यधिकरणः प्रकारः वह्न्यभावात्मकः तन्निष्ठप्रकारतानिरूपिता पर्वतनिष्ठविशेष्यता तन्निरूपकत्वमेव 'पर्वतो वह्न्यभाववान्' इति ज्ञाने न तु अनिरूपकत्वम् इति न दोषः ।

स्वव्यधिकरणप्रकारवाच्छिन्नत्वं स्वव्यधिकरणनिष्ठप्रकारतानिरूपकत्वम्। अत्र स्वव्यधिकरणत्वं यदि स्वानधिकरणवृत्तित्वं, तदा 'घटो द्रव्य'मिति ज्ञानस्य प्रमात्वानुपपत्तिः। स्वपदेन घटनिष्ठविशेष्यतायाः ग्रहणे, तादृशविशेष्यताधिकरणं घटः तदनधिकरणं - पटः, तद्वृत्तिः यः प्रकारः द्रव्यत्वाख्यः तन्निष्ठप्रकारतानिरूपिता घटनिष्ठविशेष्यता, तन्निरूपकत्वस्यैव 'घटो द्रव्यम्' इति ज्ञाने सत्वात्। अतः स्वव्यधिकरणत्वं न स्वनाधिकरणवृत्तित्वं किन्तु स्वाधिकरणावृत्तित्वम्। एवं सति न पूर्वोक्तदोषः । घटनिष्ठविशेष्यतायाः स्वपदेन ग्रहणमेव न संभवति, तादृशविशेष्यताधिकरणघटवृत्तित्वस्यैव द्रव्यत्वरूपप्रकारे सत्वात्, किन्तु 'जलं वह्निमत्' इति ज्ञानीया जलनिष्ठविशेष्यता ग्राह्या, तदधिकरणजलावृत्तिः यः प्रकारः वह्न्याख्यः, तन्निष्ठप्रकारतानिरूपिता जलनिष्ठविशेष्यता, तन्निरूपकत्वं 'जलं वह्निमत्' इति ज्ञाने, अनिरूपकत्वं 'घटो द्रव्यं' इति ज्ञाने इति ।

अत्र स्वाधिकरणावृत्तित्वं नाम स्वाधिकरणवृत्तित्वाभावः। तच्च वृत्तित्वं केन सम्बन्धेन बोध्यते इति विचार्यते। सम्बन्धसामान्येन वृतित्वं बोध्यते यदि, तदा 'ह्रदो वह्निमान्' इति ज्ञानस्य प्रमात्वापत्तिः। ह्रदनिष्ठविशेष्यतायाः स्वपदेन ग्रहणे स्वाधिकरणह्रदनिरूपित-कालिकसम्बन्धावच्छिन्नवृत्तित्वं वह्नौ वर्तते एव, कालस्य सर्वाधारत्वात् । अतः ह्रदनिष्ठविशेष्यता स्वपदेन न ग्राह्या, किन्तु 'घटो गगनवान्' इति ज्ञानीया घटनिष्ठविशेष्यता ग्राह्या तदधिकरणघटनिरूपितकालिकसम्बन्धावच्छिन्नवृत्तित्वं गगने नास्ति, गगनस्य नित्यत्वात्, नित्येषु कालिकाऽयोगात्। तथा च घटाधिकरणावृत्तिः यः प्रकारः गगनरूपः, तन्निष्ठप्रकारता- निरूपिता घटनिष्ठविशेष्यता, तन्निरूपकत्वं 'घटो गगनवान्' इति ज्ञाने, अनिरूपकत्वं 'ह्रदो वह्निमान्' इति ज्ञाने इति 'ह्रदो वह्निमान्' इति ज्ञानस्य प्रमात्वप्रसङ्गः।

अतः वृत्तित्वं प्रकारतावच्छेदकसम्बन्धेन बोध्यम् । ह्रदे कालिकसम्बन्धेन वह्नेः वृत्तित्वेऽपि प्रकारतावच्छेदकसंयोगसम्बन्धेन वृत्तित्वं नास्ति, अतः ह्रदनिष्ठविशेष्यतायाः स्वपदेन ग्रहणे, स्वाधिकरणह्रदनिरूपतिप्रकारतावच्छेदकसंयोगसम्बन्धावच्छिन्न-वृत्तित्वाभाववान् यः प्रकारः वह्निरूपः, तन्निष्ठप्रकारतानिरूपिता ह्रदनिष्ठविशेष्यता, तन्निरूपकत्वस्यैव 'ह्रदो वह्निमान्' इति ज्ञाने सत्वात् न तद्ज्ञानस्य प्रमात्वम्। परन्तु एवं सति 'गुणः संयोगेन घटवान्' इति ज्ञानस्य प्रमात्वापत्तेः। गुणनिष्ठ-विशेष्यताधिकरणगुणनिरूपितप्रकारतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वस्या-प्रसिद्धत्वात् स्वपदेनगुणनिष्ठविशेष्यता ग्रहीतुं न शक्यते। किन्तु 'घटो गगनवान्' इति ज्ञानीया घटनिष्ठविशेष्यतैव, तदधिकरणघटनिरूपितप्रकारतावच्छेदकसंयोगसम्बन्धावच्छिन्न-वृत्तित्वाभाववान् यः प्रकारः गगनाख्यः तन्निष्ठप्रकारतानिरूपिता घटनिष्ठविशेष्यता तन्निरूपकत्वं 'घटो गगनवान्' इति ज्ञाने, अनिरूपकत्वं 'गुणः संयोगेन घटवान्' इति ज्ञाने इति तद्ज्ञानस्य प्रमात्वापत्तिः ।

एतद्दोषवारणाय प्रकारतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन स्वाधिकरणनिरूपितवृत्तित्वस्याभावः प्रकारताश्रयधर्मे विवक्ष्यते । एवं च न पूर्वोक्तज्ञानस्य प्रमात्वप्रसङ्गः। स्वपदेन गुणनिष्ठविशेष्यतायाः ग्रहणे, तदधिकरणगुणनिरूपित-प्रकरतावच्छेदकसंयोगसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन वृत्तित्वाभाववान् यः प्रकारः घटात्मकः, संयोगसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धस्य गुणनिरूपितवृत्तित्व-

व्यधिकरणत्वात्। अतः तादृशप्रकारतानिरूपिता गुणनिष्ठविशेष्यता, तन्निरूपकत्वमेव 'गुणः संयोगेन घटवान्' इति ज्ञाने वर्तते नत्वनिरूपकत्वं इति न पूर्वोक्तदोशः ।

एवमपि पुनः दोषः। विशेषरूपेण सम्बन्धत्वस्वीकारे 'घटत्वप्रतियोगिकसमवायेन पटत्ववान् पटः' इति ज्ञानस्य प्रमात्वापत्तिः। स्वपदेन पटनिष्ठविशेष्यता ग्रहीतुं न शक्यते, यतः तादृशविशेष्यतावद्पटनिरूपितप्रकारतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन वृत्तित्वमेव पटत्वाख्ये प्रकारे वर्तते न तु वृत्तित्वाभावः इति 'घटो गगनवान्' इति ज्ञानीया घटनिष्ठविशेष्यतैव ग्राह्या, तादृशविशेष्यतावद्घटनिरूपितप्रकारतावच्छेदकसमवायसम्बन्धावच्छिन्नवृत्तित्वीयस्वरूपसम्बन्धेन वृत्तित्वाभाववान् यः प्रकारः गगनात्मकः, तन्निष्ठप्रकारतानिरूपिता घटनिष्ठविशेष्यता, तन्निरूपकत्वं 'घटो गगनवान्' इति ज्ञाने, अनिरूपकत्वं 'घटत्वप्रतियोगिकसमवायेन पटत्ववान् पटः' इति ज्ञाने।

अतः संसर्गतावच्छेदकतापर्याप्तिः निवेश्या। तन्निवेशे परिष्कारस्तु इत्थं भवति- प्रकारतानिरूपतिसंसर्गनिष्ठावच्छेदकतानिरूपितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकधर्मावच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकसंसर्गनिष्ठावच्छेदकतानिरूपकवृत्तित्वीयस्वरूपसम्बन्धेन स्वाधिकरणनिरूपितवृत्तित्वाभावो विवक्षणीयः ।

तथा च उक्तज्ञानीयपटत्वनिष्ठप्रकारतानिरूपितसमवायनिष्ठावच्छेदकतानिरूपितावच्छेदकत्तात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं यत् घटत्वप्रतियोगिकत्वसमवायत्वनिष्ठद्वित्वं तदवच्छिन्नानुयोगिकपर्याप्तिकावच्छेदकतानिरूपकघटत्वप्रतियोगिकसमवायनिष्ठावच्छेदकतानिरूपक वृत्तित्वीयस्वरूपसम्बन्धस्य तद्ज्ञानीयविषयताश्रयपटनिरूपितवृत्तित्वस्य व्यधिकरणसम्बन्धतया तत्सम्बन्धावच्छिन्नतदभावस्य पटत्वरूपप्रकारे सत्त्वात् न तत्सङ्ग्रहः।

## सन्दर्भाः

1. हेत्वाभाससामान्यनिरुक्तिः, पु.२.
2. तत्रैव, पु.२७
3. तत्रैव, पु.६५
4. सामान्यनिरुक्तिविवेचनी, पु.३१

□□□

# भारतीयदर्शनेषु पदार्थाः

***सत्यजित पण्डा***
*(शोधच्छात्रः, न्यायविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**दर्शनशब्दार्थः -**

प्रेक्षणार्थकाद् दृश् धातोः (दृशिर् प्रेक्षणे)ल्युट्-प्रत्यये कृते दर्शन-शब्दो निष्पद्यते। किं नाम दर्शनम् ? दृश्यते ज्ञायते विचार्यते अनेन इति दर्शनम् । दृश्यते वस्तुतत्त्वमनेनेति दर्शनम् । येन साधनेन इदं विश्वम्, इदं वस्तुजातम्, इदं ब्रह्म, अयं जीवात्मा, इयं प्रकृतिरिति, यथा तथ्येन दृश्यते निरीक्ष्यते परीक्ष्यते समीक्ष्यते विविच्यते च तद् दर्शनम्। अतः समग्रमपि आध्यात्मिकम् आधिभौतिकं च विवेचनं दर्शनशब्दान्तर्गतं भवति। किं ब्रह्म ? तस्य किं स्वरूपम्? कः ईश्वरः ? के तस्य प्राप्तेरूपायाः? अस्मिन् जगति किं शाश्वतं तत्त्वम् ? इयं सृष्टिः कुत आबभूव ? जीवात्मनः किं स्वरूपम् ? कः कस्मात् पुनर्जायते ? किं लिङ्गशरीरम् ? जीवस्य कुत उद्भूतिः ? किं तस्य लक्ष्यम् ? कथं मोक्षावाप्तिः ? आत्मा चेतनोऽचेतनो वा ? कः सृष्टे कर्त्ता ? किं जीवने कर्तव्यम् ? कश्च जीवनस्य साधिष्ठः पन्थाः ? इत्यादयोऽनुयोगा यत्र सुसूक्ष्मेण रूपेण विविच्यन्ते तद् दर्शनम् । सूक्ष्मेक्षिकया तत्त्वार्थदर्शनमेव दर्शनम् इत्यवगन्तव्यम्। यथोच्यते -

**केनेषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तः।**
**केनेषितां वाचमिमां वदन्ति, चक्षुः श्रोत्रं क उ देवो युनक्ति ॥**

(केन.उ.१.१)

**भारतीयदर्शनस्य विभागः -**

भारतीयदर्शनानि स्थूलरूपेण द्विधा विभज्यन्ते - आस्तिकदर्शनानि, नास्तिकदर्शनानि च । यानि दर्शनानि वेदानां प्रामाण्यम् उरीकुर्वन्ति, तानि

आस्तिकदर्शनानीति व्यवह्रियन्ते । यानि च वेदानां प्रामाण्यं नोररीकुर्वन्ति तानि नास्तिकदर्शनानि इति । तत्र न्याय-वैशेषिक-सांख्य-योग-मीमांसा-वेदान्ताख्यानि षड्दर्शनानि आस्तिकदर्शनानि इति अभिधीयन्ते । चार्वाक-जैन-बौद्धदर्शने वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिक आख्यानि षड्दर्शनानि नास्तिक-दर्शनानि इति निर्दिश्यन्ते । विभाजनं चैतद् वेदानां प्रामाण्याप्रामाण्यमूलकमेवेति सम्यग् अवधारणीयम् ।

**पदार्थनिरूपणम् -**

[१]चरकसंहितामतानुसारं 'अर्थः पदस्य पदार्थः।' सुश्रुतसंहिता[२] मतानुसारं 'योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः। पदस्य पदयोः पदानां वा अर्थः पदार्थः।' 'पदप्रतिपाद्योऽर्थः पदार्थः[३]'।

पदार्थशब्दः पदअर्थ इति द्वयोः शब्दयोः संयोगेन निष्पन्नः । अत्र 'पदम्' 'सुबन्तम्' अर्थश्च 'तिङन्तः' वर्तते। अतः पाणिनिमुनिना 'सुप्तिङन्तं पदमिति[४]' निगदितम् । पदजन्यप्रतीतिविषयत्वम् अभिधेयत्वम् वा पदार्थः।

''पदस्यार्थः पदार्थः इति व्युत्पत्याभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते[५]।'' अभिधातुं व्याख्यातुं योग्यः अभिधेयः, तस्य भावः अभिधेयत्वम्। ''पदार्थ इत्यनेन पदसम्बन्ध्यभिधाविषयत्वस्य लाभेऽपि पदसम्बन्धित्वांशस्य अव्यावर्त्तकत्वात् अभिधेयत्वमात्रं पदार्थसामान्यलक्षणम्[६]।'' अभिधा ईश्वरेच्छा, इदं पदममुमर्थं बोधयतु। अस्मात् शब्दादयमर्थो वोद्धव्य इति ईश्वरेच्छा सङ्केतरूपा शक्तिः। अतः शक्तिनिरूपितपदनिष्ठविशेष्यतायाः परम्परया निरूपिता या विषयत्वसम्बन्धावच्छिन्नाप्रकारता, तदाश्रयत्वं पदार्थत्वमित्यर्थः।

सार्थकः (अर्थयुक्तः) एकम् अक्षरम् अक्षराणां समूहो वा 'पद'[७]मित्युच्यते। 'अर्थाः शब्दादयो ज्ञेया गोचराः विषया गुणाः[८]।' अर्थो नाम 'ऋच्छन्तीन्द्रियाणि यं सोऽर्थः[९]'। पाश्चात्यविदुषः पॉटरमहाशयाः Introduction to PTN इति ग्रन्थे कथयन्ति 'Category' is the usual translation of sanskrit padartha. Literally, padartha means the thing of a word or that

to which a word refers.[१०] इति शिवादित्यमतानुसारं 'प्रमितिविषयाः पदार्थाः[११]।' विषयतासम्बन्धेन ज्ञानं प्रति तादात्म्येन विषयः कारणम् । अन्नंभट्टमतानुसारेण 'कार्यनियतपूर्ववृत्तिकारणम्[१२]।' 'कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यन्ताभावप्रतियोगितानवच्छेदकाऽन्यथासिद्धाश्रयतानवच्छेदकधर्मवत्वम्[१३]।' 'अभिधेयत्वं पदार्थसामान्यलक्षणम्[१४]।' 'पदार्थत्वं ज्ञेयत्वम्[१५]।' 'षण्णामपि पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि[१६]।' 'यस्य वस्तुनो यत् स्वरूपं तदेव तस्य अस्तित्वम्। नापि अस्तित्वं निःस्वरूपम्, सत्तायाः समवायाभावात्[१७]।' ज्ञेयत्वम्, अभिधेयत्वमेवम् अस्तित्वं पदार्थत्वं च समानधर्मः। यस्य अस्तित्वमस्ति तस्य सत्वमस्ति, यत् सत् अस्ति तद् ज्ञेयमस्ति, यस्य ज्ञेयता अस्ति तस्य अभिधेयता अपि अस्ति । अस्तित्वं सत्ता वाच्यत्वम्, प्रमेयत्वम्, अभिधेयत्वं पदार्थत्वञ्च सामानाधिकरण्यसम्बन्धेन स्वीक्रियते । अभिधेयत्वमपि वस्तुनः स्वरूपमेव भावस्वरूपमेवावस्थाभेदेन ज्ञेयत्वमभिधेयत्वं चोच्यते । 'अभिधेयाः पदार्थाः[१८]।' पदार्थः शब्दाभिधेये द्रव्यादौ[१९]। पदाभिधेयः। स च जात्याकृतिव्यक्तयः पदार्थः[२०]। घटमानयेत्यादौ घटपदाभिधेयः घटत्वात्मकजातिकम्बुग्रीवादिरूपाकृतिविशिष्टो व्यक्तिविशेषो घटपदार्थः[२१]। पदार्थः, पुं. पदानां घटपटादीनां अर्थोऽभिधेयः। तत् पर्य्यायः१, भावः२, धर्मः३, तत्त्वम् ४, सत्त्वम् ५, वस्तु ६ [२२]।

**वैशेषिकदर्शने पदार्थाः -**

वैशेषिकदर्शनसूत्रे 'धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्।' (वै.द., १/१/४) वैशेषिकनये पदार्थाः सप्त । तथा च भाषापरिच्छेदे एवं कारिकावल्याम् -

**द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।**
**समवायस्तथाऽभावः पदार्थाः सप्त कीर्त्तिताः ।।**[२३]

अपि च तर्कसंग्रहे - 'द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तपदार्थाः[२४]।' गुणवत्वं द्रव्यत्वमिति द्रव्यसामान्यलक्षणम् । द्रव्याणि क्षित्यादीनि नव।

गुणत्वजातिमान् गुणः। ते तु रूपादयः चतुर्विंशतिसंख्याकाः। 'संयोगभिन्नत्वे सति संयोगसमवायिकारणत्वं कर्मत्वम्[२५]।' तानि उत्क्षेपणादीनि पञ्च । नित्यत्वे सति अनेकसमवेतत्वं सामान्यम्। गोत्वपशुत्वादिकं सामान्यम् । तत्तु परापरभेदेन द्विविधम् अन्त्यो नित्यद्रव्यवृत्तिः विशेषः। समवायः नित्यसम्बन्धः। यथा - जातिव्यक्त्योः सम्बन्धः। ''नञ्'' पदजन्यप्रतीतिविषयः अभावः। अथवा प्रतियोगिज्ञानसापेक्षज्ञानविषय इत्यर्थः[२६]। एते च पदार्थाः नैयायिकानामपि अविरुद्धाः ।

अन्ये प्राभाकरादयः शक्तिसादृश्ययोः अतिरिक्तपदार्थत्वमंगीकुर्वन्ति । यथाहि - चन्द्रकान्तमणिसंयोगेन वह्निना दाहो न जन्यते, तच्छून्येन तु जन्यते । अतः मणिसमवधानेन वह्नौ दाहानुकूला शक्तिर्नश्यति । तच्छून्येन तु उत्पद्यते इति शक्तेः अतिरिक्तपदार्थत्वं स्वीकार्यमेव सादृश्यमपि पदार्थान्तरम्। तस्य षट्सु भावपदार्थेषु न अन्तर्भावः न भवितुमर्हति। भावत्वेन प्रतीयमानत्वात् उक्तः अभावे नान्तर्भवति । यथा गोत्वं नित्यं तथा अश्वत्वमपि नित्यमिति, सादृश्यप्रतीतिर्भवति। सादृश्यस्य द्रव्यादौ अन्तर्गतत्वे सामान्ये सादृश्यप्रतीतिर्न स्यात् । द्रव्यादीनां सामान्यवृत्तित्वाभावात् इति चेन्न । शक्तेः पदार्थान्तरत्वं नास्ति, मणेः प्रतिबन्धकत्वेन दाहादिकं प्रति मण्याद्यभाव-विशिष्टस्य वह्न्यादेः स्वातन्त्र्येण वा वह्नेः मण्यभावादेश्च हेतुत्वं क्लृप्तमेव तेन सामञ्जस्यं स्यात् । अनेनैव सामञ्जस्येऽनन्तशक्तितत्प्रागभावध्वंसकल्पनाऽनौचित्यात् । अतः शक्तेः पदार्थान्तरत्वस्वीकारेऽनन्तशक्तीनां तत्तत्प्रागभावानां ध्वंसाभावानां च कल्पनं गौरवं स्यात्। एवं सादृश्यमपि न पदार्थान्तरं सप्तपदार्थेषु तस्यान्तर्भावात्, तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् इति सादृश्यस्य लक्षणम्। यथा - चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वं मुखे चन्द्रसादृश्यम् इति । अतः सप्तव्यतिरिक्तो न कोऽपि पदार्थः अवशिष्यते । वैशेषिकाणां मते सप्तपदार्थाः।

**न्यायदर्शने पदार्थाः -**

न्यायनये तु षोडशपदार्थाः स्वीकृताः। तद्यथा - ''प्रमाणप्रमेयसंशय-प्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभास-

च्छलजातिनिग्रहस्थानानां तत्त्वज्ञानात् निःश्रेयसाधिगमः[२७]'' इति गौतमसूत्रम् । एते पदार्थाः वैशेषिकस्वीकृतेषु सप्तपदार्थेषु अन्तर्भूताः। यथा - प्रमाणस्य इन्द्रियादेः द्रव्ये, व्याप्तिज्ञानादेर्गुणे, प्रमेयस्यात्मशरीरेन्द्रियस्वरूपस्य द्रव्ये, अर्थस्य गन्धरूपरसस्पर्शशब्दरूपस्य गुणे, बुद्धेर्गुणे । मनसो द्रव्ये, प्रवृत्तेर्गुणे, दोषाणां रागद्वेषमोहानां क्रमश इच्छाद्वेषमिथ्याज्ञानात्मकानां गुणे । प्रेत्यभाव - प्रेत्यमृत्वा भावः - जननम् । चरमप्राणशरीरध्वंसः - मरणम् । आद्यशरीर-प्राणसंयोगः जननम् । मरणस्य ध्वंसे जननस्य संयोगे, फलस्य सुखदुःख-संवेदनात्मकभोगस्य ज्ञाने, दुःखस्य गुणे, आत्यन्तिकदुःखध्वंसः मोक्षः, दुःखानि शरीरं षडिन्द्रियाणि षड्बुद्धयः षड्विषयाः सुखं दुःखं चेति एकविंशति संख्यकानि। तादृशस्य मोक्षस्य ध्वंसे, संशयस्य ज्ञाने, साध्यतया प्रवृत्तिर्हेत्विच्छाविषयरूपप्रयोजनस्य यथायथं द्रव्यादिषु, दृष्टान्तस्य यथायथं द्रव्यादिषु, प्रामाणिकतयाऽभ्युपगतार्थसिद्धान्तस्य यथायथं द्रव्यादिषु, शब्दस्वरूपप्रतिज्ञाद्यवयवानां गुणे, तर्कस्य आहार्यज्ञानात्मकस्य गुणे, निर्णयस्य ज्ञाने, तत्त्वबुभूत्सोः कथात्मकवादस्य गुणे, विजिगीषुकथारूपजल्पस्य गुणे, स्वपक्षस्थापनाहीनकथारूपवितण्डायाः गुणे, अनुमितितत्कारणान्यतरप्रतिबन्धक-यथार्थज्ञानविषयाणां हेत्वाभासानां यथायथं द्रव्यादिषु, अभिप्रायान्तरेण प्रयुक्तशब्दस्य अर्थान्तरं परिकल्प्य दूषणाभिधानात्मकच्छलस्य गुणे, असदुत्तरजातेर्गुणे, 'पराजयहेतुनिग्रहस्थानानां यथायथं द्रव्यादिषु अन्तर्भाव[२८]' इति। अतएव सप्तैव पदार्था इत्यत्र नैयायिकाभ्युपगतपदार्थैः साकं न कोऽपि विरोध इति दिक् । गौतमोक्तप्रमाणादयः षोडशपदार्थास्तु न्यायशब्दे द्रष्टव्याः।

**सांख्यदर्शने पदार्थाः -**

प्रकृतसांख्यमते - पुरुषः, प्रकृतिः, महान्, अहंकारः, पञ्चतन्मात्राणि, पञ्चमहाभूतानि, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, इत्याहत्येमानि पञ्चविंशतिसंख्यकानि तत्त्वानि सन्ति । अथैतन्मते व्यक्ताव्यक्तज्ञविज्ञानात् व्यक्तानि - महदादित्रयोविंशतितत्त्वानि, अव्यक्ता - प्रकृतिः, ज्ञः = पुरुषः

इत्याहत्य पञ्चविंशतितत्त्वानां याथार्थ्येन विशिष्यज्ञानादेव दुःखत्रयनिवृत्तिरूपपादिता । अत्र प्रकृतिपुरुषयोः पार्थक्येन विवेकोऽपि कारणम् ।

सांख्यसूत्रानुसारं पुरुषः, प्रकृतिः एवं प्रकृतितः समुद्भूताः त्रयोविंशतिपदार्थाः संभूय पञ्चविंशतिपदार्थाः। सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रकृतेर्महान् महतोऽहं-कारोऽहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गुणाः[२९]। वात्स्यायनप्रणीतसांख्येष्वपि उत्तक्रर्मादीनि अनुक्त्वा एकत्वादय इति कृत्वा सांख्या भविष्यन्ति[३०] । महाभारते वर्णितः सांख्यशब्दः यथा -

**संख्या प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।**
**तत्त्वानि च चतुर्विंशतिः तेन सांख्यं प्रकीर्त्तितम् ।।**[३१]

कपिलमते प्रकृत्यादयः पञ्चविंशतिः।

**योगदर्शने पदार्थाः -**

योगदर्शनाऽभिमतानि पदार्थतत्त्वानि षड्विंशतिसंख्यकानि प्रसिद्धानि, तद्यथा - परमात्मा (ईश्वरः) जीवात्मा (पुरुषः) प्रकृतिः - महदहंकारमनः - श्रोत्र-त्वक्-चक्षू-रसना-घ्राण-वाक्-पाणि-पाद-पायूपस्थ-शब्द-स्पर्श-रूप-रस-गन्ध-पृथिवी-जल-तेजो-वाय्वाकाशानीति षड्विंशतिपदार्थाः, ते च सर्वेऽपि द्रव्यपदवाच्याः।

तत्र - परमेश्वर एक एव 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः[३२]' इत्यनेन सूत्रेण वक्ष्यते । जीवात्मानस्तु प्रतिशरीरं भिन्ना अपरिमिता नित्याश्चेतना अल्पज्ञाः सुखादिमन्त इति, तदपि 'तदा द्रष्टुः स्वस्वरूपेऽवस्थानमि'ति सूत्रस्य भाष्ये वयं सविस्तरं जीवात्मस्वरूपं पश्यामः । प्रकृतिः - माया, अविद्या[३३], अन्धतमः, अजा, त्रिवर्णा, सत्त्वरजस्तमोगुणानां साम्यावस्था, संसारस्य मूलकारणात्मिका, नित्या, जडा, कर्त्री च बोध्या, ''अनित्याऽशुचिदुःखाऽनात्मसु नित्यशुचिसुखात्मख्यातिरविद्या'' इति सूत्रभाष्ये मायावादस्य सविस्तरं निरूपणम् । तस्या एव प्रकृतेरस्य संसारस्योत्पत्तिरभिमता, तद्यथा -

**प्रकृतेर्महाँस्ततोऽहङ्कारस्तस्माद्गणश्च षोडशकः ।**
**तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि ।।**[३४] इति ।

पातञ्जलमते तु ईश्वरेण सह प्रकृत्यादयः षड्विंशतिः।

**मीमांसादर्शने** मतद्वयम्[३५] यथा - प्राभाकरमतम्, कुमारिलभट्टमतमिति। प्रथमतः प्राभाकरमतानुसारेण द्रव्यगुणकर्मसामान्यशक्तिसादृश्यसंख्यासमवायाः अष्टौ पदार्थाः। द्वितीयतः कुमारिलमतानुसारेण द्रव्यगुणकर्मसामान्याभावाः पञ्चपदार्थाः । **वेदान्तदर्शने** ब्रह्म एकमेव । अद्वैतवेदान्तमते पदार्थो द्विविधः यथा - दृक् दृश्यं च। वेदान्तमते आत्मानात्मभेदात् द्विविधः। **चार्वाकदर्शने** चत्वारः पदार्थाः यथा - पृथ्वी, आपः, तेजः, वायुश्च । **जैनदर्शने** सप्तपदार्थाः[३६] यथा - जीवः, अजीवः, आश्रवः, बन्धः, सम्वरः, निर्जरा, मोक्षश्च इति । **बौद्धदर्शने** पदार्थद्वयम् - भूतः, चितिश्च ।

## सन्दर्भाः


१. चरकसिद्धान्तः, १२/४१
२. सुश्रुतसंहिता, उत्तरतन्त्र, ६५/१०
३. तात्पर्यटीका
४. अष्टाध्यायी, १/४/१४
५. न्यायसिद्धान्तमुक्तावली, पृ. २४
६. न्यायकोषः, पृ. १७६
७. आयुर्वेदीय पदार्थविज्ञान, पृ. २२
८. चरकशास्त्र, १/३१
९. पदार्थविज्ञानदर्पण, पृ. ३२
१०. Potter, Intro. to PTN (Padarthatattvanirupanam), p. 4
११. सप्तपदार्थी
१२. तर्कसंग्रहः 'आलोक' व्याख्यासहितः पृ. ८५

१३. न्यायसिद्धान्तमुक्तावली - विलासिनी
१४. तर्कदीपिका, पृ. २
१५. सिद्धान्तचन्द्रोदयः
१६. पदार्थधर्मसंग्रहः - प्रशस्तपादाचार्यः
१७. न्यायकन्दली, पृ. १६
१८. लक्षणावली पृ. - १
१९. वाचस्पत्यम्, Vol.5, page 4225
२०. गौतमसूत्रम्, २/२/६८
२१. न्यायकोशः, पृ. ४६२
२२. शब्दकल्पद्रुमः, तृतीयकाण्डम्, पृ. ४०
२३. न्यायसिद्धान्तमुक्तावली, का.-२
२४. तर्कसंग्रहः, पृ. ३
२५. न्यायदर्शनविमर्शः, पृ. ७
२६. न्यायसिद्धान्तमुक्तावली, पृ. ५८
२७. न्यायदर्शनम्, अ.१, आ.१, सू.१
२८. न्यायसिद्धान्तमुक्तावली, पृ. २६
२९. सांख्यसूत्रम् - १/३१
३०. न्यायवार्त्तिकम्
३१. महाभारते शान्तिपर्व अ. ३०६, श्लो. ४३
३२. योगदर्शनम्, १/२४
३३. अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मकख्यातिरविद्या। योगभाष्यम्,२/५
३४. सांख्यकारिका, २२
३५. प्रकरणपञ्जिका न्यायसिद्धिः, पृ. ७८
३६. उमास्वाति तत्त्वार्थाधिगमसूत्रम्, जीवाजीवास्रवबन्धसंवरनिर्जरा मोक्षास्तत्त्वम्, अ. १, सू. ४, पृ. ८

□□□

# प्रबोधचन्द्रोदयनाटके मोक्षस्वरूपविचारः

*के. श्रीसमीरजा*
*(शोधच्छात्रा, अद्वैतवेदान्तविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

दुर्लभं मानवं जन्म सफलीकर्तुं भगवती श्रुतिः धर्मार्थकाममोक्षाख्यान् चतुर्विध-पुरुषार्थानुपदिशति । तेषु मोक्षः परमपुरुषार्थः । तस्य परमत्वं नाम निरतिशयत्वे सति पुनरावृत्तिरहितत्वम् । अन्येषां त्रयाणामेतल्लक्षणाव्याप्तेः मोक्ष एव परं साधनीयत्वेन गम्यते। तदेतल्लक्षणं श्रुतिस्मृतिभिरपि इत्थं प्रकाशितं वर्तते "न स पुनरावर्तते"[१] इति । तथा -

**अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।**
**यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।।**[२]
**न तद्भासयते सूर्यो न शशाङ्को न पावकः ।**
**यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ।।**[३]

इत्यादि स्मृतिभ्यः मोक्षस्य नित्यत्वमवगम्यते । एवमन्येषामनित्यत्वमपि श्रुत्या, स्मृत्या, प्रत्यक्षेण च प्रसिद्धम् । यथा- "इह कर्मचितो लोकः क्षीयते, एवमेवामुत्रपुण्यचितो लोकः क्षीयते।"[४]

**ते तं भुक्त्वा स्वर्गलोकं विशालं**
**क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।**[५]

इत्यादि श्रुतिस्मृतिभिः कर्मफलस्य अनित्यत्वमवगम्यते ।

स्वरूपज्ञानेन विना तस्मिन् प्रवृत्त्यसंभवात् तत्स्वरूपमेव आद्यं ज्ञेयं भवति । उपनिषदां मोक्षशास्त्रत्वप्रसिद्धेः कीदृशः मोक्षः उपनिषत्प्रतिपाद्यः इति भवति जिज्ञासा। तथा च - "अविद्यानिवृत्युपलक्षितः आनन्दो मोक्षः इति अद्वैतिनां मतम् । आत्मनः अज्ञानमेव संसारबन्धहेतुः। यदा आत्मनः यथार्थज्ञानं भवति, तदा संसारनिवृत्तिर्भवति

इति शास्त्रे व्यपदिश्यते। परमार्थतस्तु आत्मनः बन्धोऽपि नास्ति मोक्षोऽपि नास्ति । तस्य नित्यशुद्धबुद्धमुक्तस्वरूपत्वात्। आत्मा आनन्दस्वरूप एव "विज्ञानमानन्दं ब्रह्म"[६] इति श्रुतेः । "अयमात्मा ब्रह्म"[७] इति आत्मनः ब्रह्मस्वरूपत्वम् । अत एव केवलस्य ब्रह्मणः सत्यत्वमङ्गीकुर्वद्भिः अद्वैतिभिः स आनन्दः अविद्यानिवृत्युपलक्षितः इत्यभ्युपगतम् । तथा च माण्डूक्यकारिकासु -

**न विरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।**
**न मुमुक्षु र्न वै मुक्त इत्येषा परमार्थता ।।**[८] इति ।

आत्मनः बन्धमोक्षराहित्यं, तस्य नित्यशुद्धबुद्धमुक्तस्वभावत्वं च प्रकृते प्रबोधचन्द्रोदयेऽपि परामृष्टम् । यथा-

**असावहंकारपरैर्दुरात्मभि**
**र्निबध्य तैः पापशठैर्मदादिभिः ।**
**चिरं चिदानन्दमयो निरञ्जनो**
**जगत्प्रभुर्दीनदशामनीयत ।।**[९] इति ।

अत्र चिदानन्दमयः निरञ्जनः परमार्थतः सन् आत्मा दीनदशामनीयत इति पदेन सः मूलतः बन्धरहित इति ज्ञायते । ततः मतेः वचनेष्वपि इदं परिस्फुटं भवति। यथा - "आर्यपुत्र, यतोऽसौ सहजानन्दसुन्दरस्वभावो नित्यप्रकाशः परमेश्वरः श्रूयते। तत्कथमेतैर्दुर्विदग्धैर्बद्धो महामोहसागरे निक्षिप्तः।"[१०] इति ।

परमार्थतः मुक्तस्वभावस्य आत्मनः बन्धः कथमिति संशयमित्थं प्रकटयति मतिः । अयमेवार्थः षष्ठाङ्केऽपि प्रकाशितः । यथा -

**शान्तं ज्योतिः कथमनुदितानन्दनित्यप्रकाशं**
**विश्वोत्पत्तौ व्रजति विकृतिं निष्कलं निर्मलं च ।**
**तद्वन्नीलोत्पलदलरुचामम्बुवाहावलीनां**
**प्रादुर्भावे भवति नभसः कीदृशो वा विकारः ।।**[११] इति।

आत्मा स्वभावतः शान्तः, अविकारी, ज्योतिः अर्थात् प्रकाशान्तरनिरपेक्षः, निष्कलः, निरंशः, निर्मलः, अनुदितानन्द इत्यनेन जन्मराहित्यं सूचितम् । अत एव

सः नित्यः आनन्दः। "निष्कलं निष्क्रियं शान्तम्"[१२] इति श्रुतेः । एतैर्विशेषणैः सर्वथा विकारयोग्यता तस्य नास्तीति सूचितम् ।

एवं स्थिते कथं बन्धः ? कथं मोक्षः ? इति चेत् तत्रोच्यते - आत्मा अविद्यया बद्ध इव भूत्वा संसारदुःखमनुभवति । "तत्त्वमसि"[१३] इति वाक्योपदेशेन अविद्यानिवृत्तौ मोक्षं प्राप्त इव स्वात्मन्येव आनन्दमनुभवति । अतः सर्वेषां स्वरूपं परमार्थतः सच्चिदानन्दब्रह्मस्वरूपमेव। मम स्वरूपं सच्चिदानन्दस्वरूपमेवेत्यज्ञात्वा आत्मनि शरीरभावं, शरीरे च आत्मभावम् इति अन्योन्यस्मिन्, अन्योन्यात्मकताम् अन्योन्यधर्मांश्च अध्यय्य, अहं संसीर, सुखी, दुःखी इत्याद्यविद्यया आत्मानं बद्धमिति अभिमन्यते जीवः। यदा स्वस्वरूपज्ञानं भवति तदा संसारबन्धनात् मुक्तो भवति। अतः बन्धः केवलमाध्यासिकः । स बन्धः न रज्वादिरूपः, किन्तु अज्ञानरूपः। अत एव श्रुतिः संसारभ्रमनिवारणाय ज्ञानमेव साधनत्वेनोपदिशति "तरति शोकमात्मवित्"[१४], "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[१५] इति । गीताभाष्येऽपि -

"आत्मज्ञानस्य तु केवलस्य निःश्रेयसहतेतुत्वम्, भेदप्रत्ययनिवर्तकत्वेन कैवल्यफलावसायित्वात् । क्रियाकारकफलबेदबुद्धिः अविद्यया आत्मनि नित्यप्रवृत्ता। मम कर्म, अहं कर्ता, अमुष्मै फलाय इदं कर्म करिष्यामि"[१६] इतीयमविद्या अनादिकाल-प्रवृत्ता। अस्याः अविद्यायाः निवर्तकं अयमहमस्मि केवलोऽकर्ता अक्रियोऽफलः न मतोऽन्योऽस्ति कश्चित् इत्येवं रूपं आत्मविषयं ज्ञानं उत्पद्यमानं कर्मप्रवृत्तिहेतुभूतायाः भेदबुद्धेः निवर्तकत्वात्"[१७] इति। अतः "स्वस्वरूपावस्थानं मोक्षः"[१८] "स्वरूपावस्थानमेव कैवल्यम्[१९], "केवलात्मस्वरूपावगतिः"[२०], "ब्रह्मैव हि मुक्त्यवस्था"[२१] इति श्रुतिस्मृतिभिः प्रस्थानत्रयभाष्ये मोक्षस्वरूपं सम्यक् प्रतिपादितम्। "ब्रह्मविदाप्नोति परम्"[२२] इति श्रुतेः ब्रह्मवित् परमपुरुषार्थं मोक्षं प्राप्नोतीति वेदान्ताः प्रबोधयन्ति । सा च प्राप्तिः न अप्राप्तस्य प्राप्तिः, किन्तु प्राप्तस्यैव । कण्ठगतचामीकरन्यायेन अप्राप्त इति भ्रान्तिनिवारणेन सोऽहमित्याकारकस्वरूपज्ञानेन च मोक्षः इति व्यवहारः। अत एव जीवस्य "ब्रह्मैव सन् ब्रह्माप्येति"[२३] इति पूर्वमेवानन्दात्मकब्रह्मस्वरूपत्वमाचष्टे । बहूनि प्रमाणानि बन्धस्य आध्यासिकतां, जीवस्य सहजस्वरूपं च अवबोधयन्ति। तथा च - "प्रकृतसंख्यापूरणस्य

आत्मनः अव्यवहितस्यापि ब्रह्मसंख्येयविषयासक्तचित्ततया स्वरूपाभावदर्शनवत्, परमार्थब्रह्मस्वरूपाभावदर्शनलक्षणया अविद्यया अन्नमयादीन् बाह्याननात्मनः आत्मत्वेन प्रतिपन्नत्वात्, अन्नमयाद्यनात्मभ्यो नान्योऽहमस्मीत्यभिमन्यते । एवमविद्यया आत्मभूतमपि ब्रह्म अनाप्तम् इव स्यात् । तस्यैवमविद्यया अनात्मब्रह्मस्वरूपस्य प्रकृतसंख्यापूरणस्य आत्मना अविद्यया अनाप्तस्य सतः केनचित् स्मारितस्य पुनस्तस्यैव विद्यया आप्तिर्यथा, तथा श्रुत्युपदिष्टस्य सर्वात्मब्रह्मणः आत्मत्वदर्शनेन विद्यया तदाप्तिः उपपद्यत एव"[२४] इति । भाष्यवाक्यान्येतानि दशमस्त्वमसीति दृष्टान्तगर्भितानि प्राप्तस्य प्राप्तिं दर्शयन्ति मोक्षे । ब्रह्मप्राप्तः मुक्तः जीवः ब्रह्मस्वरूपाद्भिन्नः। तच्च सूत्रेणापि प्रमाणितम् "अविभागेन दृष्टत्वात्"[२५] इति । अधिकरणेऽस्मिन् मुक्तस्य ब्रह्माभेद एव साधितः । सूत्रे दृष्टत्वात् इत्यस्य, श्रुतौ जीवब्रह्मणोरभेददर्शनात् इत्यर्थः । तथा च श्रुतिः -

**यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।**
**एवं मुनेर्विजानत आत्मा भवति गौतम ।।**[२६] इति ।

उक्तरीत्या मोक्षस्य केवलब्रह्मरूपेण अवस्थानात्, मोक्षः ब्रह्मस्वरूपात् अनतिरिक्तः। अतः ब्रह्मैव मोक्षः । स च सर्ववेदान्तेषु एकरूपतथैव अवधार्यते । तथा च सूत्रम् "एवं मुक्तिफलनियमस्तदवस्थाऽवधृतेः"[२७] इति । जीवब्रह्मैक्यमेव मोक्षः । तमेतमर्थं प्रकृते नाटकेऽपि प्रकाशयति कविः यथा-

**असौ त्वदन्यो न सनातनः पुमान्**
**भवान्न देवात्पुरुषोत्तमात्परः ।**
**स एष भिन्नस्त्वदनादिमायया**
**द्विधेव बिम्बं सलिले विवस्वतः ।।**[२८] इति ।

असौ अपरोक्षः पुमान् पुरुषः "यत् साक्षादपरोक्षात् ब्रह्म"[२९], त्वदन्यः न, त्वत्तः भिन्न न भवति । "उदरमन्तरं कुरुते, अथ तस्य भयं भवति"[३०] इति श्रुतेः । भवान्पुरुषोत्तमाद्देवात्परमात्मनः स्वप्रकाशात् परः अन्यः न । "तत्त्वमसि" इति श्रुतेः। पुमान् सनातनः अविनाशी । ईश्वराभिन्न एव त्वं, अनाद्यविद्यया भेदं गतः । स च भेदः मिथ्याभूतः, अतः पारमार्थिकमभेदं विरोद्धुं न शक्नोति । जले विवस्वतः (सूर्यस्य)

अथवा चन्द्रस्य बिम्बं द्विधेव यथा भासते, तथैव जीवब्रह्मणोः भेदः । तथोक्तम् -

**एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।**[३१] इति ।

एवं ब्रह्मात्मैक्यज्ञानेन अज्ञाननिवृत्तौ अज्ञानप्रयुक्तं दुःखमपि निवर्तते । तथा च श्रुतिः "तरति शोकमात्मवित्"[३२], "तत्र को मोहः कः शोक एकत्वमनुपश्यतः"[३३] इति, चित्सुखाचार्यैरप्युक्तं - "निवृत्तिरात्मा मोहस्य ज्ञातत्वेनोपलक्षितः"[३४] इति । अतः मुक्तः आत्मा आत्यन्तिकं सुखं प्राप्य तद्रूप एव भवति ।

## सन्दर्भाः


१. छान्दोग्योपनिषद्- ८.१५.१
२. श्रीमद्भगवद्गीता - ८.२१
३. तत्रैव- १५
४. छान्दोग्योपनिषद्- ८.१.६
५. श्रीमद्भगवद्गीता- ९.२१
६. बृहदारण्यकोपनिषद्- ३.९.२८
७. तत्रैव- २.५.१९
८. माण्डूक्यकारिका- २.३२
९. प्रबोधचन्द्रोदयः - १.२४
१०. तत्रैव- १
११. तत्रैव- ६.२३
१२. श्वेताश्वतरोपनिषद्- ६.१९
१३. छान्दोग्योपनिषद्- ६.८.७
१४. तत्रैव - ७.१.३
१५. श्वेतश्वतरोपनिषद्- ६.१५.३.८
१६. श्रीमद्भगवद्गीताभाष्यम्- १८.६६
१७. तत्रैव
१८. बृहदारण्यकोपनिषदभाष्यम्- ४.४.२१
१९. श्रीमद्भगवद्गीताभाष्यम्- १८.६६
२०. ब्रह्मसूत्रभाष्यम्- १.३.१९
२१. तत्रैव- ३.४.५२
२२. तैत्तरीयोपनिषद्- २.१
२३. बृहदारण्यकोपनिषद्- ४.४.६
२४. तैत्तरीयोपनिषदशाङ्करभाष्यम्- २.१
२५. ब्रह्मसूत्रम्- ४.४.४
२६. कठोपनिषद्- ४.१५
२७. ब्रह्मसूत्रम्- ३.४.५२
२८. प्रबोधचन्द्रोदयः - ६.२५

२९. बृहदारण्यकोपनिषद्- ३.४.१
३०. छान्दोग्योपनिषद्
३१. प्रबोधचन्द्रोदय:
३२. छान्दोग्योपनिषद्- ८.४.२
३३. ईशावास्योपनिषद्- ७
३४. तत्त्वप्रदीपिका- ४.८

## सहायकग्रन्थसूची


१. छान्दोग्योपनिषद् - गीताप्रेस्, गोरखपुर, २००१
२. श्रीमद्भगवद्गीता - गीताप्रेस्, गोरखपुर, १९९८
३. बृहदारण्यकोपनिषद् - विद्यारण्यमुनि, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी,१९८८
४. माण्डूक्यकारिका - विद्यारण्यमुनि, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी,१९८८
५. प्रबोधचन्द्रोदयः - वासुदेवशर्मा, निर्णयसागरप्रेस्, १९३५
६. श्वेताश्वतरोपनिषद् - गीताप्रेस् , गोरखपुर, २००१
७. गीताभाष्यम् - गीताप्रेस् , गोरखपुर, २००१
८. ब्रह्मसूत्रशाङ्करभाष्यम् - भारतीय विद्या प्रकाशन, दिल्ली, वाराणसी, १९९८
९. तैत्तरीयोपनिषद् - गीताप्रेस् , गोरखपुर, २००१
१०. कठोपनिषद् - गीताप्रेस् , गोरखपुर, २००१
११. तत्त्वप्रदीपिका- चित्सुखाचार्यः , सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९९६


□□□

# सांख्यदर्शनरीत्या जगत्सृष्टेः मूलकारणविवेचनम्

***तपन कुमार घडाइ***
*(शोधच्छात्रः, सांख्ययोगविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

## १) उपोद्घातः

जगतः सत्ताविषये, सृष्टिविषये, मूलकारणविषये वा दार्शनिकेषु पर्याप्तरूपेण मतभेदाः संदृश्यन्ते। मूलकारणेन सह केन रूपेण अस्य जगतः सम्बन्धोऽस्तीति विषये भारतीयदार्शनिकाः मतैक्यं न परिपोषयन्ति। अतः जगतः सृष्टिविषये भिन्नभिन्नमतान्यूपलभ्यन्ते भारतीयदर्शने ।

जगतः मूलकारणं नित्यपरमाणुरिति न्यायवैशेषिकानामभिमतम्। तेषां मतेन द्वाभ्यां परमाणुभ्यां द्व्यणुकस्योत्पत्तिः, द्व्यणुकत्रयेण च त्रसरेणुरुत्पद्यते। द्व्यणुकत्रसरेण्वादिक्रमेण संयुक्ताः सन्तः नित्यपरमाणुसकाशात् अनित्यकार्याणामुत्पतिर्जायते। अतः न्यायवैशेषिकदर्शनाभिमतः सृष्टिवादः 'आरम्भवाद'नाम्ना प्रसिद्धः।

सृष्टिविषये बौद्धमतं 'संघातवाद'नाम्ना ख्यातम् । क्षित्याद्युपादानकारणानां समूहमात्रेण सृष्टिः कार्योत्पत्तिर्वा जायत इति तेषामभिमतम् । अतः बौद्धाः 'संघातवादि' नाम्ना भवन्ति व्यपदिष्टाः ।

अद्वैतवेदान्तिनां मते नित्यशुद्धबुद्धमुक्तस्वभावविशिष्टं ब्रह्म । एवंभूतस्य ब्रह्मणः अवास्तविकच्छायारूपमिदं जगत् । अतः शुद्धब्रह्मणः विवर्त्तरूपमिदं जगदिति हेतोः अद्वैतवेदान्तिनः 'विवर्त्तवादिन' इत्युच्यन्ते ।

सांसारिकप्रपञ्चोऽयं व्यक्तिविशेषस्य अविद्यावशात् तात्कालिकः तद्रूपात्मकश्चेति ब्रूवाणाः वेदान्तैकदेशिनः दृष्टिसृष्टिवादिन इत्युच्यन्ते ।

प्रत्यभिज्ञादर्शनस्याचार्येण अभिनवगुप्तेन स्वसम्प्रदाये सृष्टिविचारः 'प्रतिबिम्बवाद'नाम्ना प्रत्यपादि । तन्मते ब्रह्म जगतः मूलकारणम्, किन्तु जगत् न ब्रह्मणः परिणामरूपं विवर्त्तरूपं वा । न वा ब्रह्म जगतः कर्त्ता अपि तु यथा स्वच्छदर्पणे बहिःस्थपदार्थानां प्रतिबिम्बः निपतति तथा ब्रह्मणि अन्तर्भूतस्य जगतः प्रतिबिम्बः दृश्यते।

सांख्ययोगमते तु जगदिदं प्रकृत्याः यथार्थपरिणामः कार्यं वा । अतः सृष्टिविषये सांख्ययोगाचार्याः परिणामवादिनः भवन्तीत्युच्यते । 'परिणामवादः' सांख्ययोगदर्शनस्य मुख्यसिद्धान्तेष्वेकतमः ।

सृष्टेः मूलकारणं किम् ? इति जिज्ञासादूरीकरणार्थम् ईश्वरकृष्णेन सरलोपायेन उक्तं - प्रकृतिपुरुषयोः संयोग एवात्र सृष्टिरूपाभिव्यक्त्यर्थं कारणम्। यथा पङ्ग्वन्धयोः पारस्परिकसहयोगेन लक्ष्यप्राप्तिः , तथा क्रियानिमित्तं प्रधानेन सह चैतन्ययुक्तपुरुषस्य संयोगेन भोग-मोक्षरूपप्रयोजन-सिद्धिः[1] । प्रकृतिपुरुषयोः एवम्भूतः संयोग एव सृष्ट्यर्थं कारणम् ।

## २) सृष्टेः मूलकारणम्

चेतनाचेतनरूपेण मुख्यतः तत्त्वद्वयमङ्गीकुर्वन्ति सांख्याः। तत्र यत् चेतनतत्त्वं पुरुषः यः खलु साक्षी, नित्यमुक्तः, मध्यस्थः, द्रष्टा, अकर्त्ता च। परन्तु अचेतनतत्त्वं प्रकृतिः, प्रधानम्, अव्यक्तं वेति नाम्ना भवत्यभिहितम् । 'प्रकृष्टा कृतिः अस्या अस्तीति' प्रकृतिः । 'प्र' उपसर्गपूर्वकात् 'कृ' धातोः 'क्तिन्' प्रत्यये प्रकृतिपदं निष्पद्यते । अस्यार्थः प्रकर्षेण करोति, उत्पादयति इत्यर्थः । यद्यपि प्रकृतिशब्दस्य विश्लेषणं शास्त्रेषु दृग्गोचरीभूतं भवति तथापि देवीभागवते[2] अत्यन्तपरिस्फुटितं भवति। तद्यथा-

**'प्रकृष्ट' वाचकः 'प्रश्च' कृतिश्च सृष्टिवाचकः ।**
**सृष्टौ प्रकृष्टा या देवी प्रकृतिः सा प्रकीर्तिता ।। ५ ।।**
**गुणे प्रकृष्टसत्त्वे च 'प्र' शब्दो वर्तते श्रुतौ ।**
**मध्यमे रजसि कृश्च 'तिः' शब्दस्तमसि स्मृतः ।। ६ ।।**

**त्रिगुणात्मस्वरूपा या सर्वशक्तिसमन्विता ।**
**प्रधानं सृष्टिकरणे प्रकृतिस्तेन कथ्यते ।। ७ ।।**
**प्रथमे वर्तते 'प्रश्च' 'कृति'श्च सृष्टिवाचकः ।**
**सृष्टेराद्या च या देवी 'प्रकृतिः' सा प्रकीर्त्तिता ।।८।।** इति ।

'प्रकरोतीति प्रकृतिः'[३] इति व्युत्पत्त्यनुसारं 'प्रकृति' पदं सर्गावस्थां द्योतयति । 'प्रकर्षेण धीयते स्थाप्यते अत्राखिलमिति प्रधानम्'[४] इति व्युत्पत्तिस्तु प्रलयावस्थां बोधयति । तथा 'अव्यक्त'पदमप्यमुमेवार्थं प्रकाशयति। प्रकृतिः महदादितत्त्वानां मूलकारणम्[५]। महदादयः त्रिगुणात्मिकाः, अतः प्रकृतिरपि त्रिगुणात्मिका इत्यनुमीयते, कार्येषु कारणगुणानां विद्यमानसम्भवात्, कृष्णतन्तुनिर्मितकृष्णपटवदिति[६]।

महदादीनि त्रयोविंशतितत्त्वानि प्रकृतिसकाशादुत्पन्नानि भवन्ति, तत्रैव परिशेषे लीयन्ते च । विश्वात्मकाः सत्त्वादिगुणाः स्वस्वस्थूलसूक्ष्मभावं परित्यज्य यदा स्वस्वव्यापारात् निवृत्ताः सन्तः अत्यन्तरूपेणाविभागं प्राप्य सूक्ष्मशक्ति-रूपेणावस्थिताः भवन्ति सा अवस्था प्रलयावस्था इत्युच्यते । तथा चैते गुणाः यदा स्वाधिकारसामर्थ्येन परिणामोन्मुखाः सन्तः विस्तारं प्राप्य महदादिसन्निवेशविशेषरूपेणाभिव्यक्ताः भवन्ति तदा सैवावस्था सर्गावस्था इत्युच्यते ।

**३) प्रकृतिस्वरूपम्**

'सत्त्वरजस्तमसां साम्यावस्था वर्त्तते प्रकृतिः' इति सूत्रेण ज्ञायते यद्भगवता कपिलेन प्रकृतित्वेन साम्यावस्थाङ्गताः सत्त्वरजस्तमःस्वरूपात्माकास्त्रयोऽपि गुणाः स्वीकृताः सन्ति। सैवाऽवस्था गुणानां साम्यावस्था कथ्यते यस्याः सर्वेऽपि सर्गोन्मुखताविरहिताः भवन्ति । अवस्थैषा च सर्वस्यापि जगतः प्रलीनावस्थैव भवति। यत्र निरवधिकं सर्वतो भवति । यद्यपि मूलोपादानकारणन्तु सर्वेष्वपि कालेषु भूत-वर्तमान-भविष्येषु तिष्ठत्येव, किन्तु सर्गकाले कार्यरूपेण दृश्यमानं भवति, प्रलयकाले

च कारणरूपेणाऽव्यक्तस्वरूपकं भवति । सर्गावस्थायां गुणेषु वैषम्यमुपजायते, यज्जगतान्नैकविधत्वस्य भवति बीजम् । सृष्टौ सत्त्वरजस्तमसां परस्परन्न्यूनाधिक्ये जगद्वैचित्र्यस्य बीजे स्तः । कस्मिंश्चिद्वस्तुनि सत्त्वस्याधिक्यं भवति रजस्तमसोश्च भवति न्यूनता। तथैव कस्मिंश्चित् पदार्थे रजसो भवत्याधिक्यं, भवति च न्यूनता सत्त्वतमसोः , इत्थमेव कस्मिंश्चिद्भवति तमसः प्राधान्यं सत्त्वरजसोश्च भवति न्यूनता।

"अन्योन्याभिभावाश्रयजननमिथुनवृत्तयश्च गुणाः" इति कारिकाकारः[७]। अनेनैव प्रकारेण किञ्चित् किञ्चिद्व्यत्यासेन गुणानां स्थितिरेव सर्गे नैकविधतां भजते। वस्तुतस्तु सर्वमपि स्वरूपजातन्त्रिगुणमयं त्रिगुणात्मिका प्रकृतिमयञ्चास्ति ।

**४) स्त्रीस्वभावा प्रकृतिः**

सांख्यदर्शने प्रकृतिः स्त्रीस्वरूपा इति कथयितुं शक्यते । यतो हि प्रकृतिः प्रसवधर्मी। तस्मादैहिकसृष्टिः परिणामरूपेण उपजायते । परस्परविरुद्धस्वभावजोऽपि द्वयोः (प्रकृति-पुरुषयोः) कश्चिददृष्टेच्छया पङ्ग्वन्धवद् संयोगापेक्षते सृष्ट्यर्थम् । यथा मानवसृष्टेः स्त्रीपुंसः संयोग एव कारणम् । तथा जागतिकपदार्थसृष्टेः प्रकृतिपुरुषसंयोग-कारणम् । प्रकृति-पुरुषयोः सम्बन्धः स्त्री-पुरुषदाम्पत्यसम्बद्धरिति महाभारते प्रतिपादितोऽस्ति। तद्यथा-

**क्षराक्षरयोरेष द्वयोः सम्बन्ध इष्यते ।**
**स्त्रीपुंसोर्वापि भगवन् सम्बन्धस्तद्वदुच्यते ।।**
**ऋते तु पुरुषं नेह स्त्री गर्भं धारयत्युत ।**
**ऋते स्त्रियं न पुरुषो निवर्त्तयेत्तथा ।।**
**अन्योन्यस्याभिसम्बन्धादन्योन्यगुणसंश्रयात् ।**
**रूपं विवर्त्तयत्येतदेवं सर्वासु योनिषु ।।**
**रत्यर्थमभिसम्बन्धादनन्योगुणसंश्रयात् ।**
**ऋतौ निवर्त्येते रूपं तद्वक्ष्यामि निदर्शनम्[८] ।।**

अर्थात्, यथा 'पुरुषं' विना 'स्त्री:' गर्भं धारयितुमसमर्था भवति , तथैव स्त्रियं विना पुरुषोऽपि किमपि शरीरस्योत्पत्तिं कर्तुं न शक्नोति । अत: उभयो: पारस्परिकेन सम्बन्धेन परस्परगुणाश्रयणात् कस्यचित् कायस्य निर्माणं सम्भवति ।

प्राय: सर्वासु योनिषु एषैव स्थितिरस्ति । यदा स्त्री ऋतुमती भवति तदा रत्यर्थं (कायनिर्माणार्थं) वाञ्छति पुरुषस्य संयोगम् । येन अनयो: (स्त्रीपुंसयो:) सम्भोगात् मानवसृष्टिर्जायते। एवमेव प्रकृत्यां गुणत्रयाणां समानताऽवस्था प्रलयावस्था अथवा मूलप्रकृत्यवस्था इति । परन्तु सति च पुरुष-प्रकृतिसंयोगे गुणेषु क्षोभ: संजायते । गुणक्षोभे च रजोगुणे प्रवृत्तिनिमित्तकं चाञ्चल्यम् उत्पद्यते ततश्च सृष्ट्युत्पत्तिक्रम: प्रवर्त्तते। प्रकृति: सुख-दु:ख-मोहात्मकस्वभावात् स्त्रीस्वरूपिणी। यथा एकैव रूपयौवनसम्पन्ना कुलाङ्गना स्वस्वामिने सुखदायिनी भवति, यतस्तस्या: सुखस्वरूपक: सात्त्विकांश: स्वामिसुखायैव भवति । सा एव सपत्नीभ्यो दु:खदायिनी भवति, यतस्ता: प्रति तस्या: दु:खस्वरूपिणी रजोगुणप्रवृत्तिर्भवति । तथैव सैव तस्या: प्राप्तौ विफलप्रयत्नाय परपुरुषाय मोहोत्पादिका विषादव्यापिनी भवति । यतस्तस्या: तम्प्रति मोहरूपक-स्तमोगुण: समुद्भवति। एवं सैव कुलाङ्गना सुख-दु:ख-मोह-जननी। अथ च प्रीत्यप्रीतिविषादात्मिका ।

## ५) उपसंहारः

प्रकृतिसकाशात् महदादितत्त्वानामुत्पत्तिक्रमः सांख्यशास्त्रे प्रसिद्धः। तत्र प्रथमतः प्रकृतिसकाशात् महत्तत्त्वस्य उत्पत्तिः, महतः कार्यम् अहंकारः। पञ्चतन्मात्राणि एकादशेन्द्रियाणि इति रूपेण अहंकारस्य द्विविधं कार्यम्। एकादशेन्द्रियाण्यपि बाह्याभ्यन्तरभेदेन द्विधा विभक्तानि। क्षित्यादिस्थूलभूतानि सूक्ष्मभूतानां पञ्चतन्मात्राणां कार्याणि परन्तु कार्यकारणविलक्षणः पुरुषः । एवं पञ्चविंशतिपदार्थानां व्यूहः सांख्यशास्त्रप्रसिद्धः[९] ।

उपर्युक्तसृष्टिक्रमः यद्यपि सांख्यसूत्रकारकारिकाकारयोश्च सम्मतः तथापि विषयेऽस्मिन् सांख्याचार्याणां मध्ये मतभेदोऽस्तीति प्रतीयते। तत्र केचन आचार्याः प्रकृतिसकाशात् सर्वप्रथमतः कस्याप्यनिर्देश्यस्वरूपयुक्त-

तत्त्वस्योत्पत्तिः अनन्तरं महत्तत्त्वस्योत्पत्तिरिति स्वीकुर्वन्ति[१०] । परन्तु पतञ्जलि-वार्षगण्यप्रभृतयस्तु प्रकृतिसकाशात् प्रथमतः महतः उत्पत्तिं स्वीकुर्वन्ति[११] । आचार्यविन्ध्यवासिमतेन तु – महत्तत्त्वसकाशात् पञ्चतन्मात्राणाम् अहंकारसकाशाच्च षड्विशेषाणां समुत्पत्तिरिति[१२]। इन्द्रियाणां विषयेऽपि भिन्नभिन्नमतान्युपलभ्यन्ते। आचार्यपञ्चाधिकरणमतेन एतानि भौतिकानीति । परन्तु अन्ये केचन आचार्याः संस्कारविशेषयोगेनैतानि स्वस्वरूपं गृह्णन्तीति। केषाञ्चित् मतेन इन्द्रियाणि परिच्छिन्नानि, परन्तु विन्ध्यवासिमतेन तानि विभूपरिमाणयुक्तानीति[१३]। एवं केचन आचार्याः तन्मात्राणि एकरूपाणीति स्वीकुर्वन्ति। वार्षगण्यमतेन तु तानि एकाधिकरूपविशिष्टानीति[१४] । केचन आचार्याः त्रयोदशकरणानीति स्वीकुर्वन्ति। विन्ध्यवासिमतेन तु एकादशकरणानीति[१५] । केचन महत्तत्त्वेन बुध्या वा सर्वविधविषयकज्ञानं जायत इति स्वीकुर्वन्ति । वस्तुतः मनसा एव एवम्भूतज्ञानं सम्भवतीत्युक्तम्[१६]। संकल्प-अभिमान-अध्यवसायादिषु मध्ये वस्तुतः एकरूपतास्तीति आचार्यविन्ध्यवासी[१७]।

एतेनैतज्ज्ञायते यत्- सांख्योक्तसृष्टिक्रमविषये सांख्याचार्याणां नैकमत्यम्। यद्वा भवतु अद्यतनीयसांख्यपरम्परायाम् आचार्यईश्वरकृष्णप्रतिपादितसृष्टिक्रम एव सर्वमान्य इति ।

**जगत् त्रिगुणमयमेव भवति, तथा सर्वाण्यपि च सांसारिकानि वस्तून्यपि गुणानां प्रीत्यप्रीतिविषादाभिव्यञ्जकानि मूलोपादानकानि सन्ति । सांख्यसिद्धान्तमनुसृत्य प्रकृतिरेव जगतां मूलोपादानकारणमस्ति । निखिलमपि जगदेतत् प्रकृतेः कार्यमस्ति । किन्तु प्रकृतिरेषा नास्ति कस्यचिदपि कारणभूतस्य पदार्थस्य कार्यभूता । इतिकृत्वैव प्रोच्यते "मूलप्रकृतिरविकृतिरिति"[१८] "मूले मूलाभावादमूलम्मूलमिति"[१९] च सांख्यकारिका-कपिलसूत्राभ्याञ्च प्रकृतेः सर्वथा मूलोपादानकारणत्वम् ।**

## सन्दर्भाः

१. 'पुरुषस्य दर्शनार्थः कैवल्यार्थस्तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः' ।। इति, सां. का., २१।

२. दे. भा. स्क. ९, अ. १, श्लो. ५-८

३. यु. दी., पृ. २९ ।

४. मा. वृ., पृ. २० ।

५. 'मूलप्रकृतिरविकृतिः' इति । सां. का., ३ ।

६. 'कारणगुणात्मकत्वात्कार्यस्य । यथा कृष्णतन्तुः कारणं पटः कार्यमपि कृष्णमेव भवति' इति । मा. वृ., पृ. १४ ।

७. सां. का. १२

८. महाभा. शा. प. अ. ३०५, श्लोकाः १,२,३,४

९. (क) 'प्रकृतेर्महान् महतोऽहंकारोऽहंकारात् पञ्च तन्मात्राण्युभयमिन्द्रियं, तन्मात्रेभ्यः स्थूलभूतानि पुरुष इति पञ्चविंशतिर्गणाः ।। इति- सां. सू., १/६१ ।

(ख)'प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकाः ।
तस्मादपि षोडशकात् पंचभ्यः पंच भूतानि' ।। इति सां. का., २२।

१०. 'प्रधानादनिर्देश्यस्वरूपं तत्त्वान्तरमुत्पद्यते । ततो महानिति' । इति- यु. दी., पृ. १२५।

११. 'पतंजलिपंचाधिकरणवार्षगणानां तु प्रधानान्महानुत्पद्यत' । इति । तत्रैव।

१२. 'महतः षड्विशेषाः सृज्यन्ते पंचतन्मात्राण्यहंकारश्चेति विन्ध्यवासिमतम्' ।
इति- यु. दी., पृ. १२५-१२६ ।

१३. 'भौतिकानीन्द्रियाणीति पंचाधिकरणमतम् ।....... विन्ध्यवासिमतम् ।
इति- यु. दी., पृ. १२६ ।

१४. 'एकरूपाणि तन्मात्राणीत्यन्ये। एकोत्तराणीति वार्षगण्यः' ।इति तत्रैव

१५. 'अधिकरणमपि के च त्रयोदशविधमाहुः । एकादशकमिति- विन्ध्यवासी। इति- तत्रैव।

१६. 'तथाऽन्येषां महति सर्वार्थोपलब्धिः, मनसि विन्ध्यवासिनः' । इति । यु. दी., पृ., १२६।

१७. 'संकल्पाभिमानाध्यवसायनानात्वमन्मेषाम्, एकत्वं विन्ध्यवासिनः' । तत्रैव ।

१८. सां. का. ३

१९. सां. सू., अ.-१, सू. ६७

## सन्दर्भग्रन्थसूची


१. देवीभागवत (नीलकण्ठीसंस्कृतटीका) - भारतीयविद्याप्रकाशनम्
२. महाभारतशान्तिपर्व - गीताप्रेस्, गोरखपुर
३. महाभारतभिष्मपर्व - गीताप्रेस्, गोरखपुरः
४. युक्तिदीपिका - सं. रामचन्द्र पाण्डेय, मोतीलाल बनारसीदास, दिल्ली, १९६७।
५. युक्तिदीपिका - आचार्यकेदारनाथत्रिपाठी, संपूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, प्रकाशनवर्ष- १९९६
६. सांख्यकारिका (युक्तिदीपिका तथा तत्त्व प्रभा सहित) - ईश्वरकृष्णः, डा. रमाशंकर त्रिपाठी, कृष्णदास अकादमी वाराणसी, १९८२ ।
७. सांख्यकारिका (तत्त्वकौमुदी एवं विद्वत्तोषिणीसहिता) - गुरुमण्डलाश्रम, हरिद्वार,१९३१।
८. सांख्यकारिका (गौडपादभाष्यसहिता) - ईश्वरकृष्णः, सं. विमला कर्णाटक, चौखम्बा औरियण्टालिया, वाराणसी, १९७६ ।
९. सांख्यकारिका (माठरवृत्ति एवं जयमङ्गलासहिता)- ईश्वरकृष्णः, सं. विष्णुप्रसाद शर्मा, चोखम्बा संस्कृत सीरिज, वाराणसी, १९७० ।
१०. सांख्यकारिका (गौडपादभाष्यम्)- आचार्यजगन्नाथशास्त्री, मोतिलालवनारसीदासः, वंगलोरोड, दिल्ली- ११०००७, प्रकाशनवर्ष- २००४
११. सांख्यदर्शन (प्रवचनभाष्यसहित)- कपिलः, चौखम्बासंस्कृतसंस्थान, वाराणसी,१९८७।
१२. सर्वदर्शनसंग्रहः - माधवाचार्यः - सं. डा. उमाशङ्कर 'ऋषि' चौखम्बा विद्याभवन, वाराणसी, १९७८ ।
१३. संस्कृत-हिन्दी-कोश- वामन शिवराम आप्टे, मोतीलाल बनारसी दास, दिल्ली, १९८७।
१४. सांख्यसूत्राणि (सुधीग्रन्थमाला)- स्वामीद्वारकादासशास्त्री, सुधीप्रकाशन- १३, वाराणसी - २२१००१, पो. वा. १०४९
१५. सांख्यकारिकाटीकानामालोचनात्मकमध्ययनम् - लक्ष्मीचन्द्रशास्त्री, विद्यानिधीप्रकाशनम्, दिल्ली।
१६. सांख्यदर्शनम् - पं. धुण्डिराजशास्त्री, (काशीसंस्कृतग्रन्थमाला-६७), चौखम्बासंस्कृत-संस्थानम्, वारणासी-२२१००१


□□□

# भारतीयाहारपद्धतौ भोजननिर्माणभाजनानां भोजनास्तरणपत्राणां च वैशिष्ट्यम्

***पौलोमी दाशगुप्ता***

*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**सारांशः-** 'भोजनम् ' इति पदं बोधयति आस्वाद्यं पदार्थविशेषम्, तत् रसनेन्द्रियस्य रसानापूर्त्तिकारि, उदरभरणं स्वास्थ्यसौन्दर्यकारकं जीवनस्य आधाररूपं च भोजनम्। अस्माकं प्रत्यहं कार्यमिदम्। भोजनसमये वयं पत्राणां पात्राणां च उपयोगं कुर्मः। तस्मिन् पात्रे पदार्थानां गुणाः भोजनस्य द्रव्यगुणौ, परिवर्तनम् आनयन्ति। न केवलं तत् अस्माकं शरीरेऽपि भोजनकाले प्रयुज्यमानानां पात्राणां पत्राणां च गुणानां प्रभावाः दरीदृश्यन्ते। अस्मिन् शोधपत्रे शोधविषयस्य रघुनाथसूरिविरचित ''भोजनकुतूहलाख्य'' ग्रन्थस्याधारेण भोजनकाले उपयुक्तानां पात्राणां पत्राणां च विषये विस्तृतरूपेण आलोच्यते।

**उपोद्घातः**

हरणार्थकात् आङ् उपसर्गपूर्वकात् हृञ् धातोः घञ् प्रत्यये आहारपदं निष्पन्नम्। अस्मिन् चराचरात्मके जगति विस्तृते समन्तात् प्रदेशात् शरीरपोषणार्थं वस्तुनः स्वीकार एव आहरणम्; तदेव वस्तुजातम् आहारपदेन उच्यते। आहार एव वायुना जलेन च सहितः शरीरधारणाय मूलम्। संयतेन्द्रियाः योगिन एव केवलं वायुभक्षाः अब्भक्षा वा भवेयुः। आहार एव जीवनस्य स्थितिहेतुः, बुद्धिहेतुः, पोषणहेतुश्च। अत एव ब्रह्मणः कारणरूपत्वात् कार्यकारणयोरभेदोपचारात् अन्नमेव ब्रह्मेत्यभिधीयते, **"अन्नं ब्रह्मेति व्यजानात्"** इति उपनिषद्वाक्येन।

मातुर्गर्भशय्यां प्राप्तस्य शिशोः यद्यपि जननात् पूर्वं नाभिरज्जुद्वारा आहारस्वीकरणम्, जननात्परं जलीयपदार्थव्यतिरिक्तस्याहारस्य स्वीकारस्तु शिशोः अन्नप्राशनसंस्कारानन्तरम्

एवेति परिशीलनेन अन्नस्य, अन्नरूपस्य शरीरपोषकस्य आहारस्य महत्त्वं ज्ञायते। अन्नस्य महत्त्वं सात्त्विकादिगुणाः च भगवता **कृष्णेन भगवद्गीतायां षोडशाध्याये** विस्तरशः प्रोक्ताः। तद्यथा -

**आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराःसात्त्विकप्रियाः।।**[१]
**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः।।**[२]
**यातयामं गतरसं पूति पर्युषितं च यत्।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्।।**[३]

न केवलमेतत्, भोजनं तन्निर्माणभाजनानां, भोजनकाले आस्तरणीयानां च पत्राणामपि अनपलपनीयं महत्त्वं वरीवर्ति। प्राचीनाः ग्रन्थकाराः अन्नादिविषये चिन्तनं समुपस्थाप्य, भाजनादिविषयेऽपि विस्तृतान् विचारान् प्रस्तुतवन्तः। ते सर्वेऽपि विचाराः भोजनकुतूहलादिग्रन्थाधारेण अत्रोपस्थापयितुं प्रयत्यन्ते ।

**हैमपात्रम्**

हैमपात्रे भोजनेन वातपित्तकफानां त्रयाणां दोषाणां नाशो भवति। अक्ष्णोर्ज्योतिः वर्धते, बुद्धिः तीक्ष्णा जायते, स्मरणशक्तिश्च वर्धते। मनस्तत्त्वदृष्ट्या विचार्यमाणे हैमपात्रे भोजने क्रियमाणे जनानां दृष्टिः हैमपात्रे एव लग्ना भवति, फलतः आहाराणां सत्त्वं दृष्टिदग्धं न भवति। अत एव हैमपात्रे भोजनं सर्वोत्कृष्टं कथ्यते। एतदुक्तम् -

**दोषहृत् दृष्टिहृत् पथ्यं हैमं भोजनभाजनम्।**[४]

आपस्तम्बसूत्रं[५] निर्दिशति यत् स्वर्णयुक्तताम्रपत्रे भोजनं कर्तव्यम् इति।

**रौप्यपात्रम्**

रौप्यपात्रे भोजनेन नयनयोः दर्शनशक्तिर्वर्धते नयनज्योतिस्तीक्ष्णा भवति, रौप्यपात्रं पित्तं हरति। परन्तु रौप्यं शीतलम् इति कारणेन रौप्यपात्रे भोजनेन कफः वातश्च समुत्पद्येते। अत एवोक्तम् -

**रौप्यं भवति चक्षुष्यं पित्तहृत् कफवातकृत्।**[६]

**कांस्यपात्रम्**

कांस्यपात्रे भोजनेन बुद्धिशक्तिर्वर्धते, तच्च रुचिवर्धकं, सुन्दरं च भवति, रक्तपित्तविकारयोः उपशमो भवति। तदुक्तम् -

**कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनन्।**[७]

**पैत्तलपात्रम्**

पैत्तलपात्रे भोजनेन वातव्याधिर्भवति । शरीरे तत्पात्रं वातश्च रूक्षतां जनयति, औष्ण्यमुत्पादयति। परन्तु भोजनद्रव्यस्थं शरीरस्थं च कृमिं नाशयति। अत उक्तं ग्रन्थे -

**पैत्तलं वातकृद्रूक्षमुष्णं कृमिकफप्रसुत्।**[८]

**आयस-काचपात्रे**

तन्त्रशास्त्रदृष्ट्या विचार्यमाणे आयसे काचपात्रे च भोजनेन सर्वविधां सिद्धिं प्राप्तुं शक्नोति साधकः। एतस्मिन् पात्रे भोजनेन शोथः पाण्डुरोगश्च विनश्यतः; आयसगुणस्यात्यन्तम् आवश्यकत्वात्। इदं बलवर्धकं भवति शरीरस्य। हरिद्राख्यः कामलापदबोध्यः रोगः च पात्रेऽस्मिन् भोजनेन समूलं नश्यति।

**आयसे काचपात्रे च भोजनं सिद्धिकारकम्।**
**शोथपाण्डुहरं बल्यं कामलापहमुत्तमम्।।**[९]

**शैलज-मृन्मयपात्रे**

शिलया निर्मिते शैलजपात्रे, मृत्पात्रे वा भोजने क्रियमाणे जनानां श्रीः विनश्यति, दारिद्र्यसूचकत्वात्। तादृशपात्रेषु भोजनेन मृत्तिकायाः गुणाः कीटसहिताः शरीरं प्रविशन्ति। तत्कारणेन शरीरं तु रूक्षं कृमिसङ्कुलं च भवति। मृत्पात्रम् अग्न्या सम्यक् दग्धं दृढीकृतं भोजनपात्ररूपेण स्वीकर्तुं शक्यत इति आपस्तम्ब आह -

**शैलजे मृन्मये पात्रे भोजनं श्रीनिवारणम् इति।**[१०]

**काष्ठपात्रे**

काष्ठपात्रे भोजनेन विशेषतः रुचिवृद्धिर्भवति, कफस्यापि वृद्धिः सञ्जायते। तदाह- **दारूद्भवे विशेषेण रुचिदं श्लेष्मकारि च।**[११] इति।

**जलपानपात्रगुणाः -**

ताम्रपात्रेण जलपाने शरीरस्य हितं भवति। एतदभावे मृत्पात्रे जलस्य पानं शरीरस्य हितम् इत्युक्तम्।

**जलपात्रं तु ताम्रस्य तदभावे मृदो हितम्।**[१२] इति।

स्फटिकेन काचेन वा निर्मिते पात्रे जलपानेन शरीरे शीतलता जायते। वैदूर्यनिर्मिते पात्रे जलपाने शुभं भवति। तदुक्तं ग्रन्थे -

**पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत्।**
**काचेन रचितं तद्वत् तथा वैदूर्यसम्भवम्।।**[१३]

मनुना भग्नपात्रे भोजनं न करणीयम् इत्युक्तम्।

**न पादौ धावयेत्कांस्ये कदाचिदपि भाजने।**
**न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते।।**[१४]

परन्तु पैठीनसिमतेन स्वर्णरजतताम्रशङ्खप्रस्तरपात्रेषु सत्यपि भङ्गे भोजनं कर्त्तुं शक्यते।

**ताम्ररजतसुवर्णशुक्त्यश्मघटितानां भिन्नमभिन्नमिति पैठीनसिः**[१५]

मन्वर्थमुक्तावलीकर्तृकुल्लूकभट्टस्य मतानुसारेण कांस्यपात्रे कदाचिदपि पादौ न प्रक्षालयेत्। ताम्ररजतसुवर्णानां भिन्नमभिन्नं वेति न दोष इति पैठीनसिवचनादेतद्व्यतिरिक्तभिन्नभाण्डे न भाजनं कुर्यात्, यत्र मनो विचिकित्सति तद्भावदुष्टं, तत्र न भुञ्जीत इत्युक्तम्।

भोजननिर्माणाय यादृशानि भाजनानि प्रयुज्यन्ते आह्रियन्ते, तथा भोजनकाले पत्राणामपि व्यवहारः दृश्यते।

**आस्तरणपत्राणि, तेषां गुणाश्च -**

भोजनकाले भोजनपात्ररूपेण पत्राणि उपयोक्तुं शक्यन्ते। पत्रभोजने भोजनरुचिः प्रवर्धते। भोजने इच्छापि वर्धते। एतादृशे परिमृष्टे पत्रे भोजने क्रियमाणे विषनाशो भवति। तदुक्तम्-

**पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत्।**[१६]

**रम्भापत्रम्**

रम्भापत्रे भोजनं रुचिकरं हृदयग्राहि च भवति। तत् सत्त्वगुणयुक्तं, पाचनशक्तिवर्धकं क्लान्तिघ्नं विषवायुनाशकं च भवति। किन्तु पाण्डुरोगे सति एतस्योपयोगो निषिद्धः। तदुक्तम्-

**रम्भापत्रेऽशनं हृद्यं रुच्यं वृष्यं बलाग्निदम्।**
**विषश्रमानिलास्रेषु हितं, पाण्डौ न शस्यते।।**[१७]

**पलाशपत्रम्**

पलाशपत्रे भोजनेन वायुः श्लेष्मा च विनश्यति। यदि उदरं स्फीतं (जलोदरं) भवति चेत् पलाशपत्रे भोजनेन तन्यूनं भवति। एतत्पत्रभोजनं बलवर्धकं भवति, कफं वातं च शमयति, रुचिमपि वर्धयति।

**पलाशपत्रे च मरुच्छ्लेष्मगुल्मोदरप्रणुत्।**
**कफं वातं पीनसघ्नं रुच्यं श्रेष्ठं च बृंहणम्।।**[१८]

**हस्तिकर्णीपत्रम्**

हस्तिकर्णीपत्रे भोजनेन शीतिकाज्वरस्य (मलेरिया) उपशमनं भवति। कफः कृमिश्च नश्यतः। ज्वरे हस्तिकर्णपत्रे भोजनं पथ्यरूपेण व्यवह्रियते। तत्पत्रे भोजनेन शरीरस्थक्षारः उष्णश्च न्यूनीभवतः।

**क्षारोष्णकटुकं जन्तुकफघ्नं ज्वरशातनम्।**
**शीतिकाज्वरहृत् पथ्यं हस्तिकर्ण्यां तु भोजनम्।।**[१९]

**अर्कपत्रम्**

अर्कपत्रस्य देवता सूर्यः। अस्मिन् पत्रे भोजनेन शरीरे रूक्षतायाः वृद्धिर्जायते, कृमिनाशश्च भवति। पत्रमिदं पित्तकारि। एतत्पत्रे भोजनं तु गुल्मशूलं, विषं, कफं, पाण्डुकुष्ठं, वातदोषं च शमयति। यदि श्वासे दुर्गन्धोऽस्ति तर्हि अर्कपत्रे भोजनेन सः अपगच्छति।

**अर्कपत्रं भृशं रूक्षं कृमिघ्नं पित्तकृत्परम्।**
**गुल्मशूलविषश्वासपाण्डुकुष्ठकफानिलान्।।**[२०]

**एरण्डपत्रम्**

एरण्डपत्रमधिकतया मरुप्रदेशे विशेषतः राजस्थानेषु दृश्यते। अस्मिन् पत्रे भोजनेन सुन्दरोऽपि जनः निस्सत्त्वो भवेत्। पत्रगुणः भोजनद्रव्यगतः वातं कृमिञ्च नाशयति, परन्तु पत्रमिदं पित्तकारि पाचने सहायकारि च। अस्मिन् पत्रे भोजनेन भोजनं तु विषमेव भवति। अतः पत्रमिदं सर्वथा वर्ज्यम्।

**हन्यात् परमचक्षुष्यं लघु दीपनपाचनम्।**
**एरण्डपत्रं वातघ्नं कृमिघ्नं पित्तकृत् परम्।।**[२१]

**पाटलपत्रम् -**

पाटलवृक्षः साधारणतया मध्यप्रदेशे विन्ध्यपर्वताञ्चले दृश्यते। मईमासेऽयं वृक्षः पुष्पितो भवति अस्य वृक्षस्य पत्रे भोजनेन तृषावृद्धिर्जायते। शरीरन्तु शुष्कं भवति। एतत्पत्रं पित्तं, दाहं च उपशमयति। पाण्डुरोगः, मूत्ररोगः, शोथः, श्वासरोगश्च नाश्यते पत्रेऽस्मिन् भोजनकरणेन।

**पाण्डुशोथश्वाससोमरोगघ्नं पाटलाशनम्।**[२२]

**केतुकीपत्रम्**

केतुकीपत्रे भोजनेन शरीरस्थनाडीरोगग्रन्थिविनाशो भवति। सुगन्धभरितत्वात् भोजनं मनोहरं रुचिकरमपि भवति।

**सर्वग्रन्थिविनाशाय केतुकीपत्रभोजनम्।**
**मनोहरं रुचिकरं चक्षुष्यं भोजनं लघु।।**[२३]

**नलिनीपत्रम्**

नलिनीकुमुदपत्रेषु भोजनेन शरीरन्तु शीतलं भवत्येव किन्तु तत् शरीरे रूक्षतां जनयति। जठराग्निः शान्तो भवति, एतत् कारणेन जठराग्निः नष्टः भवति।

**नलिने कुमुदे रक्तोत्पले वातोत्पले दले।**[२४]

**उपसंहारः -**

केषुचित्स्मृतिशास्त्रेषु कमलदले पलाशपत्रे च भोजनं न करणीयमिति विधिरस्ति। परन्तु **आह्निकप्रकाश**मतानुसारेण एषः प्रतिबन्धकः केवलं पृथिव्यां यत् कमलदलं

पलाशपत्रं तदुद्दिश्य न तु जले जातानां पत्राणां विषये। **पैठीनसि**मतानुसारेण धनेच्छुकजनाः वट-अर्क-अश्वत्थ-कुम्भी-तिन्दुक-कोविदार-करञ्जपत्रेषु भोजनं न कुर्वीरन्। **बृहद् हारीतमतानुसारं** भोजनपात्रं तु शास्त्रानुसारेण सर्वविधं पत्रं भवितुमर्हति। परन्तु गृहस्थजनानां कृते कमलपत्रं पलाशपत्रञ्च वर्जिते। केवलं वानप्रस्थगामी कृतघटश्राद्ध, एव पलाशपत्रं समुपयोक्तुं शक्नोति।

एतत्सर्वं परिशील्य शास्त्रानुसारेण भोजनभाजनानां प्रयोगे व्यवहारे वा अस्माकं जीवनं तु सुखि सुस्थं, स्वास्थ्यपूर्णं भविष्यति। एतादृशभोजनभाजनास्तरणपत्र-विषयकज्ञानाय पाकदर्पणः, अन्नपानविधिः, पाकप्रदीपः, सूपशास्त्रं, पाकचन्द्रिका, भोजनदर्पणः, Food and Drinks in Ancient India, धर्मशास्त्र का इतिहास इत्यादिग्रन्थाः परिशीलनीयाः।

## सन्दर्भाः


१. श्रमीद्भगवद्गीता, १३/८
२. श्रमीद्भगवद्गीता, १६/९
३. श्रमीद्भगवद्गीता, १६/१०
४. भोजनकुतूहलम्, पृ.सं.२१४
५. आपस्तम्बसूत्रम्, २/८/१९/३
६. भोजनकुतूहलम्, पृ.सं.२१४
७. भोजनकुतूहलम्, पृ.सं.२१४
८. भोजनकुतूहलम्, पृ.सं.२१४
९. भोजनकुतूहलम्, पृ.सं.२१४
१०. भोजनकुतूहलम्, पृ.सं.२१४
११. भोजनकुतूहलम्, पृ.सं.२१४
१२. भोजनकुतूहलम्, पृ.सं.२१४
१३. भोजनकुतूहलम्, पृ.सं.२१४
१४. मनुस्मृतिः, ४/६५
१५. स्मृतिचन्द्रिका.२, पृ.२२२
१६. भोजनकुतूहलम्, पृ.सं.२१४
१७. भोजनकुतूहलम्, पृ.सं.२१४
१८. भोजनकुतूहलम्, पृ.सं.२१४
१९. भोजनकुतूहलम्, पृ.सं.२१५
२०. भोजनकुतूहलम्, पृ.सं.२१५
२१. भोजनकुतूहलम्, पृ.सं.२१५
२२. भोजनकुतूहलम्, पृ.सं.२१५
२३. भोजनकुतूहलम्, पृ.सं.२१५
२४. भोजनकुतूहलम्, पृ.सं.२१५

## ग्रन्थसूची

१. **सुश्रुतसंहिता (सूत्रस्थानम्)** - डा.भास्कर गोविन्द घाणेकर, मेहरचन्द लछमनदास पब्लिकेशन्स, दिल्ली

२. **चरकसंहिता** - चौखम्बा, दिल्ली

३. **भावप्रकाशनिघण्टु** - पाण्डेय रामतेज् शास्त्री, काशीधाम्, रामनवमी, संवत्, २०१७

४. **धन्वन्तरीयनिघण्टुः** - चौखम्बा, दिल्ली

५. **'धर्मशास्त्र का इतिहास' (प्रथम भाग)**, डा.पाण्डुरंग वामन काणे, उत्तरप्रदेश हिन्दी संस्थान, लखनऊ

६. **Bhojanakutuhala -** Suranad Kunyan Pillai, University MSS Libarary, Trivandrum, 1956

७. **Food and Drinks in Ancient India -** Om Prakash, Munshi Ram Manohar Lal, Delhi

८. **श्रीमद्भगवद्गीता** - गीताप्रेस, गोरखपुर, उत्तरप्रदेश.

९. **'आपस्तम्बगृह्यसूत्रम्'** - डा. उमेशचन्द्र पाण्डेय, चौखम्बा संस्कृत संस्थान, वाराणसी

१०. **मनुस्मृतिः(चतुर्थोऽध्यायः)** - डा. श्रीमती उर्मिला रुस्तगी/जे.पी.पब्लिशिंग हाउस्, दिल्ली-७

□□□

# भक्तेः भावत्वरसत्वयोः विवेचनम्

*वि. कल्पना*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

प्रथममिदं विचार्यते यत् भक्तेः स्वातन्त्र्येण रसत्वं वर्तते उत भावत्वमिति? संस्कृतपरम्परागतैः काव्यशास्त्रिभिः अद्यावधि भक्तेः रसत्वं न स्वीकृतमेव।

श्रुतिप्रतिपादितं रसस्य आनन्दमयत्वं भगवद्भक्तावेव सकलशास्त्रैः पण्डितैश्च अङ्गीक्रियते। वस्तुतः भक्तिरससमुद्रसमक्षं काव्यरसानामानन्दः गोखुरायते। काव्यरसानां स्थायित्वमपि स्वल्पकालमात्रमेव। परिणामे कान्तासंमितोपदेशार्हे प्रयोजनेऽपि दर्शकपाठकानां वृत्तयः ऊर्ध्वगामिन्यो न भवन्ति। कदाचित् अधोवासनानां विकासोऽपि सम्भाव्यते। त एव काव्यरसाः भक्त्या सह मेलनेन आराध्यपरमेश्वर-स्वरूपेषु सीतारामराधाकृष्णादिषु विषयालम्बनतां गतेषु सहृदयानां चित्तवृत्तीनां परिमार्जका भवन्ति।

वस्तुतः भारतीयरसपरम्परायाः प्रयोजनं द्रष्टृश्रोतृपाठकसहृदयानां वृत्तिचाञ्चल्यनिरोध एव, न तु क्षणिकमनोरञ्जनमात्रम्। भारतीयैः कलायाः प्रयोजनं न केवलं तन्निमित्तमेव, अपि तु जीवनोपयोगित्वमपि स्वीकृतम्।

लोके कामक्रोधशोकभयादयो वृत्तयः रजस्तमोरूपाभ्यां विक्षेपमलाभ्यां युक्ता वासना भवन्ति। काव्यादौ ताः वृत्तयः तमोरूपं मलं रजोरूपं चाञ्चल्यं विहाय निर्मलाः प्रकाशरूपाः वा सत्यः स्थायित्वं प्रतिपद्यन्ते, स्थायिनश्च एते रसा इति संज्ञां लभन्ते। एवं मानववृत्तीनां विशुद्धीकरणमपि काव्यरसस्य कश्चन सिद्धान्तः। कामाद्याः वृत्तयः लोके रजस्तमोयुक्ताः, काव्ये तु सत्त्वयुक्ताः भवन्तीति सिद्धान्तस्याभिप्रायः। वस्तुतः तद्वृत्तीनां विशुद्धीकरणं पूर्णतया भक्तावेव सम्पद्यते। तत्रापि न केवलम् एकैकवृत्तेः, अपि तु वृत्तीनामाश्रयभूतस्य चित्तस्यापि शोधनं भक्त्या एव सम्भवति।

काव्यशास्त्रे मुख्यरसः यः शृङ्गारः वर्तते तस्य स्थायिभावः कान्ताविषयिणी रतिः प्रतिपाद्यते। लोके कामवासनेति निगद्यते। अर्थात् यावत् कामवासना रजस्तमोभ्यां युक्ता भवति तावत् तस्याः सङ्कीर्णस्वार्थमयत्वं न विहन्यते। अतः सा लौकिकी सङ्कीर्णान्तरराययुक्ता च भवति। एतादृशकामवासनायाः रसत्वं केनापि न स्वीक्रियते। तस्मात्कारणादेव काव्यशास्त्रे रसस्य अनुकार्यगतत्वं सिद्धान्ततया नाङ्गीक्रियते।

**''लौकिकत्वात्पारिमितत्वात्सान्तरायतया तथा ।**

**अनुकार्यस्य रत्यादेस्तद्बोधो न रसो भवेत्''**[१] इति।

परन्तु सैव कामवासना यदा रजस्तोमोरहिता सत्त्वैकमयी भूत्वा स्वकीयत्वपरकीयत्वसंवलितां सङ्कीर्णतां विहाय व्यापकतां प्राप्नोति तदा रसराज इति संज्ञां प्राप्नोति। एवमेव अन्यासामपि सर्वासां वृत्तीनां रसत्वं सम्भवति।

**भक्तेः भावत्वस्वीकृतिः**

संस्कृतकाव्यशास्त्रिभिः भक्तेः सर्वदा भावत्वमेव स्वीकृतम्। तेषां मते कान्ताविषयकरतिं विहाय देवमुनिगुरुनृपपुत्रादिविषया रतिः भावत्वेनैव स्वीक्रियते। न तु रसत्वेन।

संस्कृतवाङ्मये प्रायः ग्रन्थरचना देवप्रार्थनया आरभ्यते। रामायणमहाभारतादि-लक्ष्यग्रन्थेष्वपि आरम्भे भक्तिप्रतिपादनमस्त्येव। लक्षणग्रन्थेषु अपि भामहदण्डिरुद्रट-प्रभृतिभिः ज्ञाताज्ञाततया भक्तेः रसत्वबीजमुक्तं दृश्यते। स्पष्टरूपेण प्रप्रथमतया अभिनवगुप्तेनैव भक्तिरसस्योल्लेखः कृतः। तदपि बाधकत्वेन, न तु साधकत्वेन। तेन चतुर्णां पुरुषार्थानामाधारे शृङ्गारादिनवरसानां स्थितिः स्वीकृता। शृङ्गारहास्यकरुणरौद्र-वीरभयानकबीभत्सशान्तविस्मयेभ्यो व्यतिरिक्ता रसा एव न भवन्तीति तथा कान्ताविषयकरतिं हासादींश्च विना कोऽपि भावः स्थायित्वं न प्राप्नोतीति अभिनवगुप्तस्याभिप्रायः। अस्य दृष्टौ शान्त एव सर्वेषां भावानां मूलमिति। शान्तस्य प्राधान्ये मतिस्मृतिधृत्यादयो व्यभिचारिणो भवन्ति। ते एव भक्तावपि सम्भवन्ति।

अतः शान्ताद्भक्तौ किमपि वैशिष्ट्यं भिन्नत्वं वा न दृश्यते। अतः अभिनवगुप्तेन शान्ते एव भक्तेः अन्तर्भावः कथितः। अतः रसेषु भक्तेः स्वतन्त्रसत्ता नास्ति। भावे एव भक्तेः स्वीकृतिरिति अभिनवगुप्तस्याभिप्रायः।

काव्यप्रकाशकारेण मम्मटाचार्येण अभिनवगुप्तेनेव स्पष्टतया रसविषये भक्तिशब्दः नोपात्तः, परन्तु ''रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तः।'' इति वाक्येन भक्तेः भावत्वमेव अङ्गीकृतम्।

काव्यानुशासने हेमचन्द्रेण भक्तेः भावत्वमेव प्रतिपादितम्। अस्य मते हीनस्योत्तमे रतिः भक्तिः कथ्यते, तस्याः यदास्वाद्यत्वं वर्तते तत् भावकोटौ स्वीक्रियते, न तु रसावस्थायाम्। अनेन भक्त्या सह स्नेहवात्सल्ययोरपि तया रीत्यैव भावत्वं प्रतिपादितम् - ''स्नेहो भक्तिर्वात्सल्यमिति रतेरेव विशेषाः। तुल्ययोः परस्परं रतिः स स्नेहः। अनुत्तमस्योत्तमे रतिः प्रसक्तिः सैव भक्तिपदवाच्या। उत्तमस्यानुत्तमे रतिर्वात्सल्यम्। एवमादौ च विषये भावस्यैवास्वाद्यत्वम्।''[२] इति।

सङ्गीतरत्नाकरकर्तुः शार्ङ्गदेवस्य मते श्रद्धाऽऽर्द्रताऽभिलाषश्चेति त्रयो भावा आस्वाद्यतां प्राप्य भक्तिः स्नेहः लौल्यजचेति कथ्यन्ते। परन्तु श्रद्धाऽऽर्द्रताऽभिलाषाणां भावानां स्थायित्वं न सम्भवति। अपि तु तेषां व्यभिचारित्वमेव युक्तम्। स्थायिभावानामेव रसत्वं सिद्ध्यति, व्यभिचारिणां तु भावत्वमेव। तदेव कथयति शार्ङ्गदेवः -

''भक्तिं स्नेहं तथा लौल्यं केचित्त्रीन्मन्वते रसान्। श्रद्धाऽऽर्द्रताऽभिलाषांश्च स्थयिनस्तेषु ते विदुः। तदसद्रतिभेदौ हि भक्तिस्नेहौ नृगोचरौ। व्यभिचारित्वमनयो नृनार्योः स्थायिनौ तु तौ।''[३] इति।

दशरूपककारेण धनञ्जयेन तु ''प्रीतिभक्त्यादयो भावा....'' इत्यादिना भक्तेः भावत्वमपि गौणरूपेण स्वीकृतम्। भोजराजेन रससङ्ख्या यद्यपि द्वादश इति उक्ता तथापि भक्तिविषये तु किमपि नोक्तम्। रसतरङ्गिण्यां भानुदत्तमिश्रेण वात्सल्य-लौल्यकार्पण्यैस्सह भक्तेरपि रसत्वसम्भावनां दर्शयित्वा पुनः तस्याः भावत्वमेव निर्धारितम्।

रूपगोस्वामिजीवगोस्वामिमधुसूदनसरस्वतीप्रभृतिभिः भक्तिरसाचार्यैः भक्तेः रसत्वं प्रतिपादितम्। एते शान्तरसे भक्तेरन्तर्भावं सयुक्तिकं खण्डितवन्तः।

संस्कृतकाव्यशास्त्रस्यान्तिमाचार्येण पण्डितराजजगन्नाथेनापि भक्तिरसाचार्याणां तर्कः स्वीकृतः। तत्पूर्वं भक्तेः रसत्वमुपपादयति - ''अथ कथमेत एव रसाः? भगवदालम्बनस्य, रोमाञ्चाश्रुपातादिभिरनुभावितस्य, हर्षादिभिः परिपोषितस्य, भागवतादिपुराणश्रवणसमये भगवद्भक्तैरनुभूयमानस्य भक्तिरसस्य दुरपह्नवत्वात् भगवदनुरागरूपा भक्तिश्चात्र स्थायिभावः''[४] इति।

एवं रूपेण भक्तिरसाचार्यैः भक्तेः रसत्वमुपपाद्य पुनः पूर्वाचार्यैरभिनवगुप्त-प्रभृतिभिर्विहितः शान्ते तस्याः भक्तेरन्तर्भावः खण्डितः। यथा - ''न चासौ शान्तरसेऽन्तर्भवितुमर्हति, अनुरागस्य वैराग्यविरुद्धत्वात्''[५] इति।

अयं तर्कः वस्तुतः न तु पण्डितराजस्य, अपि तु मधुसूदनसरस्वती-जीवगोस्वामिप्रभृतिभिः भक्तिरसाचार्यैः पूर्वं निश्चितः आसीत्। एवं जगन्नाथः भक्तिरसाचार्याणाम् तर्कमङ्गीकृत्यापि वृद्धवाक्यप्रमाणत्वात् भक्तेः रसत्वं न निश्चितवान्। यद्येवं तर्हि भक्तेः रसत्वं कथं न स्वीक्रियते इति प्रश्ने सति जगन्नाथेन ''भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः'' तत्र ''रतिर्देवादिविषया व्यभिचारी तथाञ्जितः। भावः प्रोक्तस्तदाभासाह्यनौचित्यप्रवर्तिताः। इति हि प्राचां सिद्धान्तात्''[६] इति वृद्धवाक्यं प्रमाणितम्।

भक्तिशृङ्गारयोः उभयोरपि स्थायी रतिरेव। यदि उभावपि सहृदयहृदया-वेदनीयौ तर्हि कथम् एकस्यैव रसत्वं स्वीक्रियते, अन्यस्य तु भावत्वमिति प्रश्नोऽपि जगन्नाथेन उपपादितः यथा - ''न च तर्हि कामिनीविषयाया अपि रतेर्भावत्वमस्तु रतित्वाविशेषात्। अस्तु वा भगवद्भक्तेरेव स्थायित्वं, कामिन्यादिरतीनां च भावत्वम्, विनिगमकाभावादिति वाच्यम्''[७] इति वाक्येन प्रत्यक्षानुमानाभ्यां भक्तेः रसत्वं सिद्धम्। तत्स्वीक्रियताम् इति प्रश्ने जाते स्वीयपराधीनतां प्रदर्शयति यथा - ''भरतादिमुनिवचनानामेवात्र रसभावादिव्यवस्थापकत्वेन स्वातन्त्र्ययोगात्''[८] इति।

अर्थात् भक्तिशृङ्गारौ रतिसामान्यौ साम्येन च सहृदयसंवेद्यौ तर्हि शृङ्गारस्य भावत्वं भक्तेः रसत्वं चेति विषये सर्वथा अस्वतन्त्रोऽहमिति अकथयत्। तर्हि स्वीक्रियतां भक्तिनामा दशमो रस इति कथने सति सङ्ख्यानवस्थां शङ्कयति - ''अन्यथा पुत्रादिविषयाया अपि रतेः स्थायिभावत्वं कुतो न स्यात्? न स्याद्वा कुतः शुद्धभावत्वं जुगुप्साशोकादीनाम्? इत्यखिलदर्शनवैयाकुली स्यात्'' इति। एवं पुनः ''रसानां नवत्वगणना च मुनिवचननियन्त्रिता भज्यते'' इति तस्मात् ''यथा शास्त्रमेव ज्यायः'' इति।

एवं जगन्नाथेनैकेन सहृदयहृदयवेद्यत्वात्प्रत्यक्षप्रमाणेन तथा तर्कसम्मतत्वा-दनुमानेन च भक्तेः रसत्वं स्वीकृत्यापि परम्पराभीत्या निराकृतम्। एवं संस्कृतकाव्य-शास्त्रस्य आदिकालादवसानावधि भक्तेः रसत्वं न केनापि स्वीकृतम्। केषाञ्चन काव्यलक्षणविदां भक्तिशब्दः काव्यलक्षणकाले स्मृतिपथं नागतः, येषां पुनरागतस्तेषामपि रसानर्हतया एव, यद्यपि विरोधोऽपि सत्तां विना न भवति अतः भक्तिरूपे रससत्तासम्भावना संस्कृतकाव्यशास्त्रे चिरकालादेव समायाता। सा पुनः भक्ताचार्यैः तल्लक्षणानुसारेण दृढमूलं प्रापिता।

यद्यपि भक्तिरसस्य सूत्रपातः मुक्ताफले बोपदेवेन तथा लक्ष्मीधरेण भगवन्नाम-कूमुदीप्रभृतिग्रन्थे पूर्वमेव कृतः, परन्तु ससंरम्भतया तत्प्रतिपादकेषु षोडषशताब्द्यां रूपगोस्वामिमधुसूदनसरस्वतीजीवगोस्वमिनारायणभट्टकविकर्णपूर-विश्वनाथचक्रवर्ति-प्रभृतयः उल्लेखनीयास्सन्ति। एतैः ग्रन्थनिर्माणैः टीकाभिर्वा भरतदिशा भक्तेः रसत्वं दृढीकृतम्। भक्तेः रसत्वप्रतिपादनार्थं एतैः कृतरचनाः -

भक्तिरसामृतसिन्धुः, उज्ज्वलनीलमणिः - रूपगोस्वामी

भक्तिरसायनम् - मधुसूदनसरस्वती

भक्तिसन्दोर्भः, प्रीतिसन्दर्भः, श्रीमद्भागवतटीका,
भक्तिरसामृतसिन्धुोः टीका, उज्ज्वलनीलमणेः टीका - जीवगोस्वामी

भक्तिरसतरङ्गिणी - नारायणभट्टः

अलङ्कारकौस्तुभः - कविकर्णपूरः

श्रीमद्भागवतटीका, भक्तिरसामृतसिन्धोः टीका,

उज्ज्वलनीलमणेः टीका, भक्तिरसामृतसिन्धुबिन्दूज्ज्वल-

नीलमणिकिरणप्रभृतयो निबन्धग्रन्थाः - विश्वनाथचक्रवर्तिः

यद्यपि एतैः सर्वैः भक्तेः रसत्वसिद्धौ सर्वरीत्या काव्यशास्त्रीयपद्धतिरेव अनुसृता तथापि सामान्यकाव्यशास्त्रेऽप्यस्माकं भक्तिरसस्य प्रवेशो भवेदिति न केनापि प्रार्थितम्।

एवं प्रायः सर्वैः भक्तिरसाचार्यैः रसभेदेषु भक्तिर्न परिगणिता, अपि तु भक्तिरेव मूलरसः, मधुर (शृङ्गारादि) प्रभृतिभेदास्तस्यैव स्वीकृताः। केवलं कविकर्णपूरेण शृङ्गारादयो नव वात्सल्यं प्रेम चेत्येवमेकादशरसभेदैस्सह द्वादशतमः भक्तिरस इति स्वीकृतम्। परन्तु तेन रसमूलस्य प्रकृताप्रकृताविति द्वौ भेदौ प्रतिपादितौ। तत्र -

''प्राकृतो लौकिको मालतीमाधवादिनिष्ठः अप्राकृतः श्रीकृष्णराधादिनिष्ठः''[१] इति स्वीकृत्य स्वस्मिन् ग्रन्थे अप्राकृतः राधाकृष्णविषयक एव रसः उदाहृतः, न तु प्राकृतः। अस्य टीकायां विश्वनाथेनापि प्राकृतरसस्य रसत्वमेव नाङ्गीकृतम्। एवं रूपेण काव्यशास्त्रे आलङ्कारिकैः भक्तेः भावत्वस्वीकारः दृश्यते।

**भक्तेः रसत्वस्वीकारः**

भक्तेः रसत्वप्रतिपादकैः वैष्णवैः भक्तिकाव्यानां विभिन्नोद्धरणैरिदं साधितं यत् भक्तिरेकः स्वतन्त्र एव रसोऽस्तीति। सहृदयभक्तैः भक्तिकाव्यरासलीलादौ प्रत्यक्षं भक्तिरास्वाद्यते। तर्केणापि एतैः भक्तेः रसत्वं साधितम्। श्रीमद्भागवतादि-भक्तिशास्त्राणां शब्दप्रमाणैरेतदवगम्यते। एवं प्रमाणत्रयसत्त्वेऽपि परम्पराविरहात् भक्तेः रसत्वं नाङ्गीक्रियते चेत्तदसङ्गतं स्यात्। शब्दप्रमाणका वयमिति सिद्धान्तः काव्यशास्त्रे सर्वथा न युज्यते, अन्यथा भारतीयकाव्यशास्त्रस्याद्याचार्येण भरतमुनिना अलङ्काररीतिध्वनिवक्रोक्तिवादादयः सिद्धान्ताः क्व प्रतिपादिताः, तथापि

परवर्तिभिर्विद्वद्भिः काव्यशास्त्रिभिरिमे सिद्धान्ताः प्रतिपाद्यन्ते। ते च काव्यशास्त्रे पूर्णरूपेण वा अंशरूपेण वा स्वीक्रियन्ते। भरतमुनिना दशगुणाः प्रोक्ताः, परन्तु भामहेन आनन्दवर्धनेन च काव्ये त्रयः एव गुणाः स्वीकृताः, अवशिष्टानां भरतोक्तसप्तगुणानां खण्डनमपि कृतम्। परवर्तिकाले संस्कृतकाव्यशास्त्रे गुणत्रयवाद एव प्रायः स्वीकृतः। नाटचशास्त्रे अष्टौ स्थायिभावाः उक्ताः, तदाधारे अष्टावेव रसाः भरतमतेन प्रतिपत्तुं युज्यन्ते। पुनः मध्यकालेऽपि धनञ्जयधनिकप्रभृतियः अष्टावेव नाटचरसा इति भरतमतमङ्गीकृतवन्तः। अर्थात् काव्यशास्त्रपरम्परावादिष्वपि रससंख्या अष्टौ उत नवेति न निश्चयः।

भक्तेः रसत्वसिद्धौ भक्त्याचार्यैः पूर्णरूपेण भरतेनोक्तकाव्यरसपरम्परैव अनुसृता। मूलरूपेण अष्टौ स्थायिभावाः, अष्टौ सात्त्विकभावाः, त्रयस्त्रिंशद् व्यभिचारिभावाः इत्येकोनपञ्चाशद्भावाः रसहेतुत्वेन भरतेन परिगणिताः। भक्तिरसाचार्यैः रससंख्यावर्धनेऽपि मूलभावानां संख्यायाः परिवर्तनं न कृतम्। परन्तु मात्सर्योद्वेगदम्भेर्ष्याविवेकनिर्णयवैक्लव्यक्षमाकुतुकोत्कण्ठाविनयसंशयधाष्टर्चा इति त्रयोदशव्यभिचारिभावानां सम्भावनां प्रदर्श्य पुनर्भरतमुनिस्वीकृतेषु त्रयस्त्रिंशद् व्यभिचारिभावेषु अन्तर्भाविताः। एवं रसस्य मूलभावना भरतसम्मता एकोनपञ्चाशत्संख्याकभावपरम्परा च भक्तिरसपक्षे अक्षुण्णा एव प्रतिपन्ना।

स्थायिनां संख्या अष्टौ, रसानां नवत्वं कथमिति जाते, शान्तरसप्रतिपादकेन अभिनवगुप्तेन आत्मानमेव शान्तस्य स्थायित्वेन प्रतिपाद्य परम्परापालनपुरस्सरं नवमः शान्तो रसः प्रतिपादितः। एवं हि यथा भारतीयकाव्यपरम्परा शान्तरससमर्थकैः अभिनवगुप्तप्रभृतिभिः काव्यशास्त्रिभिर्निर्वाहिता खण्डिता वा तथैव भक्तिरससमर्थ-काचार्यैरपि सा परम्परा परिपाल्यते। तस्मात् भक्तेः रसत्वस्वीकारेण भक्तिरस-प्रतिपादकैर्वा संस्कृतकाव्यशास्त्रपरम्परा विहन्यते इति कथनं सर्वथा निर्मूलम्। अवश्यमेव भक्तिरसप्रतिपादकाचार्याणां गौडीयवैष्णवानां रचनाप्रवृत्तिः परपक्ष-खण्डनात्मिका नास्ति अपि तु स्वपक्षमण्डनात्मिकैव विद्यते।

काव्यशास्त्रिभिः वस्तुतः ''रसो वै सः'' इत्यादिवाक्येन या काव्यरसस्य अखण्डताऽऽनन्दमयता संयोजिता सा रसान्तरेषु सर्वथा न सङ्गच्छते प्रत्युत भगवद्भक्तावेव युज्यते। काव्यरसानामपेक्षया भक्तेः घनत्वमानन्दमयत्वं च ध्वनिकारेणानन्दवर्धनेनापि स्वीकृतम्।

भक्तिरसायणकारेण विषयालम्बनरूपो भगवान् भक्तजनमनसि आश्रयालम्बनरूपतामुपगतो ''रस'' इति संज्ञां लभते इत्यभिहितम् -

**''भगवान् परमानन्दस्वरूपः स्वयमेव हि।**
**मनोगतस्तदाकारो रसतामेति पुष्कलम्।।''**[१०] इति।

भारतीयपरम्परायां चैतन्यस्यैव नित्यता, आनन्दमयता च सुप्रसिद्धा, तद्विपर्यये जडस्य अनित्यतासुखदुःखमयता चापि ख्याता। शास्त्रकारैः आत्मनः अखण्डता, स्वप्रकाशता, चिन्मयता, आनन्दमयतेत्यादिधर्माः प्रतिपादिताः। काव्यशास्त्रिभिः पुनः ते एव परमात्मगुणाः रसस्यापि स्वीकृताः। यथा - ''सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः''[११] इति।

परम्पराविरोधभयेन ये भक्तेः रसत्वं न स्वीकुर्वन्ति तेषामपि मतं समीचीनतां नोपगच्छति। यतोहि रसस्य स्वरूपमन्ततः काव्यशास्त्रिभिरपि आनन्द एव स्वीक्रियते, तस्यानन्दस्य एकमात्रनिलयः परमात्मेति विषयेऽपि काव्यशास्त्रिणां न विप्रतिपत्तिः। यदुद्देश्यात्मको रसो भरतमुनिना नाट्यशास्त्रे प्रस्तावितो यत्स्वरूपश्च परवर्त्तिभिः काव्यशास्त्रिभिः स्वीकृतः स सर्व एव भक्तौ सिद्ध्यति। अतः भक्ताचार्यैरपि शास्त्रनियममनुल्लङ्घ्यैव भक्तेः रसत्वं स्वीकृतमिति सप्रमाणं सोदाहरणञ्च स्वग्रन्थेषु तैः निरूपितं वर्तते।

## सन्दर्भाः

१. साहित्यदर्पणः - ३.१७
२. काव्यानुशासनम् - पृ.सं. ६८
३. सङ्गीतरत्नाकरः - पृ.सं. ८३९
४. रसगङ्गाधरः - पृ.सं. १८९

५. रसगङ्गाधरः - पृ.सं. १८८
६. रसगङ्गाधरः - पृ.सं. १९०
७. रसगङ्गाधरः - पृ.सं. १८०
८. रसगङ्गाधरः - पृ.सं. १९१
९. अलङ्कारकौस्तुभम् - ११०
१०. भक्तिरसायनम् - १.१०
११. साहित्यदर्पणः - ३.२

## अनुशीलितग्रन्थसूची


१. अलङ्कारकौस्तुभम् - कविकर्णपूरः, चौखम्बा सुरभारती प्रकाशन - वाराणसी
२. काव्यानुशासनम् - हेमचन्द्रः, चौखम्बा विद्याभवन - वाराणसी
३. भक्तिरसायनम् - मधुसूदनसरस्वती
४. रसगङ्गाधरः - पण्डितराजः जगन्नाथः, चौखम्बा संस्कृत प्रतिष्ठान - देहली - १९९४
५. सङ्गीतरत्नाकरः - शार्ङ्गरवः
६. साहित्यदर्पणः - कविराजः विश्वनाथः, चौखम्बा सुरभारती प्रकाशन - वाराणसी - १९९७
७. संस्कृतकाव्यशास्त्रे भक्तिरसविवेचनम्, लेखकः सम्पादकश्च - डा. कृष्णविहारिमिश्रः शास्त्री, श्रीगुरुपूर्णिमा २०३५ वि.सम्वत्


□□□

# विद्यामाधवविरचिते पार्वतीरुक्मिणीयमहाकाव्ये पात्रपोषणविमर्शः

*सोमनाथ मुखार्जी*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

उत्पाद्येतिवृत्तकाव्येषु पात्रपोषणविषये कवीनां स्वातन्त्र्यम् अधिकं भवति । प्रख्यातवृत्तानां विषये न तथा तत्र कारणन्तु इतिहासपुराणादिषु वर्णिताः तेषां पात्राणां गुणगणादिकाः प्रजाबाहुल्येषु सम्यग्ज्ञाताः भवन्ति । तेषां परिवर्तनेन ग्रन्थगौरवक्षतिः जायेत । अतः तादृशगुणगणान् मनसि निधाय, तान् परिपोषयितुं यानि कानिचन स्वल्पपरिवर्तनानि एव कविः कर्तुं शक्नोति। एकार्थककाव्ये कीदृशी स्थितिश्चेत्, पुनः द्विसन्धानकाव्यनिर्माणे तादृशी स्थितिः कठिना भवति। अतः साधारणतया द्विसन्धानकाव्येषु पात्रपोषणविषये कवेरवकाशः स्वल्पः भवति । किन्तु अयं कविः द्विसन्धानकाव्येऽपि पात्रपोषणविषये अतीव निपुणः इति ज्ञायते । यथा पार्वतारुक्मिणीये -

**हिमाद्रिकन्यासहितं महेशं  लक्ष्मीसमेतं मधुसूदनञ्च ।**
**स्तोतुं तदुद्वाहकशैक्यचित्रप्रबन्धलक्ष्यादहमुद्धसहिष्ये ।।** (१.२०)

इति । अतः महेशः, मधुसूदनश्च नायकः भवति । पार्वती, रुक्मिणी च नायिका भवति । पार्वतीविवाहविषये कुमारसम्भवकथा आधारभूता भवति । रुक्मिणीविवाहविषये भागवतकथा आधारभूता भवति । अतः नायकद्वय, नायिकाद्वयविचारः आवश्यकः भवति । प्रथमतः पार्वतीपरमेश्वरयोः कथां  स्वीकृत्य विचारयामः । तत्पक्षे महेशः नायकः भवति । रुक्मिणीविवाहपक्षे श्रीकृष्णः नायकः भवति ।

**नायकः**

प्रख्यातेतिवृत्तकाव्येषु नायकः -

**प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ।।**[1]

अथ नायकगुणाः कथ्यन्ते -

**महाकुलीनतौज्ज्वल्यं महाभाग्यमुदारता ।**
**तेजस्विता विदग्धत्वं धार्मिकत्वादयो गुणाः ।।**[२]

अपि च -

**यशः प्रतापसुभगो धर्मकामार्थतत्परः ।**
**धुरन्धरो गुणाढ्यश्च नायकः परिकीर्तितः ।।**[३]

काव्येऽस्मिन् तृतीयसर्गे नारदमुखात् नायकगुणगणादिकाः भैष्मकहिमवन्तौ श्रृणुतः। नायकः आदिपुरुषः, स्थाणुरेकः पुरुषः, सनातनः, पुरा एकस्सन् स्वीयमायया समेत्य चतुर्मुखं सृष्ट्वा, सर्वभूतानि असीसृजत् । अत्र नायकस्य अखिलशक्तिः, माहात्म्यं, महाकुलीनता च ज्ञायते ।

तदनन्तरं शिवस्य वेदोद्धरणं, चन्द्रधारणं, विषधारणं, त्रिपुरासुरसंहारः, दक्षयज्ञनाशनम्, शिवतेजः, सतीदेव्यै तपः करणम् इत्यादिना पराक्रमः अभिवर्णितः। श्रीकृष्णपक्षे मत्स्य-कूर्म-वराह-नृसिंह-वामन-परशुराम-कृष्ण-श्रीराम-बौद्धावतारादि-कथनात्पराक्रमः वर्णितः । एवं नायकस्य औज्ज्वल्यं धुरन्धरत्वं च अभिवर्णितम् ।

अथ पञ्चमसर्गे नायिकयोः मनः ज्ञातुं द्विजः समागत्य, स्तुतिगर्भं स्फुटाक्षेपं वाचं कुरुते । नायकः कुलहीनः, निर्गुणः, विरूपः, वनमधिवसन्नास्ते, पिशाचैः सह गोपकैः क्रीडन्, खगं विमानमारुह्य चरन् (प्रवयसं वृषम् आरुह्य चरन्), मातुलस्य अप्रियं विदधानः, पशूनां (जीवजन्तूनां) अधिपतिः, धात्रीसंहारकारकः , लयकारकः इत्यर्थः । क्रतुद्विह बलवत्तमः इति वर्णितवान् । अपि च -

**न दैवं न गुरुर्यस्य न बन्धुर्न सखा चरः ।**
**न धर्माभिरतिर्नार्यो न च वर्णाश्रमस्थितिः ।।** (पा. रु. ५।१६)

इत्यनेन नायकः तेषामतीतः दैवतरूपः इति ज्ञायते ।

नायकस्य गुणान् विधातुं विधाताऽपि न प्रभुः समर्थः इति नायिकाकथनम् । अयं जितमृत्युः इत्यस्मात् कारणात् कुलहीनः इत्यपि नायिकावचनम् । सर्वैश्वर्यार्थं सुराः अपि तमेव अर्चयन्ति । अनेन अस्य महाभाग्यं, उदारत्वं च ज्ञायते ।

अनन्तरं सप्तमसर्गे विवाहः, अष्टमनवमयोः उद्यानविहाराटनं वर्णितम् । अनेन नायकस्य धर्मकामार्थतत्परत्वम्, धार्मिकत्वं च वर्णितम् । अतः काव्येऽस्मिन् नायकः धीरोदात्तः इति ज्ञायते ।

**नायिका**

नायकविचारणानन्तरं नायिका विषयेऽपि विचार्यते - अत्र नायिका पार्वती, रुक्मिणी च भवति । अयं विषयः उक्तपूर्व एव । तस्याः गुणगणादिकाः विचार्यन्ते । ततः पूर्वं नायिकाः कति प्रकाराः इति विचार्यन्ते ।

**अथ नायिका त्रिभेदा स्वान्या साधारणा स्त्रीति ।**
**नायिका सामान्यगुणैः भवति यथासंभवैर्युक्ता ।।**
**विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया ।**
**साऽपि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति ।।**
**प्रथमावतीर्णयौवनगदनविकाश रतौ नाम ।**
**कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ।।**[४]

काव्येऽस्मिन् नायिका स्वीया भवति । तत्रापि मुग्धा भवति । नायिकायाः जन्मकाले -

**तज्जन्मकाले सुरपुष्पवृष्टिः पपात स्यात् पत्रशिखिप्रहर्षा।।** (पा.रु.१.४८)

इति । अनेन तस्याः जन्मकालः पवित्रः इति ज्ञायते । सा विनयार्जवादियुक्ता । तद्यथा- तृतीयसर्गे नारदः वरवर्णनं करोति भीष्मकहिमवतोः पुरतः । तदा नायिका विनयेन नारदं नमस्करोति । तत्र विनयार्जवादित्वं ज्ञायते ।

**अकरोन्निजविग्रहश्रिया निखिलं लोकमवेक्षणोत्सुकम् ।।** (पा.रु.२.१)

इत्यनेन प्रथमावतीर्णयौवनत्वं ज्ञायते ।

**भर्तात्मनस्त्रिभुवनाधिपतिस्स देवो**
**भावीति देवमुनिनाऽभिहितां हितार्थाम् ।**
**आकर्ण्य तां गिरगृतामगृतानुरूपां**
**आनन्दसम्पदमधत्त वधूः प्रकामम् ।।** (पा.रु.३.३६)

इत्यनेन तस्याः पतिव्रताभावः व्यज्यते ।

**वर्धिष्णुना मनसिजेन विबाध्यमाना**
**प्राप्ता कृशाङ्गलतिकेयमिमामवस्थाम् ।।** (पा.रु.४.४४)

इत्यनेन मदनविकारत्वं ज्ञायते ।

पञ्चमसर्गे द्विजभाषणसमये सः नायिकाम् एवं वर्णयति- **"कुलोद्भूता, गुणशालिनी, रूपशोभाढ्या"** (पा.रु.५.७) इत्यनेन तस्याः रूपगुणाधिक्यं ज्ञायते। द्विजवाक्यं खण्डयितुं नायिका एवं कथयति -

**स सुरूपो विरूपो वा सधनो निर्धनोऽपि वा ।**
**कुलजोऽकुलजो वाऽस्तु स्थिरा तत्रैव मे मतिः ।।** (पा.रु.५.२४)

अनेन नायिकायाः गाढानुरागं ज्ञायते ।

नायकस्य गुढराहित्यम् एवं स्थापयति -

**प्राणिनां येन सृष्टानां सदसत्कुलकल्पना ।**
**जितमृत्योरजस्यास्य कथं विज्ञायते कुलम् ।।** (पा.रु.५.२९)

इष्टदेवतापूजाव्याजेन वरं दृष्ट्वा मनसि आनन्दमनुभवति । लज्जां व्यक्तीकरोति। ईदृशी नायिका मुग्धा भविता तत्पश्चात् सप्तमसर्गे उद्वाहः, तदनन्तरम् उद्यानवनगमनं, तत्र चिरं संक्रीड्य, पुनर्गृहागमनम् इति कथाभागः ।

अतः काव्येऽस्मिन् नायिका स्वीया, तत्रापि मुग्धा इति ज्ञायते । इत्थमेव काव्येऽस्मिन् पात्रपोषणं कविना कृतमस्ति ।

## सन्दर्भाः

१. साहित्यदर्पणे ६.९
२. प्रतापरुद्रीये, नाटकप्रकरणे, ११ श्लोकः
३. तत्रैव, २२ श्लोकः
४. साहित्यदर्पणे - ३.५७-५८

□□□

# किरीटिवेङ्कटाचार्यैः विरचिते शृङ्गारतरङ्गिणीनाटके रसपोषणम्

*ए. चन्द्रज्योती*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

संस्कृतसारस्वतस्य सारभूते दृश्यकाव्यप्रपञ्चे दशविधरूपकेष्वपि अष्टादशोपरूपकेष्वपि सकलसहृदयरञ्जकः रसः मुख्यतमः भवति। अत एव "नाटकान्तं हि साहित्यम् - नाटकान्तं कवित्वमिति" प्रसिद्धिः। भास-कालिदास-भवभूति-विशाखदत्त-शूद्रकाः संस्कृतनाटकप्रपञ्चे सुप्रसिद्धाः विविधरसपोषकाः। तथाष्टादशशताब्दे किरीटिवेङ्कटाचार्यैः कृतः शृङ्गारतरङ्गिणीति नाटकग्रन्थः शृङ्गाररसप्रधानात्मकः। इतररसाः अपि नाटकेऽस्मिन् सुष्ठु पोषिताः। शृङ्गाररसप्रधानात्मकेऽस्मिन् नाटके प्रधानाङ्गभूतानां शृङ्गारवीररौद्रबीभत्साद्भुतभयानकशान्तरसानां पोषणविषये विचारः क्रियते अस्मिन् शोधपत्रे।

**शृङ्गाररसपोषणम्**

शृङ्गाररसवर्णनात् सर्वेषामानन्दो भवतीति सर्वेषु रसेषु मुख्यतमो भवति शृङ्गाररसः। शृङ्गं = प्रधानम् इयत्ति[१] इति शृङ्गारशब्दार्थः अहोबलपण्डितीये उक्तः। उक्तः युक्त एव। ध्वनिकारः शृङ्गारस्य प्राधान्यं स्पष्टमेवं निरूपितवान्। तद्यथा -

**शृङ्गार एव मधुरः परः प्रह्लादनो रसः।**
**तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति।।**[२]
**शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्।**
**माधुर्यमार्द्रतां याति यतः तत्राधिकं मनः।।**[३] इति

शृङ्गाररसेऽपि संयोगशृङ्गारादपि वियोगशृङ्गारे माधुर्यस्य अवकाशो भवतीति ध्वनिकारस्याभिप्रायः। शृङ्गारस्य स्त्रीपुंसौ आलम्बनौ भवतः। यौवनवयोपीनो-

रुश्रेणिस्तनसौन्दर्यरूपादयः उद्दीपनविभावाः। कटाक्षवीक्षणसंस्पर्शनललितमृदुल-सङ्घर्षणादयः अनुभावाः। हर्षादयः सञ्चारिणः। स्त्रीपुंसयोः अन्योन्यालम्बनः प्रेमाख्यः चित्तवृत्तिविशेषः रतिः स्थायीभावः। स द्विविधः संयोगशृङ्गारः, वियोगशृङ्गारश्चेति। विप्रलम्भः = विश्वासः। अत एव वियोगशृङ्गारस्य विप्रलम्भशृङ्गार इति नामान्तरम्।

अत्र द्वितीयाङ्के सत्यभामाश्रीकृष्णयोः वियोगशृङ्गारः वर्णितः। रुक्मिण्यै पारिजातपुष्पं दत्वा सपदि सत्यभामायाः भीत्या तस्याः भवनं जगाम। सत्यभामा बहुधा उपचारं कृत्वा प्रणम्यापि कृष्णे पराङ्मुखी जाता। तत्र सत्यभामायाः वर्तनं सा कलहान्तरिता अतश्च विप्रलम्भः मानजन्यः प्रतीयते -

(गृहं प्रविश्य सविस्मयम्)

**पुरः काचित्कान्ता लसति ललने द्वे उभयतः**
**तथैवान्या धन्या कृतिरपरभागे विलसति।**
**कथं कस्या यास्याम्यहमिह सदेशं तदधुना**
**क्षणं स्थित्वा मत्वा समनुसरणीय्याद्य तरुणी।।**[४]

(प्रविश्य सत्यभामा)

**सरभसं चरणयोर्निपत्य भाषमाणान्यतो व्रजति।**

कृष्णः - कराभ्यां गृहीत्वा तल्पे उपवेश्य -

**शृङ्गाराम्बुधिचन्द्रिके किमिति मामालापजालामृतै-**
**र्नैवाह्लादयसे कृतो न दयसे कोपोऽनुरूपो न ते।**
**कुन्देन्दीवरबृन्दसुन्दरकलारङ्गैरपाङ्गस्तपो**
**द्दामप्रेमरसं प्रसारय मयि प्राणप्रिये भामिनि।।**[५]

एवं पञ्चमाङ्केऽपि मणिचूलिकानीतपर्यङ्कवृत्तान्तादारभ्य सत्यभामावर्णने संयोगशृङ्गार एव रसः। पुनश्च रुक्मिणीगृहं गते कृष्णे सत्यभामा विरहिणी चिरं दुःखिता भवति। अत्रापि विप्रलम्भशृङ्गार एव।

पञ्चमाङ्कान्ते पुनः कृष्णागमनेन संयोगशृङ्गारो वर्णितः। यथा -

कृष्णः - (सविस्मितं)

**अविरतबहुश्वासनासाविभातुमिमीलिष-**
**त्कुवलयकलापात्रे नेत्रे श्लथाब्जसखं मुखम्।**
**अभिमुखपतत्खेदोद्भेदातनुश्च सखी ततो**
**विशदयति ते क्रान्ते हन्त ध्रुवं पुरुषायितम्।।**[६]

सत्यभामा - (सलज्जम्) मुखमवनमयति।

मञ्जुभाषिणी - (उपसृत्य) अनेन पुष्पतालवृन्तनयुगलेन युवार्वीजनं इति सर्वाव्यजनोपचारं नाटयन्ति।

सत्यभामा - (स्पर्शसुखमभिनीय सरोमाञ्चम्)

**चन्दनस्यन्दनेनैवानन्दमन्दां तनुं दधत्।**
**कुन्दबृन्दव्यजनतस्स्पन्दते मन्दमारुतः।।**[७]

कृष्णः - (साञ्जलिबन्धम्)

**कलशजलधिर्न मथितो न च वासुकिना गिरिर्ग्रथितः।**
**लब्धस्तदपि सुरद्रुः प्रेम्णा तव नाथ किं परं लभ्यम्।।**[८] इति।।

**वीररसपोषणम्**

वीररसोऽपि चतुर्थे अङ्के बहुधा वर्णितः । तस्य बीजं तृतीये अङ्के एव दृष्टम्। तृतीये अङ्के विष्कम्भानन्तरं कृष्णः पुनः द्वारकामागत्य स्वदौत्यवैफल्यं निवेदयति। ततः कृष्णवाक्येषु वीरः अभिव्यक्तः। नारदः कृष्णं प्रति इन्द्रवाक्यानि अनूद्य एवं कथयति।

**गर्वदुर्विधसर्वपर्वतगरुत्पर्वालिनिर्वापणा-**
**रम्भोज्जृम्भितविक्रमक्रमयुतं दम्भोलिमम्भोजदृक्।**
**जानीते नयनस्य हो चपलता धिक् धिग्वृधा सम्भ्रमं**
**शम्भोऽयं न तु वल्लवीकुचलुठन्मल्लीमतल्लीभरः।।**[९]

ततः कृष्णः इन्द्रादिगमने उत्साहमेवं दर्शयति। सरोषोन्मेषं हुंकृत्य भगवन्महानयं महेन्द्रस्य मतिविपर्यासः। यतस्सर्वज्ञस्य भवत एव सविध एवं विकत्थितम्। तथाहि -

**देवर्षभाद्यदपवाह्य पुरा मयैव**
**गोवर्धनाय रचिता ह्युचिता सपर्या।**
**क्वाभूत्तदा कुलिशमस्य कथं न वेत्ति**
**संवर्तकाम्बुदकदर्थनमस्मदीयम्।।**[१०]
**भवतु श्व एव सर्वं प्रकटी भविता।**

वीररसस्य विस्तरः चतुर्थे अङ्के दृश्यते। रत्नशेखरशृङ्गारतिलकयोः सम्भाषणेन एष रसः व्यक्तः भवति। गरुडमहेन्द्रयोरपि सङ्ग्रामः वीररसपोषकः। विशेषतः गरुडवाक्येषु -

**गत्वा प्राक्तनपत्तणं समुदितम् जित्वा भटानुद्भटान्**
**स्थित्वा द्वारि कवाटिका विघटनं कृत्वा प्रविक्ष्यामृतम्।**
**धृत्वा काञ्चनकुम्भकेन भुवि यो हत्वार्पयद्भोगिनां**
**सत्वामेष महेन्द्र केन विधिना सत्वाधिकं मन्यते।।**[११] इति। यथा च पराजितः इन्द्रः क्षमां ययाचे तदा वीररसः शान्तः।

**मनो मुग्धं धिग्धिग्मधिगभिमानं धिगखिलं**
**प्रवृत्तस्त्वं जेतुं यदहमुदहङ्कारभरितः।**
**क्व चाहं त्रैलोक्यप्रथितविभस्त्वं क्व च हरे**
**गजं ख्यातं जेतुं मशकशिशकः किं प्रभवति।।**[१२] इति।

**रौद्ररसपोषणम्**

गुरुबन्ध्वादि परमापराधजन्मा मनः प्रज्वलनाख्यः क्रोधः रौद्ररसस्य स्थायीभावः। वीररसे पराक्षेपपराणि वाक्यानि अस्मिन् नाटके रौद्रस्य उदाहरणं भवन्ति। न चात्र वीररस एव वक्तुमुचितः। तथापि एकस्मिन् रसे मुख्यतया वर्ण्यमाने अन्यो रसः अङ्गं भवति। नान्तरीयकश्च यथा वीररसे वर्णनीये रौद्रः, रौद्रे च उत्साह, शृङ्गारे हास्यः, हास्ये च शृङ्गारः।

तृतीये अङ्के कृष्णः पारिजातं हर्तुमागच्छतीति श्रुत्वा इन्द्रः नारदं सगर्वं कृष्णः तत्र न प्रभवति इत्युवाच। तदानीम् इन्द्रवाक्यानि रौद्रोदाहरणानि। एतत् प्रागेव उदाहृतम् (गर्वद्दुर्विद..)

प्रथमे अङ्के शठकोपः इन्द्रस्य अविनयाय कुपितः तं शशाप। तदपि रौद्रोदाहरणम्।

**लूनं प्रसूनं हरिणा यदाभूत्, मौनी तदानीमतितीव्रकोपः।**
**शापं महापत्प्रदमाजगाद, शक्राय चक्रायुधतुल्यतेजाः।।**[१३]

**बीभत्सरसपोषणम्**

"**कदर्यवस्तुविलोकनजन्मा विचिकित्साख्यश्चित्तवृत्तिविशेषो जुगुप्सा**"[१४] बीभत्सरसस्य स्थायीभावः। चतुर्थे अङ्के सङ्ग्रामवर्णने वीररसाङ्गभूतः बीभत्सरसः परिपुष्टः।

रत्नशेखरः युद्धे निहतं किरातहूणसेनं वर्णयन् तेषां देहान् कङ्काः जम्बूकाश्च संकृष्यभक्षयन्ति इति वर्णयति। तत्र व्यक्तः बीभत्सरसः वीररसस्य अङ्गमेव।

**पक्ष्मावेक्षणदूरचक्षुरधिकप्रोद्यद्रदश्रेणिका**
**ग्रस्तव्यस्तविलम्बमानरसनं व्यकीर्णचूढाछटम्।**
**कङ्काः पङ्किलसङ्कुचद्रुधिरकं भीमं शिरोमण्डलं**
**संकृष्यालुनतेऽत्र हूणविततेरुत्कोटिभिस्त्रोटिभिः।।**[१५]

**अद्भुतरसपोषणम्**

प्रथमे अङ्के शठकोपमहर्षिणा नारायणस्य अर्चने पुष्पेभ्यः कन्याविभावः महेन्द्रप्रेषितायाः अप्सरसः गर्वभङ्गहेतुः द्रष्टुः श्रोतुर्वा विस्मयोत्पादकः भक्तिरसाङ्गभूतः अद्भुतरसस्य अभिव्यञ्जको भवति। हेमायाः विलासैः शठकोपः न जातविकारः धीरः अभूत्।

**विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः**[१६]

ततः तपस्विनः धैर्येण जातलज्जा हेमा स्व प्रयत्नात् विरम्य प्रत्यागत्य महेन्द्रं तदद्भुतं निवेदितवती।

अहो महामुनेश्शान्तिवैभवम् - यतः -

**शृण्वतो मम विवृण्वतोऽपि तेऽनङ्गजाविकृतिरङ्गजायते।**
**कामिनीं स्वरति कामिनीमृषेः पश्यतोऽपि न हि दृश्यते रतिः।।**[१७]

ततः किं प्रतिपन्नम् -

चित्राङ्गदः - ततश्च सा तस्येन्द्रियजयात्पराभूता पुरन्दरस्य तदुदन्तं श्रावयन्ती किमप्यश्रुतपूर्वमभाणीत्।

मदनशेखरः - किं तत्

चित्राङ्गदः -

**आमन्त्र्य यत्कुसुमपञ्चकमेकमेकमाहृत्य चैकसमये हरये ददाति।**

**तस्मादुदेति तरुणी रमणीयरूपा तल्पं च सोपकरणं मणिकङ्कणौ च।।**[१८]

तेषु च समुदितेषु भगवन्तमावाह्य तत्सर्वं तया सह भगवते समर्पयति। एवं चित्राङ्गदमन्दनशेखरयोः परस्परसम्भाषणे न अद्भुतरसः प्रकटितो भवति। तृतीयाङ्के विश्वावसोः श्रीमन्नारायणसाक्षात्कारोपि अद्भुतरसस्योदाहरणं भवति।

**शान्तरसपोषणम्**

विश्वावसोःनारायणसाक्षात्कारं अभिनन्दयन् चित्राङ्गदः परमात्मनः अप्रमेयत्वं वर्णयति। तत्र कृष्णायाः भावस्य वा अदर्शनं शमः एव लक्षितः।

**न्यग्रोधबीजकणिकां शतधा निकृत्य तत्रायुतायुतशतैकलवं विविच्य।**

**हस्ते चिकीर्षति स यो महिमानमस्य मातुं प्रवर्तत इतिस्म वदन्ति वृद्धाः।।**[१९]

अत्र हेमप्रत्यनीकानन्तकल्याणगुणलक्षणस्य भगवतः अनन्तस्य मूर्तिः निर्गुणरूपेणैव वर्णिता।

यद्वा एवं अणोः अणीयांशमपि यः दिदृक्षति तद्वदिति सम्भावनया सम्भावनालङ्कारेण अभिव्यक्ता वासुदेवरतिः असंलक्ष्यक्रमतया अभिव्यक्तशान्तरसस्याङ्गभूतः।

**भयानकरसपोषणम्**

रत्नशेखरः शृङ्गारवीरयोः सान्तर्यं चतुर्थाङ्के वर्णयन् शचीदेव्याः भयमपि वर्णितवान्। अहो महानयं सहृदयशिवंकर शृङ्गारवीरयोः सङ्करः। यतः -

**जितमधुकरश्रेणीरिहाप्सरसामहो**

**सरभसरसोत्कर्षं कर्षन्ति केचिदितो भटाः।**

**परिचितपरिहासाः वासांसिभीशिथिलान्विता**
**पर्यति तरुणीजालेचेलान्कृषन्त्यपरे भटाः।।**[२०]

एवं रूपेण भयानक रसः सम्यक् पोषितः।

**उपसंहारः**

शृङ्गाररसप्रधानेऽस्मिन् नाटके सन्दर्भानुसारं वीररौद्रबीभत्सााद्भुतभयानक-शान्तरसाः अङ्गभूततया वर्णिताः। अस्य शृङ्गारतरङ्गिणीनाटकनामश्रवणेनैव ज्ञायते यत् एतन्नाटकं रसराजशृङ्गाररसप्रधानमिति। अस्मिन् नामसार्थक्यं दृश्यते।

## सन्दर्भाः

१. अहोबलपण्डितीयम्, (आन्ध्रव्याकरणम्) सं.प-३

२. ध्वन्यालोकः२/ ७
३. तत्रैव २/८
४. शृङ्गारतरङ्गिणी२/४४
५. तत्रैव २/४५
६. तत्रैव ५/७५
७. तत्रैव ५/ ७६
८. तत्रैव ५/ ७७
९. तत्रैव ३/२४
१०.तत्रैव ३/२६
११. तत्रैव ४/४१
१२. तत्रैव ४/ ५१
१३. तत्रैव १/५२
१४. रसगङ्गाधरः - १
१५. शृङ्गारतरङ्गिणी ४/२२
१६. कुमारसम्भवम् १/५९
१७.शृङ्गारतरङ्गिणी१/४६
१८. तत्रैव १/४७
१९. तत्रैव ३/११
२०. तत्रैव ४/२५

## सन्दर्भसूची


१. अहोबलपण्डितीयम् - कविशिरोभूषणम्, आन्ध्ररचयितलसंघमु, आचार्यः श्री खण्डवल्लिलक्ष्मीरञ्जनम्, व्याख्यातारः - चलमचर्लरङ्गाचार्यः श्री अमरेश्वरं रामेश्वरशर्मा, अनुवादकः - श्रीशोण्टि बद्राद्रिरामशास्त्रि विद्यानगरमु, हैदराबाद, १९६५

२. ध्वन्यालोकः - आनन्दवर्धनः, चौखम्बा संस्कृतभवन, वाराणसी,१९६५

३. रसगङ्गाधरः - पण्डितराजजगन्नाथः, चौखम्बा विद्याभवन, वाराणसी, विक्रमसंवत्, २०१२

४. कुमारसम्भवम् - महाकविकालिदासः, चौखम्बा विद्याभवन, वाराणसी, २००४


□□□

# संस्कृताङ्ग्लसाहित्यधाराद्वये लघुपद्यकाव्यविचारः

*लीनाचन्द्रा*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

काव्यशब्देन सर्वापि कविकृता सारस्वतप्रक्रिया यद्यपि स्वीक्रियते तथापि काव्यशब्देन व्यपदिश्यमानासु रचनासु महान् भेदः अथवा महत् वैविध्यं दृश्यते। रचनासरणीमनुसृत्योपयुज्यमानगद्यपद्यादिभाषावैखरीमनुसृत्य,कृतस्य काव्यस्यामोद-प्रकारमनुसृत्य च काव्ये बहुविधप्रकाराणां निरूपणं कृतम्।

सामान्यतः अलङ्कारशास्त्रे अङ्गीकृतानां संस्कृतकाव्यभेदानां प्रकाराः एवं दृश्यन्ते। यथा - काव्यं द्विविधम् - श्रव्यम्, दृश्यम् च । श्रव्यं पुनस्त्रिविधम् । पद्य, गद्य, चम्पूभेदेन। तत्रापि पद्यं महाकाव्य, लघुकाव्यभेदेन द्विविधम् । तत्र लघुकाव्यं मुक्तक, युग्मक, सान्दानितक,कलापक, कुलक,महाकाव्य,खण्डकाव्य, कोषादिभेदेन बहुविधम्। अधुनात्र लघुकाव्यस्य विषयानुशीलनं क्रियते ।

**लघुकाव्यम्**

साहित्यदर्पणकारः विश्वनाथः पद्यकाव्यस्य भेदान् प्रतिपादितवान् यथा -

**छन्दोबद्धपदं पद्यं तेन मुक्तेन मुक्तकम् ।**
**द्वाभ्यां तु युग्मकं सांदानितक त्रिभिरिष्यते ।।**
**कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ।**[१]

**महाकाव्यम्**

तत्र महाकाव्यं नाम सर्गबद्धं, पञ्चसन्धि, एकाङ्गिरसयुक्तं बह्वङ्गरसयुतञ्च भवति। महाकाव्ये एको खण्डः खण्डकाव्यमित्युच्यते।

**खण्डकाव्यम्भवेत्काव्यस्यैकदेशानुसारि च ।** - विश्वनाथः
उदा - मेघदूतादिः।

**कोषः**

**कोषश्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः।**
**व्रज्याक्रमेण रचितः स एवातिमनोरमः।।**[२]

उदा - मुक्तावल्यादिः।

अत्र कोषविभागान्तर्गतान्येव मुक्तक - द्विक - सन्दानितक - गीतकाव्यादीनि।

**मुक्तकम्**

"पूर्वापरनिरपेक्षणापि हि येन रसचर्वणा क्रियते तदेव मुक्तकम्"[३] । महाकाव्यलक्षणात् भिन्नं मुक्तकम्। विषयस्तु खण्डकाव्यात् भिन्नः। खण्डकाव्ये आद्यन्तं विद्यमानं वस्तुसाहित्यम् अत्राप्युपलभ्यते। परन्तु मुक्तके न भवति कथासूत्रम्। पादचतुष्टयग्रथितमेकमेव पद्यं वाक्यार्थबोधे पर्याप्तं स्यात् तर्हि एतत्पद्यं मुक्तकमिति कथ्यते।

उदा - भर्तृहरिकृतानि नीतिशतकम्, शृङ्गारशतकम्, वैराग्यशतकम् च।

मुक्तकेऽस्मिन् प्रत्येकमपि श्लोकः रसोत्पत्तिजनको भवति । एषु कविभावः, कवेः हृदयानुभूतिः, पाठकभावेन, पाठकस्य हृदयानुभूत्यासह विलीय रसोत्पत्तिर्जायते। मुक्तके सरसमधुरशब्दरचना द्रष्टुं शक्यते। तस्मादस्यार्थज्ञानमतिसुलभम्, अतोऽस्य सर्वसम्मतिः। पूर्वोक्तद्वयोरर्थात् खण्डकाव्यमुक्तकयोर्लघुकाव्ये अन्तर्गतत्वम्।

लघुकाव्यं मानवस्य रागात्मकविरागात्मकप्रकृतेः प्रतिबिम्बं भवति। तस्मादस्मिन्काव्ये शृङ्गारभक्तिकरुणशान्तरसानामेव प्राधान्यं न तु रौद्रबीभत्सभयानकादीनां रसानाम्। मानवप्रेमसम्बद्धकोमलभावानां, वैराग्यपूर्णस्य सरलभावानाञ्च वर्णनमत्रान्तर्भवति। कोमलसरलभावान् कविः अतिसरलप्रधान शब्दप्रयोगद्वारा वर्णयति। लघुकाव्येषु कविः सर्वस्वतन्त्रः। अस्मिन् काव्ये कविः स्वीय स्वच्छचिन्तनाभिव्यञ्जनं करोति। इदञ्च लघुकाव्यं कलासृष्टिषु उत्कृष्टकाव्यत्वेनाङ्गीक्रियते। केचन लघुकाव्यं क्षुद्रकाव्यत्वेन व्यवहरन्ति। क्षुद्रं नाम नीचमित्यर्थो न, परमल्पलघ्वित्याद्यर्थकमेव। महाकाव्यापेक्षया लघुकाव्यं पाठकान् रञ्जयति। तस्मादिदं न नीचमित्यर्थः।

कोमलमधुरपदावलिः, उत्कृष्टभावानुगुणा भाषा, पदलालित्यम्, स्वाभाविकी अलङ्काररचना, विविधानां रसानां सहजसुन्दराभिव्यक्तिः, अल्पे एव विषये सम्पूर्ण-

रसाभिव्यक्तिः, औचित्यपोषणम्, पात्राणां सजीवचित्रणम् इत्यादीनि लक्षणानि महाकाव्यापेक्षया लघुकाव्यानाम् उत्कर्षं निरूपयन्ति ।

**युग्मकम्**

यदि पद्यद्वयं एकत्रैव मिलित्वा एकमेव पूर्णमर्थं प्रकाशयति तर्हि यत् पद्यद्वयं युग्मकमिति कथ्यते ।

उदा - **किं करोषि करोपान्ते कान्ते गण्डस्थलीमिमां**
**प्रणयप्रवणे कान्तेऽनैकान्ते नोचिता क्रुद्धः ।**
**इतितावत् कुरुङ्गाक्षी वक्तुमीहामहे वयम्**
**तावदा वीरभूच्यूते मधुरोमधूपध्वनिः ।।**

**सान्दानितकम्**

"द्वाभ्यां क्रियासमाप्तौ सान्दानितकम् "[४]। यदि पद्यत्रयं खलु एकत्रैव अन्वितो सती एकमेव पूर्णमर्थं प्रकाशयति तर्हि यत् पद्यत्रयं सान्दानितकमित्युच्यते ।

उदा - **विरोधिवचसो मूकान् वागीशानपि कुर्वते ।**
**जडाप्यनुलोमार्थान् प्रवाचः कतिनां गिरः ।।**
**संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ।**
**सुविस्तरता वाचौ भाष्यभूता भवन्तु मे ।।**[५]

**कलापकम्**

"चतुर्भिः कलापकम्" यदि पद्यचतुष्टयं खलु एकत्रैव अन्वितो सती एकमेव पूर्णमर्थं प्रकाशयति तर्हि यत् पद्यचतुष्टयं कलापकमित्युच्यते ।

उदा - **या धर्मभाससतनयापि शीतलैः स्वसा यमस्यापि जनस्य जीवनैः ।**
**कृष्णाऽपि शद्धैरधिकं विधातृभिर्विहन्तुमर्हसि जलैः पटीयसि ।।**
**यस्यामहानीलतटीरिव द्रुताः प्रयान्ति पीत्वा हिमपिण्डपाण्डवः ।**
**कालीनपस्ताभिरिवाऽनुरञ्जिताः क्षणेन भिन्नाञ्जनवर्णतां घनाः ।।**
**व्यक्तं बलीयान् यदि हेतुरागमादपूरयत् सा जलधिं न जाह्नवि ।**
**गङ्गौघनिर्भस्मितशम्भुकन्धरासवर्णमर्णः कथमन्यथाऽस्य तत् ।।**

अभ्युद्यतस्याक्रमितुं जवेन गां तमालनीला नितरां धृतायतिः ।
सीमेव सा तस्य पुरः क्षणं बभौ बलाम्बुराशेर्महतो महापगा ।।[६]

**कुलकम्**

"पञ्चप्रभृतिभिः कुलकम्"[७]। यदि पञ्चपद्यानि खलु एकत्रैव अन्वितो सती एकमेव पूर्णमर्थं प्रकाशयति तर्हि यत् पञ्चपद्यानि कुलकम् इति कथ्यते ।

उदा -

सकलमपि निकामं कामलोलान्यनारीरतरभसविमर्दे भिन्नवत्यङ्गरागम्।
इदमिति महादेवाश्चर्यमाश्चर्यधाम्नस्तव खलु मुखरागो यन्न भेदं प्रयातः।।
प्रकटतरमिमं माद्राक्षुरन्त्या रमण्यः
स्फुटमिति सविशंकं कान्तया तुल्यवर्णः।
चरणतलसरोजाक्रान्तिसंक्रान्तयाऽसौ
वपुषि नखविलेखो लाक्षया रंजितस्ते ।।
तदविदथमचादीर्यन्मम त्वं प्रियेति
प्रियजनपरिमुक्तं यद्दुकूलं दधानः।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन।।
नवनखपदमङ्गं गोपयस्यंशुकेन
स्थगयसि मुहुरोष्ठं पाणिना दन्तदष्टम् ।
प्रतिदिशमपरस्त्रीसंगशंसी विसर्पन्
नवपरिमलगन्धः केन शक्यो वरीतुम्।।
इति कृतवचनायाः कश्चिदभ्येत्य
बिभ्यद् गलितनयनवारेर्याति पादावनामम्।
करुणमपि समर्थं मानिनां मानभेदे
रुदितमुदितमस्त्रं योषितां विग्रहेषु ।।[८]

संस्कृतलघुकाव्यप्रक्रियासु इतोऽपि बह्व्यः प्रक्रियाः पण्डितैः प्रोक्ताः। परं विस्तरभयेन अत्र एताः एव प्रक्रियाः स्वीकृताः ।

आङ्ग्लसाहित्येऽपि एतत् सदृशानि नैकानि लघुकाव्यानि नैकैर्नामभिः विद्यन्ते। तानि लघुकाव्यानि यथा -

लिरिक् , ओड्, सोनट्, बलाड्, एलिजि, इडिल् इत्यादयः ।

***Lyric*** (भावकाव्यम् )

भावकाव्यं नाम कश्चन पद्यविभागो भवति । तद्गीतकाव्यमथवा सङ्कीर्त्तनमिति यत् प्रथितं तस्य प्रकार भेद एव । तत् तावत् कवेः चिन्तनानां चित्तविकाराणाञ्च आविष्कार एव । गीतकमिति पदं सङ्कीर्तनपदेन अद्यत्वे व्यवह्रीयते । गीतके तावत् व्यक्तिगत व्यापाराणामाविष्करणं न भवति । गीतककाराः स्वीयविकार- व्यापारान् चित्तावस्था भेदांश्च अध्येतृन् सुबोधयन्ति ।

उदा -

Dying

*The stillness round my from,*
*Was like the stillness in the air,*
*Between the Heavens of the Strom*

- Emily Dicknson

***Ode*** (सङ्कीर्तनम्)

कीर्तनानि दीर्घकाव्याानि भवन्ति । तानि तावत् प्रकृत्या आकृत्या समानशब्द-घटितानि च भवन्ति ।

उदा

Ode To A Nightingale

*My heart aches, and a drousy numbness pains ,*
*My Sense, as thought of hemlock I had drunk ,*
*Or emptied same bull opiate to the drains ,*
*one minute past, and lethe-  words had sunk .*

- John Keats

***Sonnet*** (गीतकम्)

गीतकस्य जन्मस्थलं तावत् निश्चितरूपेण निर्णेतुं न शक्यते । **सिसिलि, प्रेवन्स्** नामकाभ्यां द्वाभ्यां विदेशिकाभ्यां तत्र तावत् साध्यता द्वयं प्रकाश्यते । गीतकमदः त्रयोदशशताब्दार्धे आविर्भूतमिति कैश्चित् विचिन्त्यते । तत् तावत् विशिष्य **पेट्रर्क** इति नाम्ना प्रसिद्धकविसम्बद्धमिति निरूपितम् । अस्मात् प्राक् इट्टली देशीय **डान्टे** इति नाम्ना प्रसिद्धेन केनचित् कविनैव रचितानि तानि इत्यपि तौ निरूपितवन्तौ। तत् वस्तुतो लघुगीतमेकमासीत् । तत् गीतं संगीतयुतमेव उच्चार्यमाणमासीत् । आयासेन उच्चार्यमाणः कश्चन शब्दः इत्यर्थम् इट्टली देशीयं गीतकपदमभिव्यनक्ति ।

आङ्ग्लभाषायां आत्प्रसिद्धानि भावकाव्यानि गीतकानि । गीतकमेकं तावत् चतुर्षुभागेषु विभक्तुं शक्यते । चतुष्पादयुतं भागत्रिकं, द्विपादान्वितः भाग एक । आहत्य चतुर्दशपादात्मकं भवति आङ्ग्ले गीतकम् । इट्टलि देशीयं गीतकं तावत् त्रिषु भागेषु विभक्तमेव । तत्र भागद्विकं चतुष्पाद् भाग एक षट्पाच्च भवति ।

उदा *O Thou My Lovely Boy*

*Sonnet 126 -*

*O Thou my lovely boy, who in thy power*
*dust hold times.*

*- William ShakeSpeare*

***Elegy*** (विलापकाव्यम्)

विलापकाव्यं विलापविकाराभ्यां निर्भरं कस्यचित् पुरुषस्य मृतौ तदीयैरालाप्यमाणं गीतकमेकं भवति । अस्य उदाहरणत्वेन तोमस् ग्रे इति वैदिकपण्डितेन विरचितं Elegy Written in a country Churchyard प्रदर्शयितुं शक्यम् ।

उदा Elegy Written in a country Churchyard

*The curfew tolls the kneel of pating day,*
*The lowing herd winds slowly O'er the lea,*
*The ploughman home ward plods his weary way,*
*Did leaves the world to darkness and to me. - Thomas Gray*

***Idyll*** (लघुकाव्यम्)

इडिल् इति नाम्ना विदेशेषु प्रसिद्धमिदं काव्यं लघुत्वेन गुरुत्वेन च द्विविधम्। तत्र लघुकाव्यं कस्यचन शान्तियुजो ग्रामस्य सौन्दर्यं प्रतिपादयति । बृहत्काव्यं तावत् पौराणिक नायकानां कथामाविष्करोति । इडिल् इति पदं ग्रीक् देशीयं लघुचित्रमिति अर्थं सूचयत: "Eidyllion" इति पदात् निष्पादितं भवति ।

उदा Ulysses

*It little profits that an idle King, by this still hearth, among these barren crags,*
*Match'd with an aged by; I met and dole an equal law unto a savage race,*
*That boards, and feed, sleeps, and feed, and know to me.*

*- Alfred , Lord Tennyson*

***Ballad*** (वीरगाधा)

बल्लाड् नाम लघुगानं, वीरगाधा इत्यादि नाम्ना परामर्ष्टुं शक्यमानं भवति । इदं तावत् गीतं तत्राभाणकमेकं वा ऐतिहासिकां कथां वानुस्मरति । गीतमिदं कदाचित् प्रेमद्योतकत्वेनापि प्रथितम् । बल्लाड् सर्वदा कथारूपेण विद्यमानमेकं काव्यं भवति । फ्रान्सिस् जेम्स् चैल्ड् इति कश्चन वैदेशिक: एकोनविंशति शताब्दा- न्तिमे इङ्ग्लेण्ड्, स्कोट्लेण्ड् इत्यादि देशेभ्य: अमेरिका देशस्य विविधप्रान्तेभ्यश्च पञ्चाधिकत्रिशत लघुगानानि समाहरत् ।

उदा *The Mermaid*

*Oh the ocean waves may roll,*
*And the stormy wind may blow,*
*While we pour sailors go skipping aloft*
*and the lubbers lay down*
*below, below, below*
*and the land lubbers laydown below . - Unknown Author*

*Satire* (व्यङ्ग्यसाहित्यम्)

सट्टैर् नाम व्यङ्ग्यसाहित्यमित्यभिधेयां वैदेशिकी एका साहित्यसृष्टिर्भवति । तत्र विवेकशून्यपरिहासान् वा सामूहिकदुराचारान् वा परामृशति ।

उदा MacFleknoe

*And pondering , which of all hos sons was fit.*
*To reign , and wage immortal war with wit,*
*Cry'd 'Tis resolved for nature pleades that*
*He should only rule who most resembles me.*

*-- Dryden*

इत्येवं प्रकारेण संस्कृताङ्ग्लसाहित्यधाराद्वये लघुपद्यविचारः कृतः।

## सन्दर्भाः

१. साहित्यदर्पणः,६.३१४
२. साहित्यदर्पणः ,६.३१४
३. ध्वन्यालोकः, ३ उद्योतः
४. ध्वन्यालोकः ३. उ
५. शिशुपालवधः २.२४,२५
६. शिशुपालवधः १२.६७.७०
७. ध्वन्यालोक लोचनम्, २ उद्योतः
८. शिशुपालवधः ११.३१-३५

## उपयुक्तग्रन्थसूची

१. **ध्वन्यालोकः** - लेखकः - श्रीमदानन्दवर्धनाचार्यः, व्या- आचार्य जगन्नाथ पाठकः, चौखम्बा विद्याभवन्, वाराणसि ,२००९.

२. **साहित्यदर्पणः** - लेखकः - श्रीविश्वनाथः, व्या- डा.सत्यव्रत सिंहः, चौखम्बा विद्याभवन्, वाराणसि, २००७.

३. **A Background to the study of English Literature,** By-Brijadish Prasad, Revised by - Haripriya Ramadoss, Macmillan Publication, 2009.

□□□

# श्रीमद्भागवते अष्टमस्कन्धे लुप्तोपमायाः विवेचनम्

*डी. पद्मजा*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपक्रमः**

काव्यसामग्र्यामलङ्काराणां स्थानं विशिष्टं वर्तते। अलङ्काराः काव्यशोभाजनकाः भवन्ति। तैर्विना काव्यस्य सौन्दर्यमेव न भवति। अत एव भामहेनोक्तं - ''न कान्तमपि निर्भूषं विभाति वनिताननम्[१]'' इति। अलङ्काराः शब्दार्थभेदेन विभज्यन्ते। शब्दवैचित्र्यं यत्र वर्तते तत्र शब्दालङ्काराः, अनुप्रासयमकादयः। अर्थवैचित्र्यं यत्र वर्तते तत्रार्थालङ्काराः उपमारूपकादयः।

**उपमावैशिष्ट्यम् -**

अर्थालङ्कारेषूपमालङ्कारः मूर्धन्यभूतः इति सर्वेषां विदुषामभिमतम्। उपमा नाम सादृश्यमित्यर्थः। यत्र द्वयोः प्रसिद्धवस्तुनोः सादृश्यं वर्ण्यते तत्रोपमालङ्कारः। सर्वैरप्यालङ्कारिकैः उपमालङ्कारः लक्षितः। अप्पय्यदीक्षिताः चित्रमीमांसायां उपमावैशिष्ट्यमेवं प्रकटीचक्रुः।

**उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।**[२]
**रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।** इति।

**उपमाङ्गानि -**

उपमालङ्कारे उपमानोपमेयसमानधर्मोपमावाचक नामभिः चत्वारि अङ्गानि विद्यन्ते। यद्वस्तूपमीयते तदुपमेयम्। येन वस्तुना उपमीयते तद्वस्तु उपमानम्। उपमानोपमेययोर्मध्ये विद्यमानः धर्मः समानधर्मः इत्युच्यते। इव यथादि शब्दाः उपमावाचकाः भवन्ति। चन्द्र इव मुखं सुन्दरमित्यत्र मुखमुपमेयम्, चन्द्रः उपमानम्, सौन्दर्यं समानधर्मः इवेत्युपमावाचकः एवं चत्वार्यप्युपमाङ्गानि यत्र वर्तन्ते तत्र पूर्णोपमा भवति।

**लुप्तोपमा -**

लुप्तोपमायामुपमानस्य वा उपमेयस्य वा, उत धर्मस्य,वाचकस्यवा लोपः भवति। कदाचिद्द्वयोः, त्रयाणां वा लोपः भवति। उपमाङ्गानां लोपे कः चमत्कारः इति चेदुच्यते समर्थः कविः किमपि अलौकिकं भावमपरिपूर्णेऽपि वाक्ये प्रकटयितुं समर्थो भवति। सहृदयाः पाठकाः शब्दानां लोपेऽपि अर्थसामर्थ्यात् कवेः रचनामास्वादयन्ति। तथैव लुप्तोपमायामपि एकस्य द्वयोर्वा उपमाङ्गद्योतकशब्दानमप्रयोगात्सः अलङ्कारः चमत्कारहीनः न भवति। अधुनापि सहृदयैः सचालङ्कारः आद्रियत एव।

**भोजः -**

आलङ्कारिकेषु लुप्तोपमायाः भावनां प्रप्रथमतया सरस्वतीकण्ठाभरणकर्ता भोजः कल्पितवान्। सः उपमालङ्कारवर्गीकरणावसरे वाक्यार्थोपमायां पूर्णो लुप्ता चेति भेदद्वयं भवतीति निरूपयामास। तत्र लुप्तोपमायाः लक्षणमेवं वक्ति -

**लोपे सामान्यधर्मस्य द्योतकस्य च योपमा।**[३]
**प्रतीयमानसादृश्ये द्वयोर्लुप्तेति तां विदुः।।**

अर्थादुपमावाचक सामान्यधर्मयोर्लोपे सत्यपि सादृश्यप्रतीतिर्यत्र जायते तत्रोपमा स्फूर्तिः भवति। इयमेवलुप्तोपमेति कथ्यते।

उदाहरणम् -

**न पद्मं मुखमेवेदं न भृङ्गौ चक्षुषी इमे।**[४]
**न केसराणि शान्तायाः इमास्ता दन्तपङ्क्तयः।।**

इदं न पद्मं किन्तु कान्तायाः मुखमेव। इमे न भ्रमरौ किन्तु नयने। इमानि न केसराणि किन्तु दन्तपङ्क्तयः। अत्र पद्मभृङ्गकेसराणि उपमानानि। मुखनयनदन्ताः उपमेयाः। इवादि सादृश्यवाचक, कान्त्यादि साधर्म्यबोधक शब्दानामभावेऽपि उपमानोपमेययोः सादृश्यप्रतीतिः तद्द्वारा चमत्कृतिश्च जायते एव अतः अत्र लुप्तोपमालङ्कारः। अनेन अपरोऽपि लुप्तपूर्णेति लुप्तोपमाप्रकारः कथितः।

**लक्षणम् -** **लोपे सामान्य धर्मस्य लुप्तपूर्णेति गद्यते।**[५]
**सामान्यधर्मस्य लोपः यत्र भवति तत्र लुप्तपूर्णा** इति।

**उदा -** **राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव।[६]**
**रम्भास्तम्भाविवोरू च करिकुम्भाविव स्तनौ।।**

अत्र राजीवनीलोत्पलरम्भाकरिकुम्भादीनामुपमानानां, वक्त्रनेत्रोरुस्तनादीनामुपमेयादीनां, उपमावाचकस्येवादीनां च सत्वेऽपि सौन्दर्यत्व दैर्घ्यत्वादि समानधर्माः लुप्ताः। किन्त्वत्र प्रतीयमानसादृश्यत्वेनोपमानोपमेयभावः परिपूर्णः भवति, समानधर्माभावेऽपि चमत्कारप्रतीतिः भवतीति च हेतोः इयं लुप्तपूर्णा भेदः भवति।

**मम्मटः -**

एवं भोजस्यानान्तरवर्तिषु आलङ्कारिकेषु सुप्रसिद्धः भवति काव्यप्रकाशप्रणेता मम्मटः। अनेनापि लुप्तोपमायाः नैके प्रकाराः निरूपिताः। साधारणधर्मस्य लोपे सम्भवतां भेदानां प्रतिपादनं प्रथमतया अकरोत्।

**लक्षणम् -**

"तद्वद्धर्मस्य लोपे स्यान्नश्रौती तद्धिते पुनः"[७]। लुप्तोपमायां पूर्णोपमायामिव प्रकारद्वयं सम्भवति। श्रौती, आर्थी इति द्विधा। पुनः एकैकं तद्धितगा समासगा वाक्यगा इति त्रिधा विभक्तम्। किन्तु लुप्तोपमायां तद्धितगाश्रौती लुप्तोपमाप्रकारः न सम्भवतीति हेतोः पञ्चप्रकाराः।

१. वाक्यगतधर्मलुप्ता श्रौती   २. वाक्यगतधर्मलुप्ता आर्थी
३. समासगत धर्मलुप्ता आर्थी   ४. समासगत धर्मलुप्ता श्रौती
५. तद्धितगत धर्मलुप्ता आर्थी

श्रौती आर्थी भेदः कथं ज्ञायते इति चेत् विश्वनाथेन श्रौती आर्थी लक्षणं सम्यक्प्रतिपादितम्।

**श्रौतीलक्षणम् -**

"श्रौती यथेव वा शब्दा इवार्थे वा वतिर्यदि"[८]। यत्र यथा, इव, वा, इत्यादि औपम्यवाचकपदानि, एवमेव इवार्थे प्रयुक्तः वतिप्रत्ययश्च प्रयुज्यन्ते तत्र श्रौती। एतेषां पदानां श्रवणमात्रेणैव सादृश्यप्रतीतिर्जायतेति हेतोः श्रौती।

**आर्थी लक्षणम् - आर्थी तुल्यसमानाद्यस्तुल्यार्थो यत्र वा वतिः।[९]**

यत्र इवार्थे तुल्य - सदृश - सन्निभ - सङ्काश नीकाश - सहचर- सोदर-प्रभृतीनां प्रयोग: भवति तत्र आर्थी। इति।

मम्मटेनेतरेपि लुप्तोपमाभेदा: निरूपिता:। ते च -

१. उपमानानुपादाने वाक्यगाथसमासगा

२. वादेर्लोपे समासे कर्माधारक्यचिक्यङि

३. बहुपदसमासगतवादिलुप्ता

४. एतद्विलोपे क्विप्समासगा

५. त्रिलोपे क्विप्समासगा

आचार्य विश्वनाथ: अपि लुप्तोपमाया: अष्टादश भेदान् सोदाहरणै: न्यरूपयत्। मम्मटोक्तरीत्या अयमपि प्रथमतया श्रौती आर्थीगतभेदेन पञ्चप्रकारान् अवोचत्। धर्मलुप्तोपमायामपि पञ्चप्रकारा: प्रतिपादिता:।

**आधारकर्मविहिते द्विविधे च क्यचि क्यङि।**[१०]

**कर्मकर्त्रोर्णमुलि च स्यादेवं पञ्चधा पुन:।।**

अनया कारिकया धर्मलुप्तोपमायां पञ्चभेदा: एवं सम्भवन्ति।

१. आधार क्यच् निबन्धना लुप्तोपमा

२. कर्मक्यच् निबन्धना लुप्तोपमा

३. कर्मोपपद णमुल् निबन्धना लुप्तोपमा

४. कर्तृपपदणमुल् निबन्धना लुप्तोपमा

५. कर्तृ क्यच् निबन्धना लुप्तोपमा।

उपमानानुपादाने भेदद्वयं वर्तते। तदेवोक्तं विश्वनाथेन- **"उपमानानुपादाने द्विधा वाक्यसमासयो:"**[११] इति।

**१. समासगा उपमानलुप्तोपमा -** अस्योदाहरणं भवति। "न वा नयन तुल्यं" इति अत्र नयनमुपमेयम्। नयनं केन सदृशम् इति प्रश्ने तत्रोपमानशब्द कोऽपि न प्रयुक्त:। यद्यपि पद्मरूपोपमानम् व्यज्यते। तथापि शब्दत: अनुपात्तत्वात्, औपम्यवाचकपदस्थाने समासगत तुल्यशब्दस्य प्रस्तुतिकरणाच्चात्र समासगा लुप्तोपमा।

**२. वाक्यगा उपमानलुप्तोपमा**: - तस्यामुखेन सदृशं रम्यं नस्ते इत्यस्योदाहरणं भवति।

एवमुपमानलोपे भेदद्वयं प्रतिपाद्य वाचकलुप्तोपमां निरूपयति।

**"औपम्य वाचिनो लोपे समासे क्विपि च द्विधा[१२]"**

१. समासगा वाचकलुप्तोपमा

२. क्विप् गा वाचकलुप्तोपमा

विश्वनाथस्येतरे लुप्तोपमा भेदा:

१. समासगा धर्मौपम्यवाचकलुप्तोपमा।

२. क्विप् गा धर्मौपम्यवाचकलुप्तोपमा।

३. धर्मोपमेय लुप्तोपमा।

४. धर्मोपमानवाचक लुप्तोपमा।

एवं प्रकारेण विश्वनाथ: अष्टादशलुप्तोपमा प्रकारान्यरूपयत्। विश्वनाथानन्तरवर्ती एकावली कर्ता विद्याधर: अपि लुप्तोपमां निरूपयाञ्चकार। तस्य मते लुप्तोपमाया: एते भेदा: सम्भवन्ति।

१. धर्मलुप्तोपमा २. उपमानलुप्ता ३. वाचकलुप्ता ४. कर्मक्यच् वाचकलुप्ता ५. कर्तृक्यङ् वाचकलुप्ता ६. कर्मणमुल् वाचकलुप्ता ६. उपमानधर्मलुप्ता ७. द्विलोप: ८. त्रिलोप: प्रतापरुद्रीयकर्ता विद्यानाथ: लुप्तोपमाभेदान् प्रपञ्चितवान्।

१. अनुक्तधर्मवाक्यगा श्रौती लुप्ता

२. अनुक्तधर्मसमासगा श्रौती लुप्ता

३. अनुक्तधर्मवाक्यगा आर्थीलुप्ता

४. अनुक्तधर्मसमासासगा आर्थीलुप्ता

एवं प्रकारेण अनेनापि पञ्चदश लुप्तोपमाभेदा: प्रतिपादिता:।

कुवलयानन्दकर्ता अप्पय्यदीक्षित: लुप्तोपमाया: अष्टप्रकारान् प्रत्यपादयत्। १. वाचकलुप्ता २. धर्मलुप्ता ३. धर्मवाचकलुप्ता ४. वाचकोपमेयलुप्ता ५. उपमानलुप्ता ६. वाचकोपमानलुप्ता ७. धर्मोपमानलुप्ता ८. धर्मोपमानवाचकलुप्ता।

पण्डितराज जगन्नाथेन एकादश लुप्तोपमभेदा: प्रकटीकृता:

एवं प्रकारेण प्रसिद्धैरालङ्कारिकै: सर्वैरपि लुप्तोपमालङ्कार: बहुभि: भेदै: लक्षणलक्ष्यपुरस्सरं निरूपित:।

आलङ्कारिकग्रन्था: लक्षणग्रन्था: इत्युच्यन्ते। तेषां लक्षणानि कुत्रान्तर्भवन्ति अथवा कुत्र अन्वितानि भवन्ति इति प्रश्ने कृते सति महाकाव्यादिषु, नाटकादिषु लक्ष्यग्रन्थेषु इति वक्तुं शक्यते। श्रीमद्भागवतेऽपि नैके काव्यांशा: विलसन्ति। तत्र अलङ्काराणां प्रयोगोऽपि सुन्दरतया कृतं वर्तते। श्रीमद्भागवतगताष्टमस्कन्धे - उपमालङ्कार प्रयोग: सुष्ठुरूपेण कृत:। तत्रापि लुप्तोपमाया: विविधभेदानामुदाहरणानि समुपलभ्यन्ते। उदाहरणार्थं अत्र कानिचन दीयन्ते।

**अथासीद्वारुणी देवी कन्या कमललोचना।**[१३]
**असुरा जगृहुस्तां वै हरेरनुमतेन ते।**

अस्मिन् श्लोके कमललोचना इत्यत्र लुप्तोपमालङ्कार: विद्यते। कमललोचना इत्यस्य कमलमिवलोचनम् यस्या: सा इति विग्रह: अत्र बहुव्रीहिसमास: भवति। कमलमुपमानम् लोचनमुपमेयम्, दैर्घ्यं समानधर्म: किन्तु तद्वाचक: शब्द: अत्रानुपात्त:। तथैव उपमावाचको इव शब्दोऽपि पदेनानोपात्त:। समासेऽन्तर्गत:। अत: अत्र विद्यानथोक्तदिशा अनुक्तधर्मवाचकसमासगा लुप्ता। विद्यानाथ: 'पुरुषसिह:' इति उदाहरणमददात्। विश्वनाथमतेष्वियं समासगा धर्मौपम्यवाचकलुप्तोपमा भवति। विश्वनाथ: अत्र मुखाब्जमस्या: इत्युदाहरणमदायि।

**दीर्घपीवरदोर्दण्ड: कम्बुग्रीवोरुणेक्षण:।**[१४]
**श्यामलस्तरुण: स्रग्वी सर्वाभरणभूषित:।।**

अस्मिन् श्लोके कम्बुग्रीव: इत्यत्र लुप्तोपमा विस्फुर्यते। कम्बु: इव ग्रीव: यस्य स: इति विग्रह:। बहुव्रीहि समास: विहित:, अत्र ग्रीव: उपमेय:, कम्बुरुपमानम्। दीर्घत्वं समानधर्म:। इवेत्युपमावाचक:। अत्र केवललुप्तोपमानोपमेययो: कम्बुग्रीवयोरेवोपादानात् साधर्म्य वाचकयो: अनुपादानात् समासान्तर्गतत्वाच्च विद्यानाथमतानुरोधेन अनुक्तधर्मवाचक समासगा लुप्ता।

**आस्थितस्तद्विमानाग्र्यं सर्वानीकाधिपैर्वृत:।**[१५]
**वालव्यजनछत्राग्र्यै: रेजे चन्द्र इवेदये।।**

श्लोकस्यायमर्थ: असुरो बलि: सेनापतिभि: परिवृत: सन् उत्तमछत्रचामरादिभि-र्वीज्यमान: विमानमारुह्य उदयगिरौ उदित: चन्द्र इव रराज। अत्र बलिरुपमेय:, चन्द्र: उपमानम्, प्रकाश: समानधर्म: इवेत्युपमावाचक:, अत्रोपमेयरूपबलिशब्द: पूर्वतन-श्लोकेभ्य: आक्षिप्त: नत्वत्र शब्देनोपात्त:। इतरेषामुपमानवाचकधर्माणां चन्द्रेवप्रकाशा-दीनामुपादानात् उपमेयरूपबलिशब्दस्यानुपादानाच्चात्र उपमेय लुप्ता।

**तत: सुपर्णासकृतांघ्रिपल्लव: पिशङ्गवासा नवकञ्जलोचन:।**
**अदृश्यताष्टायुध बाहुरुल्लसच्छ्रीकौस्तुभानर्घ्यकिरीटकुण्डल:।।**[१६]

अस्मिन् श्लोके अङ्घ्रिप्ल्लवमित्यत्र लुप्तोपमा। अङ्घ्रिपल्लवमिव इति विग्रह:। उपमितं व्याघ्रादिभि: सामान्याप्रयोगे (अष्टाध्यायी. ११.१.५६) इति समास विधायकं सूत्रम्। उपमानभूतपल्लवस्य, उपमेयस्य अङ्घ्रेश्च समानधर्मं कोमलत्वं भवति। तद्वाचक: शब्द: अत्रानुपात्त:। तथैवोपमावाचकोऽपि न प्रयुक्त:। स तु समासेऽन्तर्भूत:। एवं धर्मवाचकयोर्लोपादत्र विद्यानाथोक्तदिशानुक्तधर्मवाचकसमासगता लुप्ता।

**वाचकलुप्ता -**

**इत्थं विरिञ्चस्तुतकर्मवीर्य: प्रादुर्बभूवामृतभूरदित्याम्।**[१७]
**चतुर्भुज: शङ्खगदाब्जचक्र: पिशङ्गवाशा नलिनायतेक्षण:।।**

अस्मिन् श्लोके नलिनायतेक्षण: इत्यत्र लुप्तोपमा। नलिनायतेक्षण: इति समस्तपदस्य नलिनमिव आयातनम् ईक्षणं यस्य स: इति विग्रह:। अत्र नलिनमुपमानं, नयनमुपमेयं, आयतनं समानधर्म:। एवं उपमानोपमेयधमाणामुपात्तता नलिनायतेक्षण: इत्यत्र दृश्यते। उपमानवाचको इव शब्द: समासेऽन्तर्गत इति हेतो: अत्र पण्डितराज-जगन्नाथमतानुरोधेन समासगता वाचकलुप्ता।

जगन्नाथ: समासगता वाचकलुप्ताया: दलदरविन्दसुन्दरमित्युदाहरणमददात्। अत्रापि उपमानोपमेययो: सत्वेऽपि सादृश्य प्रतीत्यां सत्यामपि तत्बोधक उपमावाचक-लोपात् वाचकलुप्तोपमा।

**तस्येत्थं भाषमाणस्य प्रह्लादो भगवत्प्रियः।**[१८]
**आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः।**

प्रह्लादः उदितः पूर्णचन्द्र इव तत्राजगाम इति श्लोकार्थः। अत्र प्रह्लादः उपमेयः, पूर्णचन्द्रः उपमानम् इवेत्युपमावाचकः। अत्राह्लादकत्वमथवा प्रकाशत्वरूप साधर्म्यं अनुपात्तमिति हेतोः अप्पय्यदीक्षितमतानुरोधेन धर्मलुप्ता। अप्पय्यदीक्षितेन इन्दुतुल्या स्या इत्युदाहरणम् दत्तम्। अत्र चन्द्रः उपमानम्, तुल्येति वाचकः मुखमुपमेयम्। आह्लादकत्व, मनोहरत्वादि समानधर्मः अनुपात्तः अतः धर्मलुप्ता।

**उपसंहारः -**

एवं रूपेण भागवते अष्टमस्कन्धे लुप्तोपमालङ्कारस्य लक्ष्यभूतश्लोकाः अतिरमणीयतयोपनिबद्धाः।

## सन्दर्भाः

१. काव्यालङ्कारः - प्रथमपरिच्छेदः - १३ कारिका
२. चित्रमीमांसा - १ कारिका
३. सरस्वतीकण्ठाभरणम् - चतुर्थपरिच्छेदः - १६ कारिका
४. सरस्वतीकण्ठाभरणम् - चतुर्थपरिच्छेदः - १० उदाहरणश्लोकः
५. सरस्वतीकण्ठाभरणम् - चतुर्थपरिच्छेदः - १७ कारिका
६. सरस्वतीकण्ठाभरणम् - चतुर्थपरिच्छेदः - उदाहरणश्लोकः
७. काव्यप्रकाशः - दशमोल्लासः - ५५ कारिका
८. साहित्यदर्पणः - दशमपरिच्छेदः - १६ कारिका
९. साहित्यदर्पणः - दशमपरिच्छेदः - १६ कारिका
१०. साहित्यदर्पणः - दशमपरिच्छेदः - १९ कारिका
११. साहित्यदर्पणः - दशमपरिच्छेदः - २० कारिका
१२. साहित्यदर्पणः - दशमपरिच्छेदः - २० कारिका
१३. श्रीमद्भागवतम् - अष्टमस्कन्धः - अष्टमोऽध्यायः - २९ श्लोकः

१४. श्रीमद्भागवतम् - अष्टमस्कन्धः - अष्टमोऽध्यायः - ३१ श्लोकः
१५. श्रीमद्भागवतम् - अष्टमस्कन्धः - नवमोऽध्यायः - १५ श्लोकः
१६. श्रीमद्भागवतम् - अष्टमस्कन्धः - नवमोऽध्यायः - ५४ श्लोकः
१७. श्रीमद्भागवतम् - अष्टमस्कन्धः - अष्टादशोऽध्यायः - ९ श्लोकः
१८. श्रीमद्भागवतम् - अष्टमस्कन्धः - एकविंशोऽध्यायः - १२ श्लोकः

## सन्दर्भग्रन्थाः

१) **काव्यप्रकाशः -** मम्मटः, बालानन्दिनी व्याख्या, व्याख्याकारः आचार्य पुल्लेलश्रीरामाचन्द्रः, संस्कृतभाषाप्रचारसमिति, हैदराबाद् ५००००१
२) **काव्यालङ्कारः -** भामहः चौखाम्बासंस्कृतसीरीज् आफिस्, वाराणसी
३) **श्रीमद्भागवतम् -** महर्षिव्यासः, चन्द्रिका व्याखअया व्याख्याकारः, श्री वीरराघवः प्रकाशकाः त्रिदण्डि रामानुजजीय्यर स्वामिनः, मुद्रणम् विजयमुद्राशाला, चित्तूर्।
४) **सरस्वतीकण्ठाभरणम् -** भोजः, रत्नदर्पणव्याख्या, व्याख्याकारः रत्नेश्वरः, चौखाम्बा ओरियण्टलिया, वाराणसी, दिल्ली
५) **साहित्यदर्पणः -** विश्वनाथः, शशिकला व्याख्या, व्याख्याकारः डा. सत्यव्रतसिंह, चौखाम्बा विद्याभवन्, वाराणसी

□□□

# कुमारसम्भवे अङ्गरसपरिशीलनम्

*अनीष्. वि*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः**

**"श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः"।।**[१]

इति नवरसाः सुविदिता एव समेषाम्। एषु रसेषु पुनश्च अङ्गाङ्गिभेदेन द्वैविध्यं विद्यते। श्रृङ्गारवीरशान्तानां प्राधान्यात् अङ्गिरसत्वेन इतरेषां उपकारिभूतत्वात् अङ्गरसत्वेन च विवक्षा। महाकाव्यस्थाङ्गाङ्गिरसानां विषये विश्वनाथः एवं वदति।

**"श्रृङ्गारवीरशान्तानामेकोऽङ्गी रस इष्यते।**
**अङ्गानि सर्वेऽपि रसाः, सर्वे नाटकसन्धयः"।।**[२]

नाटकस्वरूपावतरणवेलायां तु

**"एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा।**
**अङ्गमन्ये रसाः सर्वे, कार्यो निर्वहणेऽद्भुतः"।।**[३]

अङ्गरसानां परिशीलनं कुमारसम्भवस्य प्रथमाष्टसर्गेषु क्रियते अस्मिन् शोधपत्रे। अङ्गरसाः अङ्गिरसानां उत्कृष्टताविष्करणाय उपकुर्वन्ति सहकुर्वन्ति च। अङ्गरसेषु करुणरौद्रभयानकाद्भुतरसानाम् आविष्कारः दृश्यते कुमारसम्भवे।

**करुणरसप्रसङ्गः**

प्रथमसर्गः पार्वतीशरीरशोभावर्णनेन श्रृङ्गारभूयिष्ठः वर्तते। दक्षकृतहरानादर-कारणात् सतीदेव्याः शरीरत्यागप्रसङ्गः शोकहेतुकत्वात् करुणरसस्य प्रतीतिं जनयति। करुणरसस्य उद्दीपनविभावः भवति शरीरत्यागप्रसङ्गः।

**''अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्वपत्नी।**
**सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे''।।४**

चतुर्थसर्गे तु करुणरसः प्रकृष्टरूपेण दृश्यते। पतिवियुक्तायाः रतिदेव्याः विलापावसरे, वसन्तं प्रति रतिकदनप्रकटनावसरे, आकाशवाणीप्रसङ्गे च प्रत्यक्षरूपेण एव करुणरसः अनुभूयते। मन्मथचिताभस्मदर्शनानन्तरं विह्वला क्षितिलुण्ठनेन धूसरस्तनीभूत्वा सा परिदेवनं करोति।

**''अथ सा पुनरेव विह्वला वसुधालिङ्गनधूसरस्तनी।**
**विललाप विकीर्णमूर्धजा समदुःखामिव कुर्वती स्थलीम्''।।५**

पञ्चमश्लोकात् चतुर्विंशतिश्लोकपर्यन्तं रतिदेव्याः आत्मरोदनमुक्त्वा सप्तविंशतिश्लोकात् अष्टत्रिंशत् श्लोकपर्यन्तं स्वजनं वसन्तं दृष्ट्वा विवृतद्वारमिव दुःखप्रकटनं वर्णयति कालिदासः। रतिदेवी तां स्वस्य पत्युः निकटे प्रापयतु इति वसन्तं प्रार्थयते।

**''तदिदं क्रियतामनन्तरं भवता बन्धुजनप्रयोजनम्।**
**विधुरां ज्वलनातिसर्जनान्ननु! मां प्रापय पत्युरन्तिकम्''।।६**

मृतव्यक्तिसम्बद्धवस्तुदर्शनं (चिताभस्मस्य) उद्दीपनविभावः भवति। इष्टजनविप्रयोग इति आलम्बनविभावः। परिदेवनादि अनुभावाः सम्यक् प्रकटीकृताः। विषाददैन्यादीनां व्यभिचारिभावानां च योगात् शोकत्वम् उत्पद्यते रतिविलापे। कामदेवप्रेरितस्य प्रजापतेः स्वसुतायां जाताभिलाषवशात् स्मरस्य शापप्राप्तिः, तेन देहवियोगः सञ्जात इति आकाशवाणी रतीदेवीं बोधयति।

**''अभिलाषमुदीरितेन्द्रियः स्वसुतायामकरोत्प्रजापतिः।**
**अथ तेन निगृह्य विक्रायामभिशप्तः फलमेतदन्वभूत्'' ।।७**

शापवृत्तान्तमपि करुणरसं सम्पुष्टीकरोति चतुर्थसर्गे।

**रौद्ररसप्रसङ्गः**

द्वितीयसर्गे ब्रह्मदेवाय देवतापक्षतः परिवेदनं ज्ञापयितुः बृहस्तपेः वाचि तारकासुरस्य रौद्रता प्रकटीभवति। लोकानाम् उपद्रवाय उत्पन्नस्य तारकासुरस्य

पुरप्रवेशनं मन्दोष्ण: सन्नेव करोति रवि: भीतिवशात्। एवमेव चन्द्र: सर्वाभि: कलाभि: सेवां करोति, वायु: पुष्पमपि न पतेत् इति विचिन्त्य उद्यानं न प्रविशति, ऋतव: क्रमसेवां त्यक्त्वा पुष्पाणां संग्रहणे एव प्रयतमाना: सन्त: उद्यानपालका इव तारकासुरं सेवन्ते, समुद्र: तस्य प्राभृतयोग्यानि रत्नानि कदा परिपाकतां प्राप्नोतीति प्रतीक्षते, वासुकीप्रमुखा: इतरे सर्पाश्च फणस्थितरत्नज्वलनेन रात्रिं सर्वदा प्रकाशीकृत्य तारकासुरं पर्युपासते। इन्द्रोऽपि तम् आराधयति। तारकासुरकृतनन्दनवृक्षस्य छेदनं, सुरप्रग्रह-स्त्रीणामुपद्रव:, सुमेरुपर्वतश्रृङ्गाणाम् आक्रीडपर्वतकल्पनम्, मन्दाकिनीस्थसुवर्णकमलानां स्वदीर्घिकाप्रतिरोपणम्, विमानमार्गावरोधवशात् देवानां भुवनानवलोकनम्, यज्ञेषु हविष: मायाद्वाराग्रहणं, उच्चैश्रवस: अपहरणम्, देवैप्रयुक्तोपायानां फलसिद्धतादिविषयान् परिशीलयतिश्चेत् अमर्षादिव्यभिचारिभावानां ताडनपीडनप्रहरणादि उद्दीपनविभावानाम् इन्द्रादिदेवानां शत्रूणाम् आलम्बनविभावानाञ्च सत्वात् क्रोधस्थायीभावसहितरौद्ररसस्य आविष्कार: कृत: इति अवगम्यते। तृतीयसर्गे भगवन्तं पार्वत्युन्मुखं कर्तुं प्रयतमानस्य कामस्य दहनावसरे शङ्करगतक्रोधस्य आविष्कार: कृत:। क्रुद्धस्य भगवत: तृतीयनेत्रात् ज्वालायुक्ताग्नि: कामस्योपरि निष्पपात।

> **''तप: परामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य।**
> **स्फुरन्नुदर्चि: सहसा तृतीया दक्ष्ण: कृशानु: किल निष्पपात''।।**[८]

इत्यत्र कामकृतबाणप्रयोगोद्दीपनविभावोद्धतमदनालम्बनविभाव दुर्दशमुखाद्य-नुभावामर्षादिव्यभिचारिभावसम्पन्नरौद्ररसप्रतीति: सम्पत्स्यते। पञ्चमसर्गे पार्वतीतप:-स्थलमागत: ब्रह्मचारी पार्वत्या क्रियमाणतपस: व्यर्थतां वदन् शिवनिन्दां करोति। तच्छ्रुत्वा पार्वत्या: कोपप्रकटनं वर्णयन् कवि: तस्या: भावान् कथयति।

> **''इति द्विजातौ प्रतिकूलवादिनि प्रवेपमानाधरलक्ष्यकोपया।**
> **विकुञ्चित भ्रूलतमाहिते तथा विलोचने तिर्यगुपान्तलोहिते''।।**[९]

तत्र ब्रह्मचारिकृतशङ्कराधिक्षेप: उद्दीपनविभाव:, पार्वत्या: क्रोधसहितरक्तनयने, कुटिलिते भ्रूलते च अनुभावौ, अमर्षादिव्यभिचारिभावा:, अनन्तरोक्तकोपवचनानि च रौद्ररसं सूचयति।

**भयानकरसप्रसङ्गः**

द्वितीयसर्गे तारकासुरपीडिताः देवाः भयचकिताः सन्तः ब्रह्मदेवसमीपमागत्य तं देवं स्तुवन्ति। स्तुत्यनन्तरं ब्रह्मदेवः इन्द्रादिदेवतानां मुखवैवर्ण्यं दृष्ट्वा कारणं पृच्छति। भयानकरसस्य अनुभावाः भवन्ति मुखवैवर्ण्यादयः। स्वरभेदाः व्यभिचारिभावाश्च। द्वितीयसर्गे एकोनविंशश्लोकात् सप्तविंशश्लोकपर्यन्तं क्रमशः इन्द्रवरुणकुबेर-यमराजानाम् एवमेव आदित्यवायुरुद्रगणादीनाञ्च बाधाविषये ब्रह्मदेवः पृच्छति। एतेषु श्लोकेषु देवानां भयस्य, मुखवैवर्ण्यादीनां, दैन्यजडादीनाञ्च सम्यग्चित्रणं विदधाति महाकविकालिदासः। भयन्तु भयानकरसस्य स्थायीभावः, मुखवैवर्ण्यादयः अनुभावाः, दैन्यजडादयः व्यभिचारिभावाश्च। तृतीयसर्गे मनसाप्यधृष्यं अयुग्मनेत्रं निकटे दृष्ट्वा भयभीतस्सन् कामदेवः स्वहस्तात् पतितधनुरपि न दृष्टवान्। अत्र भीतिजनकनयनादि आलम्बनविभावेभ्यः वेपथुस्तम्भादिव्यभिचारिभावेभ्यः भयस्थायीयुक्तभयानकरस-प्रतीतिः दृश्यते।

**''स्मरस्तथाभूतमयुग्मनेत्रं पश्यन्नदूरान्मनसाप्यधृष्यम्।**
**नालक्षयत्साध्वससन्नहस्तः स्रस्तं शरं चापमपि स्वहस्तात्''।।**[१०]

**अद्भुतरसप्रसङ्गः**

प्रथमसर्गस्य आरम्भः देवतास्वरूपस्य हिमालयस्य वर्णनेन भवति। सौन्दर्यसम्पन्नः दिव्यौषधिसम्पत्तियुक्तः हिमालयः। प्रजापतिः यज्ञसाधनानां सोमलतादीनां कारणत्वेन पर्वतानां स्वामित्वं हिमलयायैव अयच्छत्। अलौकिकवस्तुनां आधारत्वेन हिमालयवर्णने विस्मयोत्पत्तिः भवति, तेन अद्भुतरसप्रतीतिरायाति। तृतीयसर्गे चत्वारिंशत् श्लोकात् एकपञ्चाशत् श्लोकपर्यन्तं कामदेवेन दृष्टस्य शिवभगवतः वर्णनं भवति। शरीरस्थप्राणादीनां निरोधात् अविद्यमानवर्षसम्भ्रमं मेघमिव, तरङ्गरहितजलाशयमिव, वायुरहितस्थानस्थदीपमिव कामदेवः भगवन्तं ददर्श।

**''अवृष्टिसंरम्भमिवाम्बुवाहमपामिवाधारमनुत्तरङ्गम्।**
**अन्तश्चरणां मरुतां निरोधान्निवातनिष्कम्पमिव प्रदीपम्''।।**[११]

दिव्यदर्शनालम्बनभावस्तम्भादिव्यभिचारिभावविस्मयस्थायीभावादि-युक्ताद्भुतप्रतीतिः सिद्ध्यति। एवमेव पञ्चमे सर्गे ब्रह्मचारीवेषप्रच्छन्नः शिवः यदा स्वस्वरूपं पार्वत्ये अदर्शयत् तदा तस्याः भावप्रकटनम् अद्भुतरसतामेति।

**"तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।**
**मार्गाचलव्यतिकराकुलिते सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ"।।**[१२]

षष्ठसर्गे सप्तर्षीणां हिमालयावतरणे तेषां तेजस्वितावर्णनावसरेऽपि अद्भुतरसत्वम् अनुभूयते। मुनीनाम् अलौकिकतेजसित्वम् अत्र विस्मयतां जनयति।

**"गगनादवतीर्णा सा यथावृद्धपुरःसरा।**
**तोयान्तर्भास्करालीव रेजे मुनिपरम्परा"।।**[१३]

**उपसंहारः**

कुमारसम्भवस्थ प्रधानरसः शृङ्गाररसस्सन्नपि अङ्गरसान् सम्यक् प्रयुङ्क्ते महाकविः। करुणरौद्रभयानकाद्भुतरसानां कविकृतोत्कृष्टाविष्करणं अन्यतममेव। एवम् अष्टसु सर्गेषु विद्यमानाः प्रमुखाः अङ्गरसांशाः अस्मिन् शोधपत्रे विचारिताः।

## सन्दर्भाः


१. काव्यालङ्कारसङ्ग्रहः ४-५
२. साहित्यदर्पणः, ६-३१७
३. तत्रैव, ६-२०
४. कुमारसम्भवम्, १-२२
५. तत्रैव ४-४
६. तत्रैव ४-३२
७. तत्रैव ४-४१
८. तत्रैव ३-७१
९. तत्रैव ५-७४
१०. तत्रैव ३-५१
११. तत्रैव ३-४८
१२. तत्रैव ५-८५
१३. तत्रैव ६-४९


## सन्दर्भग्रन्थाः


१. **काव्यालङ्कारसारसङ्ग्रहः** - उद्भटभट्टः, विद्यानिधिप्रकाशनं, देहली, २००२
२. **कुमारसम्भवम्** - कालिदासः,चौखाम्बा संस्कृतसंस्थानं, वाराणसी, २०००
३. **साहित्यदर्पणम्** - विश्वनाथः, चौखाम्बा कृष्णदास अकादमी, वाराणसी,१९९८


□□□

# उपमालङ्कारस्वरूपम्

*डी.वि. सुब्रह्मण्यशास्त्री*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः -**

**अलङ्कारशिरोरत्नं सर्वस्वं काव्यसम्पदाम्।**
**उपमा कविवंशस्य मातैवेति मतिर्मम।।**[१]

अलङ्कारेषु श्रेष्ठा, काव्यसौन्दर्याय सारभूता, विविधालङ्काराणां जननी कविकुल-मातुरूपमायाः सर्वातिशायी महत्त्वं मन्वते विवेचकाः। अत्रोपमाया उपमेयोपमाद्य-नेकालङ्कृतिघटकत्वेनैकविज्ञानेन सर्वविज्ञानमिवोपमाविज्ञानेनालङ्कृतिज्ञानं भवति। अतः सर्वप्रथमोपमैव निरूपणीयास्ति।

**१. उपमायाः प्राचीनत्वम् -**

उपमात्यन्तं प्राचीनतमोऽलङ्कारो भवति। ऋग्वेदे, पाणिनीयव्याकरणे च उपमायाः प्रयोगः उल्लेखश्च दृश्यते। तथाहि -

**तष्टेव वृक्षं वनिनो निवृश्चसि**[२]
**यौरिव स्मयमानो न भोभिः**[३]
**अभ्रातेव पुंस एति प्रतीची गर्ता रुगिव सनये धनानाम्**[४]

यास्कस्य निरुक्तेऽपि उपमायाः लक्षणं बहुविधभेदाश्च दृश्यन्ते। यथा

**अथात उपमा। यदतत् तत् सादृश्यमिति गार्ग्यः ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वाऽप्रख्यातं वोपमिमीते। अथापि कनीयसा ज्यायांसम्। यथेनि कर्मोपमा, भूतोपमा, रूपोपमा वदिति सिद्धोपमा। अथ लुप्तेपमान्यार्थोपमानानीत्याचक्षते।**

पाणिनीयव्याकरणे उपमानम्, उपमितम्, सामान्यवचनम् इत्यादीनां प्रयोग एवं श्रौती, आर्थी इति भेदस्योक्तिश्च दृश्यते। तद्यथा -

उपमानम् - **उपमानानि सामान्यवचनैः**[५]

**उपमानाच्च**[६]

**उपमानादाचारे**[७]

**उपमानादप्राणिषु**[८]

उपमितम् - **उपमितं व्याघ्रादिभिः सामान्यप्रयोगे**[९]

सामान्यवचनम् - **उपमानानि सामान्यवचनैः**[१०]

**उपमितं व्याघ्रादिभिः सामान्यप्रयोगे**[११]

श्रौती - **तत्र तस्येव**[१२]

आर्थी - **तेन तुल्यं क्रिया चेत् वतिः**[१३]

एवं प्राचीनकालादेव उपमा बहुषु ग्रन्थेषु विद्यमाना आसीत्।

**१.२ उपमायाः प्राधान्यम् -**

उप समीपे मानं प्रक्षेपणं निमित्तान्तरैरिति अभिनवगुप्तः। नाट्यशास्त्रकारादारभ्य अद्य यावत् सर्वैरप्यालङ्कारिकैः उपमा अङ्गीकृता दृश्यते। तेषु बहुभिः उपमायाः बह्वलङ्कारनिष्ठत्वमित्यङ्गीकृतम्। वामनेन प्रतिवस्तुप्रभृतिरुपमाप्रपञ्चः इत्युक्तम्। रुद्रटेन अलङ्काराणां मूलतत्वानि चत्वारि निर्दिष्टानि, तानि वास्तवाः, औपम्यम्, अतिशयः, श्लेषश्च भवन्ति। अनेके अलङ्काराः तेन औपम्यस्य भेदाः इति मन्यन्ते। रुय्यकेनापि उपमायाः अनेकालङ्काराणां मूलतत्वं मन्यते। तद्यथा - उपमैव च प्रकारवैचित्र्येणानेका- लङ्कारबीजभूतेति प्रथमं निर्दिष्टा इति। विद्यानाथोऽप्याह अत्र प्रथममनेकालंकारबीज- भूतत्वादुपमा निरूप्यते इति। अर्वाचीनालङ्कारिकेषु प्रमुखः अप्पय्यदीक्षितः उपमायाः अत्यधिकं प्राधान्यं कल्पयति। तद्यथा -

**उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।**
**रञ्जयति काव्यरंगे नृत्यन्ती तद्विदां चेतः।।**[१४]

तथा -

**तद्विदं चित्रं विश्वं ब्रह्मज्ञानादिवोपमाज्ञानात्।**
**ज्ञातं भवतीत्यादौ निरूप्यते लिखिलभेदेन सा।।**[१५] इति।

**१.३ उपमायाः लक्षणम् -**

**१. नाट्यशास्त्रलक्षणम् -**

**यत्किंञ्चत् काव्यबन्धेषु सादृश्येनोपमीयते।**
**उपमा नाम सा ज्ञेया गुणाकृतिसमाश्रया।।**[१६]

तत्रोपमां लक्षयति यत्किंञ्चदिति। काव्यबन्धेषु काव्यलक्षणेषु सत्स्वित्यनेन गौरिव गवय इति हि पर्यायाः। लक्षणं त्वलङ्कारशून्यमपि न निरर्थकम्। भूयांश्चात्रोदाहरणमार्गो दर्शितः। गुणशून्यं नु न काव्यं किंञ्चिदपीयति च महापुरुषो दृष्टान्तः अहेत्वप्रदर्शनार्थम्। एवं हि प्रसादादीनां गुणवाचोयुक्त्या व्यवहारः, तद्विना काव्यरूपत्वाभावात्। सुन्दरास्पदं तु शरीरमुपलक्षणञ्च। उपमाद्यन्तरेण तु भवत्येव काव्यमिति प्रकटीकर्तुमुपमादीनामलङ्कारत्वेन व्यवहारः, न तु लोक इव स्फुटात्र पृथक् सिद्धिरस्ति।

तथा हि दण्डिना काव्यशोभावहा धर्मा अलङ्काराः सर्वं उक्ता इति केचित्, यत्किंञ्चिदित्यननोपमीयत इति क्रियार्थः संबध्यते न कर्म। उप समीपे मानं प्रक्षेपणं निमित्तान्तरैरपि संभवतीत्यत आह सादृश्येनेति। उपमीयत इत्यनेनेति उपमानोपमेये उक्ते सादृश्येनेति साधारणो धर्मः, गुणः संबन्धः आक्रियते अननेति गुणाकृतिः इवादिः शब्दः आश्रीयमाणो यस्यामिति गुणाकृतिसमाश्रयाः।

**उपमायाः पञ्चभेदाः -**

**प्रशंसा चैव निन्दा च कल्पिता सदृशी तथा।**
**या किञ्चित्सदृशी ज्ञेया सोपमा पञ्चधा बुधैः।।**

इयञ्च उपमा नाट्यशास्त्रानुसारं पञ्चधा विभक्ता यथा प्रशंसा, निन्दा, कल्पिता, सदृाी, किंञ्चिदृशी इति। बुधैः उक्तम्।

**उदाहरणम् -** **संपूर्णचन्द्रवदना नीलोत्पलदलेक्षणा।**
**मत्तमातङ्गगमना संप्राप्तेयं सखी मम।।**

तदुदाहरति संपूर्णेति। सप्तम्युपमानपूर्वपदस्येति समासबलादुपमानता प्रतिपत्तिः। तत्र ह्युत्तरपदलोपः सन्नियोगशिष्टत्वात्। क्यङि सलोप इव मत्तमातङ्गमनमिव गमनमस्या इत्युत्तरपदलोपोऽपि।

**२. चन्द्रालोकलक्षणम् -**

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।**[१७]

यत्र द्वयोः सादृश्यलक्ष्मीः उल्लसति सा उपमा।

**उदाहरणम् -**

**हृदये खेलतोरुच्चैस्तन्वङ्गीस्तनयोरिव।।**

यथा तन्वङ्ग्या वचसि उन्नतयोः स्तनयोः मिथः सादृश्यं चमत्कारकारि भवति, तथैवोपमानोपमेययोरिति भावः। अत्र एकः स्तनः उपमानं परश्च स्तन उपमेयं, हृदये समृच्छ्वलनं द्वयोः साधारणधर्मः इवेत्युपमावाचकः शब्दः इति पूर्णोपमा इयम्।

**उपमायाः भेदाः -**

**उपमैका शैलूषी सम्प्राप्ता चित्रभूमिका भेदान्।**
**रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।**

प्रधानतया उपमा एका एव अलङ्कारः आधारभूतः सर्वेषां अलङ्काराणाम्। अत्र उपमानोपमेययोः सहृदयहृदयाह्लादकत्वेन चारु सादृश्यमुद्भूततया उल्लसित-व्यङ्ग्यमर्यादां विना स्पष्ठम् प्रकाशते तत्र उपमालंकारः।

**३. कुवलयानन्दलक्षणम् -**

**उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः**[१८]

यत्र द्वयोः सादृश्यलक्ष्मीः उल्लसति सा उपमा।

**उदाहरणम् -**

**हंसीव कृष्ण! ते कीर्तिः स्वर्गङ्गामवगाहते।।**

यथा कृष्णस्य कीर्तिः हंसीव सुरगङ्गायां विहरति। अत्र कृष्णस्य कीर्तिः उपमेयः। हंसी उपमानम्। इव उपमावाचकः। विहरति इति समानधर्मः। एवं चतुर्णां अंशानां समाहारात् अत्र पूर्णोपमा।

**४. साहित्यदर्पणलक्षणम् -**

**साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः।**[१९]

साम्यमिति। वाक्यस्यैकत्वे सति द्वयोः साम्यमुपमेत्यन्वयः। साम्यं साधर्म्यं गुणक्रियादिरूपम्। वाच्यमभिधया बोध्यम्।

**उदाहरणम् -**

**सौरभमम्भोरुहवन्मुखस्य कुम्भाविव स्तनौ पीनौ।**
**हृदयं मदयति वदनं तव शरदिन्दुर्यथा बाले।।**

सौरभमिति। मुखस्य सौरभमम्भोरुहवृत्तिसाधर्म्याभिन्नमित्यन्वयबोधः। यद्वा सौरभाभिन्नमम्भोरुहसाधर्म्यं मुखसंबन्धीति। स्तनौ पीनलाभिन्नकुम्भवृत्तिसाधर्म्याश्रयावित्यन्वयबोधः। एवमुत्तरत्रापि।

**५. काव्यप्रकाशलक्षणम् -**

**साधर्म्यमुपमा भेदे।**[२०]

साधर्म्यस्य प्रतियोग्यनुयोगिनिरूप्यतया तदनभिधाने न्यूनत्वं लक्षणवाक्यस्येति चेत्, न। आक्षेपादुपमानोपमेयरूपयोस्तयोर्लाभात्। न च प्रतियोग्यनुयोगिमात्राक्षेपेऽतिप्रसङ्गः। उपमानोपमेये विनान्यस्य कार्यकारणादिमात्रस्य साधर्म्याभावात्। एवं चोपमानोपमेययोः समानेन धर्मेण सम्बन्ध उपमेति लक्षणम्। अत्र चोपमानोपमेययोराक्षेपः साधर्म्यप्रतिपत्तिमात्रफलकः, न तु व्यावर्तकः। नन्वेवं भेदे इत्यनुपादेयम्। तस्याप्याक्षेपादेव लाभसम्भवात्। न ह्यभेदे सादृश्यात्मकं साधर्म्यमिति चेत्, न। साधर्म्यपदस्याऽऽरोपितानारोपितसाधारणसमानधर्मसम्बन्धमात्रपरत्वेनाऽऽरोपितसाधर्म्यनिबन्धनस्यानन्वयालङ्कारस्य व्यवच्छेद्यत्वात्। अलङ्कारत्वे सति इत्यपि पूरणीयम्। साधर्म्यमात्रस्योपमात्वाभावात्।

**उपमायाः भेदाः -**

१. पूर्णोपमा, २. लुप्तोपमा

**साग्निमा। श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा।**

पूर्णोपमा षट् विध:।यत्रोपमानोपमेयसाधारणधर्माणामुपमाप्रतिपादकशब्दस्य चोपादानं सा पूर्णा। एतच्चतुष्कमध्ये एकस्य द्वयोस्त्रयाणां वाऽनुपादानं यत्र सा लुप्ता। लुप्तोपमा अष्टविध:।

**उदाहरणम् -**

**स्वप्नेऽपि समरेषु त्वां विजयश्रीर्न मुञ्चति।**
**प्रभावप्रभवं कान्तं स्वाधीनपतिका यथा।।**

अत्र विजयश्रीरुपमेया स्वाधीनपतिकोपमानम्। न मुञ्चतीति साधारणो धर्म:। यथेत्युपमाप्रतिपादकम्। एवमग्रेऽप्यूह्यम्। न चैतेषां कयोरपि समास इति वाक्यगतश्रौती।

**उपसंहार: -**

एवं काव्येषु सत्सु बहुषु अलङ्कारेषु उपमाया: एव अतीव प्राधान्यं वरीवर्ति। अत: तस्यैव अलङ्कारस्य अर्थालङ्कारेषु अग्रिम स्थानं दत्तम्। महाकवय: अपि आधिक्येन उपमामेव स्वकीय काव्येषु स्वीकुर्वन्ति। महाकवि कालिदास: अनेन अलङ्कारेणैव सुप्रसिद्ध: सञ्जात:। यथा 'उपमा कालिदासस्य' इति। उपमालङ्कारेण विना अन्येपि अलङ्कारा: नोद्भवन्ति। अयमेव उपमालङ्कार: अन्येषां सर्वेषां अलङ्काराणां मार्गदर्शकरूपेण भवति।

तदधुनात्र मया विभिन्न आलङ्कारिकदृष्ट्या उपमालङ्कारस्य प्राधान्यं, प्राचीनत्वम्, लक्षणं, उदाहरणं तद्भेदा: च सुष्टु उल्लिखिता:।

**टिप्पण्य:**

| | |
|---|---|
| १. अलङ्कारशेखर: | २.ऋग्वेद: १.१३०.४ |
| ३. ऋग्वेद: २.४.६ | ४.ऋग्वेद: १.१२४ |
| ५. पाणिनीयसूत्रम्,२.१.५५ | ६.पाणिनीयसूत्रम्, ५.१.१३७ |
| ७. पाणिनीयसूत्रम्, ३.१.१० | ८.पाणिनीयसूत्रम्, ५.४.९७ |
| ९. पाणिनीयसूत्रम्,२.१.५६ | १०. पाणिनीयसूत्रम्,२.१.५५ |
| ११. पाणिनीयसूत्रम्,२.१.५६ | १२. पाणिनीयसूत्रम्,२.१.११६ |

१३. पाणिनीयसूत्रम्,२.१.११५
१४. चित्रमीमांसा
१५. चित्रमीमांसा
१६. नाट्यशास्त्रम्,६.४१
१७. चन्द्रालोकः ५.११
१८. कुवलयानन्दः ६
१९. साहित्यदर्पणः १०.१८
२०. काव्यप्रकाशः १०.१२६

## उपयुक्तग्रन्थसूची

१. अलङ्कारशेखरः, केशवमिश्रः, संस्कृत पुष्पक् बन्धर, कलिकत्ता, १९९८
२. ऋग्वेदसंहिता, सायणाचार्यः, वैदिकसंशोधनमण्डल, पूने, २००१
३. काव्यप्रकाशः, मम्मटः, चौखम्बा विद्याभवन, वारणसी, १९९९
४. कुवलयानन्दः, अप्पय्यदीक्षितः, चौखम्बा विद्याभवन, वारणसी, १९९९
५. चन्द्रालोकः, जयदेवः, चौखम्बा संस्कृत संस्थान, वारणसी, २०००
६. चित्रमीमांस, श्रीदप्पय्यदीक्षितः, चौखम्बा संस्कृत संस्थान, वारणसी, २०००
७. नाट्यशास्त्रम्, भरतः, चौखम्बा संस्कृत संस्थान, वारणसी, १९९९
८. पाणिनीयसूत्रम्, चौखम्बा संस्कृत संस्थान, वारणसी, १९९९
९. साहित्यदर्पणः, विश्वनाथः, भारतीय बुक् कर्पोरेशन, दिल्ली, २०००

□□□

# वामनचरितमहाकाव्यस्य सामाजिकवैशिष्ट्यम्

*महेश कुमार*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः)*

कविः एकः सामाजिकः मनुष्यः । समाजे सः जीवति । समाजात् सः शिक्षां लभते । समाजे घटितानां सर्वेषां वस्तूनां निरीक्षणं करोति । तानि मनसि स्थापयति । प्रसङ्गानुक्रमेण तन्मनसि स्थितानां वस्तूनां परिस्फुरणं बुद्धौ जायते । यदा सः स्वीयकाल्पनिकं वस्तु शब्दैः रूपं ददाति तदा पूर्वस्मृतिः अवश्यं तत्र आगच्छति । अतः कवीनां काव्येषु समाजस्य विविधानां प्रसङ्गानां प्रतिबिम्बः दृश्यते । अतः समालोचकैः उच्यते - "साहित्यं समाजस्य दर्पणः" इति । काव्यं सामाजिक-धार्मिक-राजनैतिक- तत्त्वानामाकरं भवति । एवं श्रीमद्भागतस्य मूलकथावस्तु स्वीकृत्य भगवतः वामनस्य चरित्रमाधारीकृत्य स्वप्रतिभावैभवेन महाकविना प्रणवकविना **श्रीइच्छारामद्विवेदिना** रचितं **"वामनचरितम्"** इति महाकाव्यमपि विविधसामाजिक-धार्मिक-राजनैतिकतत्त्वैः परिपूर्णमस्ति । तत्र कानिचन सामाजिकवैशिष्ट्यान्यत्र आलोच्यन्ते । इति नास्ति सन्देहस्य लेशोऽप्यवकाशः । अधस्तात् तत्तद्वैशिष्ट्यं प्रस्तूयते।

**सामाजिकं वैशिष्ट्यम्**

सामान्यरूपेण समाजशब्देन प्रत्येकं व्यक्तिः परिचीयते । व्यक्तीनां समूहः एव समाज इत्युच्यते । यथा - आर्यसमाजः, ब्रह्मसमाजः, धर्मसमाजः, बालसमाजः इत्यादिः । समाजः मूर्त्तं सङ्घटनं नास्ति, अपि तु सः सामाजिकसम्बन्धानाममूर्त्तव्यवस्थेति कथ्यते । सामाजिकसम्बन्धः द्वयोः मनुष्ययोः मध्ये स्थापितो भवति ।

लेपियर्महोदयाः कथयन्ति - "समाजः मनुष्याणां समूहो न भवति, अपि तु सः समूहे अन्तःसम्बन्धानां जटिलव्यवस्था इति कथ्यते ।"[१] इति ।

रयुटरमतानुसारं - "समाजः एका अमूर्त्तधारणा । एषा धारणा सदस्यानां समूहे घटितानासामाजिकान्तःसम्बन्धानां बोधनं कारयति ।"[२] इति ।

गिडिङ्गस्महोदयानां मतानुसारं - "समाजः एकः सङ्घो भवति । यत्र मनुष्याः परस्परं सम्बन्धिताः भवन्ति ।"[३] इति ।

मैकाइवर् तथा पेज्मतानुसारं -"समाजः रीतीनां, कार्यप्रणालीनाम्, प्रभुत्वस्य, पारस्परिकसहयोगस्य, समूहस्य, विभाजनस्य, मानवव्यवहारनियन्त्रणाणां, स्वाधीनतायाश्च एका व्यवस्था भवति । समाजः सामाजिकसम्बन्धानां जालमित्युच्यते। एषः सदैव परिवर्तनशीलो भवति ।"[४] इति ।

एवं सर्वेषां परिभाषाणां च आधारेण अयं निष्कर्षो भवति यत् व्यक्तीनां समूहः समाजो न भवति । वस्तुतः समाज इत्युक्ते सामाजिकसम्बन्धानां काऽपि व्यवस्था । अत्र यन्त्राणि, प्रविधयः, प्रथाः, परम्पराः अन्तर्भवन्ति । एतानि सर्वाणि वस्तुनि संस्कृतौ अन्तर्भवन्ति । मेकाइवरपेजमहोदयाभ्याम् संस्कृतौ कला, साहित्यं, धर्मः, मनोरञ्जनम्, आनन्दः इत्यादिविषयाः परिचर्चिताः । जातिव्यवस्था, आश्रमव्यवस्था, वर्णव्यवस्थाऽपि समाजान्तर्गतो भवति । मातृ-पितृ-भ्रातृ-भगिनी-पत्नी-पतिषु विद्यमानः सहसम्बन्धः, तेषां कर्तव्याकर्तव्ये, उत्तरदायित्वम् इत्यादिविषया अपि सामाजिकविषया एव भवन्ति। गुरुशिष्ययोः सम्बन्धोऽपि सामाजिकसम्बन्ध एव भवति ।

एवमेते सर्वे सामाजिकविषयाः वामनचरितमहाकाव्ये समुपलभ्यन्ते । अत्र ब्राह्मणवर्णनम्, देववर्णनम्, असुरवर्णनम्, युद्धप्रस्थानवर्णनम्, प्रभातवर्णनम्, प्रकृतिवर्णनम्, सायंवर्णनम्, स्वप्नवर्णनम्, पत्नीकर्तव्यम्, गुरुशिष्यसम्बन्धः, पतेः कर्तव्यम्, मातुः सन्तानवात्सल्यम्, पुत्रस्य कर्तव्यम्, दैनिकजीवनचर्या, तपश्चरणम्, व्रताचरणम् इत्यादिसामाजिकविषयाः साङ्गोपाङ्गं कविना वर्णिताः । त एव महाकाव्यस्यास्य सामाजिकवैशिष्ट्यं प्रतिपादयन्ति । तेषु केचन विषयाः उदाहरणार्थमत्र प्रस्तूयन्ते ।

**ब्राह्मणवर्णनम् -**

**द्वादशाहोभिरस्याः व्रतं पूरितं,**
**सा प्रहृष्टाऽदितिः श्रीहरेः पूजनम् ।**

**संविधायात्मगेहे तदा द्वादशान्,**
**ब्राह्मणानां जुहावाद्य सम्भोजितुम् ।।**[५]

अत्र ब्राह्मणातिथिसत्कारस्य वृत्तान्तः वर्णितोऽस्ति । यदा अदितिः द्वादश दिनानि यावत् व्रतं कृत्वा व्रतं पूरितवती तदा श्रीहरेः पूजापूर्वकं द्वादश ब्राह्मणान् भोजनार्थं स्वगृहं निमन्त्रयति ।

यथा वा -

**कश्यपस्याश्रमे ते समे ब्राह्मणा,**
**भोजनार्थं यदा हर्षिता आगताः ।**
**स्वागतं पादप्रक्षालनं श्रद्धया,**
**साऽपि कृत्वाऽदितिर्भोजनं चानयत् ।।**[६]

अत्र अदित्या कृतः ब्राह्मणातिथिसत्कारः सम्यक् प्रतिपादितः । ब्राह्मणानां सहर्षं कश्यपाश्रमं प्रति आगमनम्, अदित्या ब्राह्मणानां स्वागतीकरणम्, श्रद्धया पादप्रक्षालनम्, भोजनानयनञ्च शुद्धातिथिसत्कारस्य ज्वलन्तमुदाहरणं भवति ।

**देववर्णनम् -** समाजे देवदानवसम्बन्धः दिव्यसम्बन्धो भवति । मनुष्यः स्वसुखार्थं देवानां पूजनं करोति । देवानां कृते यज्ञं सम्पादयति । देवस्तुतिं करोति । देवान् आधारीकृत्य भारतवर्षे अनेके सम्प्रदायाः प्रादुर्भूतास्सन्ति । विष्णोः आराधनं ये कुर्वन्ति, ते वैष्णवाः इति कथ्यन्ते, ये शिवाराधनं कुर्वन्ति ते शैवाः इत्युच्यन्ते, ये महाशक्तेः पूजां कुर्वन्ति ते शाक्ताः भवन्ति । सर्वेषां मनुष्याणां कश्चन इष्टदेवोऽवश्यं भवति । देवानां पूजाराधनादिकं देवालयेषु, गृहेषु स्वतन्त्रतया मनुष्यैः सम्पाद्यते । एषा एका विशिष्टा सामाजिकस्थितिः।

प्रणवकविः आचार्य इच्छारामद्विवेदी वैष्णवो भवति । श्रीमद्भागवतं तस्य प्रतिवचनं परिस्फुरति । समाजे देवपूजनप्रसङ्गे सः स्ववामनचरितमहाकाव्ये बहुत्र प्रतिपादयति । यथा -

**तदा धरालोकगता नरा वै,**
**महर्षिदेवर्षिमुनीश्वराश्च ।**

**नतेन शीर्ष्णा हरिपादपद्मे,**
**प्रणामपुष्पाञ्जलिभिः प्रणेमुः ।।**[७]

अत्र हरिचरणकमलयोः नताननानां मनुष्य-महर्षि-देवर्षि-मुनीश्वराणां प्रणाम-पुष्पाञ्जलिप्रदानविधिः अतीवसुन्दरतया कविना प्रतिपादितः ।

यथा वा -

**असौ गुरुश्चापि महानुभावः**
**परीक्षितो मे हृदयं प्रविष्टः ।**
**अनेन दैत्योऽपि कृतः सुदेवः**
**स्वभाव एतन्महतां सदैव ।।**[८]

महापुरुषाणां स्वभावः देवानां स्तुतिपूर्वक एव भवति इति अत्र कविः प्रस्तौति।

यथा वा -

**अनन्तरं विष्णुपदं पवित्रं**
**यदा प्रयातं खलु नाकलोकम् ।**
**तदा समस्ता दिवि देवसंज्ञाः,**
**अवाकिरन्नन्दनपुष्पराशिम् ।।**[९]

अस्मिन् श्लोके भगवतः श्रीवामनस्य एकं चरणं यदा स्वर्गलोके प्रविशति तदा तत्रस्थाः देवगणाः तच्चरणसेवनपूर्वकं कथं पुष्पवृष्टिं कुर्वन्ति कविना तदेव प्रतिपादितमस्ति। वस्तुतः देवानां चरणपूजनं पुष्पाञ्जलिप्रदानपूर्वकमेव समाजे जनैः क्रियते । न केवलं जनैरपि तु देवैरपि तत्पदकमलपूजा पुष्पाञ्जलिद्वारा स्वर्गलोकेऽपि क्रियते इति अत्र कवेराशयः परिस्फुटो भवति ।

**पतिपत्नीसम्बन्धः -** समाजे पत्नीपतिसम्बन्धः अर्धनारीश्वरसम्बन्ध इत्युच्यते। पत्नीं विना पतेः जीवनं निरर्थकं भवति । यथा रथस्य द्वे चक्रे, पक्षिणां द्वे पक्षे तथैव परिवारजीवनस्य पत्नीपती भवतः । महाकविः इच्छारामद्विवेदी पत्नीपत्योः एतादृशं सम्बन्धं वामनचरितमहाकाव्यस्य द्वादशसर्गे अतीव सुन्दरतया प्रतिपादितवान् । भवगतः समीपे स्वीयं सर्वं समर्पयितुमिच्छन् राजा बलिः स्वधर्मपत्न्याः मनोभावं ज्ञातुं तां ददर्श। अनेन च्छलेन कविः समाजे यः पत्नीपत्यादर्शः वर्तते तमुपस्थापयति ।

यथा -

ततो बलिर्हृष्टमनास्तपस्वी,
ज्ञातुं मनोभावमपि प्रियायाः ।
चन्द्राननेऽपाङ्गविसर्जनं स्वं,
चकार किञ्चित्स्मितमादधानः ।।
निरीक्ष्य सा राजवधूः समग्रं,
भावं प्रभावं च महानुभावम् ।
स्वभावमेवापि निजस्य पत्युः,
बभूव विज्ञाय परं प्रहृष्टा ।।
गुणैः स्वरूपैः सरसैः वचोभिः,
कान्ता ह्रिया दैत्यपतेः स्वपत्युः ।
सदैव चित्ते परिसंस्थिता या,
कथं न जानाति मनः स्वभर्तुः ।।
प्रियो यदा चञ्चलनेत्रकोणैः,
प्रियापि चाऽपाङ्गनिदर्शनेन ।
प्रवक्तुकामौ भवतः समाजे,
स शाब्दबोधोऽद्भुत एव लोके ।।
विनापि शब्दैरखिलं स्वभर्तु-
र्भावं विजानाति च चित्तवृत्तिम् ।
असंशयं सा हृदयं द्वितीयं,
प्रिया सदा सैव च धर्मपत्नी ।।[१०]

समाजे यदा चञ्चलनेत्रकोणैः प्रियः अपाङ्गनिदर्शनेन च प्रिया अपि प्रवक्तुकामौ भवतः स शाब्दबोधः लोके अद्भुत एव भवति । प्रियस्य सङ्केतमात्रेणैव प्रिया सर्वं विषयमधिगच्छति । प्रियायाः अपाङ्गनिदर्शनेनैव प्रियः कान्ताऽभिप्रायं विजानाति । एषः अपूर्वः शाब्दबोधो भवति । शब्दैः विनाऽपि अखिलां चित्तवृत्तिं, प्रियस्य मनसि

स्थितं सर्वं भावं प्रेयसी ज्ञातुं प्रभवति । सा प्रियस्य द्वितीयं हृदयं भवति । सा धर्मपत्नी अर्धाङ्गिनी इत्युच्यते ।

**गुरुशिष्यसम्बन्धः** - प्राचीनशास्त्राधारेण ब्रह्मविद्यासम्पादनार्थं गुरुः शिष्यान् पाठयति । गुरु-ऋणमुक्त्यर्थं शिष्यः सर्वदा प्रयत्नशीलो भवति । गुरुः सर्वदा शिष्यात्पराजयमिच्छति । समाजेः गुरुशिष्ययोः सम्बन्धः अतीव महत्त्वपूर्णो भवति । गुरुः सिद्धिदः, पापापहारकः, मुक्तिदः, अज्ञानविनाशको भवति । शिष्यः गुरोः कीर्त्तिविवर्धकः, हितचिन्तकश्चास्ति । अनयोः गुरुशिष्ययोः सम्बन्धः अतीव मार्मिकरीत्या कविः वामनचरितमहाकाव्यस्य प्रथमसर्गे शुक्राचार्यबलिकथोपकथनप्रसङ्गे प्रतिपादयति।

शुक्राचार्यः कठोरतपस्साधनं कृत्वा कविषु श्रेष्ठः, ब्रह्मतेजोमयी च आसीत्। तस्य समीपे सदैव मृतसञ्जीविनीविद्या बभौ । समुद्रमथनादमृतनिस्सरणादनन्तरं बलिः मोहिन्याः पक्षपाततः देवैः पराजितः संज्ञाहीनः जातः । दैत्याः तं स्वीकृत्य शुक्राचार्यस्य आश्रमं प्रति आनीतवन्तः । तदा गुरुः स्तस्मै स्वशिष्याय तत्क्षणमेव सञ्जीवनीविद्यया प्राणदानं कृतवान् । लब्धसंज्ञः बलिः सद्यः भक्तितः श्रीगुरोः पादं धृत्वा प्रणतिं विज्ञापितवान्। शिष्यं दृष्ट्वा गुरोः चित्तं द्रवीभूतमभवत् । अत्र कविः लिखति -

**द्रवीभूतं तदा चित्तं गुरोरस्य कृतेऽभवत् ।**
**चन्द्रं दृष्ट्वा द्रवीभूतश्चन्द्रकान्तो मणिर्यथा ।।**[११]

शिष्यस्य निश्छला रतिः गुरौ भवति । तां दृष्ट्वा गुरुः सदा प्रीतो भवति । शुक्रः बलेरुपरि प्रीतस्सन् तस्य सर्वहितं साधयितुं पृच्छति । यथोक्तं कविना -

**शुक्रो बलिमुवाचेदं वत्स ! ते निश्छला रतिः ।**
**सदा माऽतोषयत्पुत्र किं ते कुर्वे हितं प्रियम् ।।**[१२]

गुरुशिष्ययोः सम्बन्धः यज्ञाहुत्योः सम्बन्ध इव भवति । समाजे तौ अन्योऽन्याश्रितौ लोके स्थितौ समाजस्य शुभङ्करौ एव भवतः । तदुक्तं कविना -

**गुरोः शिष्यस्य सम्बन्धः यज्ञाहुत्योरिव श्रुतः ।**
**अन्योऽन्यं तौ श्रितौ लोके द्वावपीह शुभङ्करौ ।।**[१३]

अत्र गुरुशिष्ययोः सम्बन्धमाश्रित्य केचन सुन्दरश्लोकाः कविना उल्लिखिताः। यथा -

**सच्छिष्याय गुरुर्दत्वा कृतार्थो भुवि जायते ।**
**विद्यामाध्यात्मिकीं स्वीयां यथा न्याससमर्पकः ।।**
**प्रवृत्ते हरिसंवादे मध्ये तु गुरुशिष्ययोः ।**
**जायते जन्मसाफल्यं विद्यासन्धिसमुत्थितम् ।।**[१४]

उत्तमः गुरुः स एव भवति, यः निखिलनिगमशास्त्रं जानाति, छात्रान् सर्वदा सर्वं दातुं समर्थो भवति, नित्यकरुणामूर्त्तेः यस्य शिष्यवात्सल्यं विद्यते । एतादृशः गुरुरेव सर्वदा जयति लोके । तदुक्तं कविना -

**जयति जयति लोके सद्गुरुः कोऽपि पुण्यः**
**निखिलनिगमवेत्ता सर्वदा सर्वदोऽसौ ।**
**अजहरिहरमूर्त्तिः नित्यकारुण्यपूर्त्तिः**
**सुत इव निजशिष्यं पाति यः सत्प्रयत्नैः ।।**[१५]

**मातुः पितुश्च सन्तानवात्सल्यम् -**

**सरित्प्रेम्णो दिव्याऽदितिहृदयदेशात्प्रकटिता**
**सकल्लोलाक्रोडे निजसुततनुं स्थापितवती ।**
**स्रवन्ती स्नेहेनेयमपि ललितं सुस्तनमहो**
**ददौ माता देवानन अमितरागात्सुतशिशोः ।।**[१६]

अत्र मातुः अदितेः स्वशिशुं प्रति यद् हृदयवात्सल्यं कविना प्रकटितं तत्सर्वेषां हृदयग्राह्यं भवति । स्वशिशुं दृष्ट्वा तस्याः हृदये प्रेम्णः दिव्यनदीधारा प्रवाहिता जाता। तरङ्गितहृदयेन स्वपुत्रं सा निजाङ्के स्थापितवती । तस्याः वक्षस्स्थलात् स्वतःस्फूर्ततया दुग्धधारा निःसृताऽभवत् । स्वस्तनं सा पुत्रमुखे स्थापितवती । अहो पुत्रवात्सल्यमदितेरत्र प्रकटिता कविना ।

पुत्रस्य शोकेन मातुः पितुश्च हृदये आदौ शोकाग्निः प्रज्वलितो भवति । पुत्रदुःखेन तौ सर्वदा दुःखिनौ भवतः । एषः सामाजिकसम्बन्धः वर्तते । अत्र कविः अस्मिन् प्रसङ्गे उदाहरणद्वारा सम्यक्प्रतिपादयति यत् -

**निजरसैः परिपालितवृक्षकं**
**धरणिधूलिगतं प्रविलोक्य किम् ?**
**न च भुवा विपदा ह्यनुभूयते**
**जगति दुःखमहो किल कस्य न ।।**[१७]

अस्मिन् संसारे स्वीयरसेन पृथिवीमात्रा परिवर्धितः वृक्षः यदा भग्नस्सन् अधः धूलौ पतति, तदा तं दृष्ट्वा पृथिव्याः विपत्तिः अनुज्ञायते । मातुः स्तन्यपानेन परिवर्धितस्य पुत्रस्य यदा विपत्तिः आगच्छति सा विपत्तिः मातुरेव भवति । अतः अदितिः स्वपुत्राणां विपत्तिं दृष्ट्वा दुःखिता भवति । मातुः हृदयं विडम्बितं भवति । पुत्रकष्टेन सा पीडिता भवति । कविः अस्मिन् अतीवमार्मिकतया लिखति -

**निजसुतानभिलक्ष्य विमर्दितान्,**
**तु जननी तपतीह भवे सदा ।**
**स्वजनजीवकुलं कुगतिं गतं**
**समभिवीक्ष्य धरा विमनायते ।।**[१८]

**व्रताचरणम् -** संसारे पुत्रप्राप्त्यर्थं, सुखप्राप्त्यर्थं, पतेः आयुविवर्धनार्थं नार्यः व्रताचरणं कुर्वन्ति । एषः एकः महत्त्वपूर्णः सामाजिकव्यवहारः । निजपुत्राणामसुरैः पराभवं दृष्ट्वा अदितिः व्याकुला भवति । कश्यपस्य समीपे तेषां दुःखदवृत्तान्तं सा श्रावयति । तदा पुत्राणां सुखाय महर्षिकश्यपः तां हरौ भक्तिं कर्तुमुपदिशति । पुत्राणां मङ्गलकामनया पयोव्रताचरणं कर्तुं वदति । पयोव्रतं पुत्रसुखार्थं क्रियते । अस्य व्रतस्य महत्त्वमाचरणविधिञ्च प्रतिपादयन् सः कथयति -

**व्रतमिदं व्रतराजसमं प्रिये,**
**विपुलमूल्यधरो मणिरस्ति कौ ।**
**व्यथितदेवकुलं परिरक्षितुं**
**तदिह देवि ! करिष्यति ते हितम् ।।**
**अखिललोकसुसृष्टिकरः प्रभु-**
**स्तव गृहे भविता व्रतपूजितः ।**

सुरकुलाय च दास्यति निश्चयं
स हि पुरातनवैभसम्पदम् ।।
नियमतश्चर भावयुता प्रिये,
शुभपयोव्रतमत्र सुभक्तितः ।
न हि विना तपसा भुवि सिद्ध्यति,
सहजसिद्धिफलं तपतां शुभे ।।
सुतनु ! मासि शुभेऽत्र सुफाल्गुने
सितसुपक्षगता प्रतिपत्तिथिः ।
भवति चास्य व्रतस्य कृते शुचिः,
व्रतमिदं चर देवि ! फलप्रदम् ।।
अनुदिनं जप मन्त्रमणिं हरेः
सुखकरं खलु भास्करवर्णकम् ।
शिशुयुताञ्च समर्च्य पयस्विनीं,
पिब पयो हरिपूजनपूर्वकम् ।।[१९]

एवं हरिपूजनपरं पयोव्रतं भवति । अस्य पयोव्रतस्य निष्ठापूर्वकं परिपालनेन स्वसन्तानानां हितं, सुखं, समृद्धिः, विकासः, अभ्युन्नतिश्च भवति इति अत्र प्रतिपाद्यते। यथाविधि अस्य व्रतस्य परिपालनप्रसङ्गे कविः सप्रमाणं पञ्चमसर्गे प्रतिपादयति इत्यलं विस्तरेण ।

## टिप्पणीमाला

१. समाजशास्त्रम् - पृ.६ (रवीन्द्रनाथमुखर्जी, भरत अग्रवाल् पुस्तकप्रकाशन, आगरा)
२. तत्रैव
३. तत्रैव
४. तत्रैव
५. वामनचरितम् (वा.च.) - ५/९
६. वा.च. - ५/१०

७. वा.च. - २/२२
८. वा.च. - २/६०
९. वा.च. - २/२४
१०. वा.च. - १२/१-६
११. वा.च. - १/२४
१२. वा.च. १/२५
१३. वा.च. - १/४०
१४. वा.च. - १/४२-४३
१५. वा.च. १/५८
१६. वा.च. - ७/२३
१७. वा.च. - ४/५
१८. वा.च. - ४/१३
१९. वा.च. - ४/२५-२९

## सहायकग्रन्थसूची


१. वामनचरितम्, इच्छारामद्विवेदिप्रणितम्, नागप्रकाशन, उत्तरप्रदेश, १९९७
२. समाजशास्त्रम् , रवीन्द्रनाथमुखर्जी, भरत अग्रवाल् पुस्तकप्रकाशन, आगरा


□□□

# महाकवि-शेवडेमहोदयानां साहित्यरचनासु वैदर्भीरीतिः

*श्रीमति मञ्जु थेमदेव (चेन्ने)*
*(शोधच्छात्रा, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**उपोद्घातः -**

**'विदर्भदेशाभिजनं वसन्तं शम्भोः कृपाभाजनमाश्रयन्ती।**
**गुणानुवादैर्जगदम्बिकाया वैदर्भरीतिः सफला विभाति।।'**[1]

इत्थमात्मनः विषये विश्वासेन कथयति महाकविः शेवडेमहोदयः। अयं महाकविः महाराष्ट्रान्तर्गतविदर्भदेशस्य निवासी सन् विदर्भस्य अपूर्वं भूषणम् । वैदर्भीरीत्या रचिताभिः स्वसाहित्यकृतिभिः अर्वाचीनसंस्कृतक्षेत्रे **अपरकालिदास** इति प्राप्तोपाधिना विभूषितोऽयं महाशयः। वाराणसीयपण्डितेषु अग्रगण्योऽयं साहित्य-न्याय-व्याकरणशास्त्राणामध्ययने कृतपरिश्रमः । तेषां महाकाव्येषु लघुकाव्येषु च वैदर्भी रीतेः साम्राज्यं विलसति। बिह्लण-कालिदासयोरनन्तरं वैदर्भीरीतिः शेवडेमहाभागमेव आश्रितवतीति ज्ञापयन् महाकविः विन्ध्यवासिनी-विजयमहाकाव्यस्य निवेदने उल्लिखति -

**कविकुलगुरुमादौ शिश्रिये कालिदासं**
**तदनु च कविमल्लं बिल्हणं या प्रपेदे।**
**स्मरहरचरणाब्जे चञ्चरीकं वसन्तं**
**श्रयति कविमिदानीं सैव वैदर्भरीतिः।।**[2]

इयं वैदर्भीरीतिः कीदृशी ? तथा च कवीनां काव्येषु केन प्रकारेण स्वसाम्राज्यं वितनुते इति शोधपत्रस्य विषयः ।

## १. का नाम रीतिः ?

**रीङ्-गतौ** इत्यस्मात् धातोः **'स्त्रियां क्तिन्'** इति पाणिनिसूत्रेण क्तिन् प्रत्यये **रीतिः** इति पदनिष्पत्तिः। **रिणन्ति गच्छन्ति अस्यां गुणाः** इति, **रीयते**

**क्षरत्यस्यां वाङ्मधुधारा** इति, **रीयते ज्ञायते गुणविशेषोऽनयेति वा रीतिः** इति रीतेः व्युत्पत्तिः भवितुमर्हति।

वामनाचार्येण **'विशिष्टपदरचना रीतिः** इत्युक्तम् । वैशिष्ट्यं च गुणसम्पन्नता। गुणसम्पन्नतैव सौन्दर्यस्य द्योतिका। अतो वामनमते सुन्दरपद-रचनायाः या कला सा रीतिरुच्यते।[3] **'पदानां सङ्घटनाविशेषो रीतिः'** इति अभिनवगुप्तः लोचने वक्ति। तथैव **'पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्'**इति विश्वनाथः।[4] राजशेखरस्तु काव्यमीमांसायाम् - **'वचनविन्यासक्रमः रीतिः'**[5] इति कथयति। पातञ्जलमहाभाष्ये रीतिशब्दः शैली इत्यर्थे प्रयुज्यते ।

सा गुणाभिव्यञ्जकवर्णादीनां योजनारूपैव बोध्या। यथा वेधसः कलाकौशलकारुताद्वारा मुखनयनाद्यवयवानां यथोचितस्थाने सन्निवेशनम् अङ्गनायाः अङ्गभङ्गिभिः शरीरच्छविः कामपि विलक्षणां सौन्दर्यचमत्कृतिम् आवहति तथैव कवेः लोकोत्तररचनानैपुण्येन वर्णपदादीनां यथायोग्ययोजनया काव्यच्छटा नितरां हृदयहारिणी भवति। तस्मादेव **'विशेषो गुणात्मा'** इति वामनस्य अभिप्रायः।

**२. साहित्ये रीतयः -**

सा चेयं रीतिस्त्रिधा भिद्यते। वैदर्भी, गौडी, पाञ्चाली चेति। परं विश्वनाथः रुद्रटश्च रीतिं चतुर्धा उक्त्वा लाटिकां तत्रैवान्तर्भावयति। भोजराजमतेन तु रीतिः षोढा। मागधी तथा च अवन्तिका इति रीतिद्वयं सः अधिकं योजयति। परं प्रायशः सर्वे साहित्यचार्याः वामनस्य रीतित्रयमेव अङ्गीकुर्वन्ति। यतो हि अन्ये प्रकाराः वैदर्भ्यगुणमेव धारयन्ति।

तत्र विदर्भदेशोत्पन्नानां महाकवीनामियमिति रचनाशैली वैदर्भी। गौडदेशोत्पन्नानां महाकवीनां शैली तु गौडी। पाञ्चालानां पाञ्चालदेशोत्पन्नानां कवीनाम् पाञ्चाली। एवं प्रान्तानुसारः भेदः कृतः दृश्यते। **समग्रगुणा वैदर्भी । ओजःकान्तिमती गौडीया। माधुर्यसौकुमार्योपपन्ना पाञ्चाली**[6]**।** इत्थं गुणाधारेण तासां वैशिष्ट्यं वर्णितं वामनेन।

**३. वैदर्भीरीतिस्वरूपम् :-**

**'विदर्भादिषु दृष्टत्वात् तत्समाख्या'**[7] इति वामनाचार्यः। तत्र वैदर्भीरीतिः विदर्भदेशोद्भवकविसम्प्रदायाभिमतत्वेन वैदर्भीति संज्ञामावहति।

**माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका।**
**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥**[8]

माधुर्यव्यञ्जकवर्णाः नाम वर्गवर्जिताः (टठडढान् विना), स्पर्शसंज्ञकाः (कादयो मान्ताः) निजवर्गान्त्ययुक्ताः वर्णाश्च मधुरवर्णध्वनेः उत्पादकाः भवन्ति। तथैव ह्रस्वस्वरेण व्यवहितौ रेफणकारौ वर्णावपि माधुर्यव्यञ्जकावेव। ललितात्मिका इत्यतः सुकुमारबन्धात्मिका इत्यर्थः। अवृत्तिः नाम सर्वथा समासरहितत्वम्, अल्पवृतिः द्वित्रिमात्रपदघटितसमासविशिष्टा रचना माधुर्यस्य व्यञ्जिका वर्तते।

एवं माधुर्यगुणव्यञ्जकवर्णघटिता ललितपदार्थविन्यासा असमासा अल्पसमासा वा मधुरा काव्याकृतिरुच्यते। अतः एव-

**अस्पृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।**
**विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते॥**[9]

**४. वैदर्भीरीतिमहत्त्वम् :-**

समग्रैरोजःप्रसादप्रभृतिभिर्गुणैरुपेता वैदर्भी नाम रीतिः। इयमेव सङ्घटनात्मिका रीतिः माधुर्यादीन् गुणानाश्रित्य शृङ्गारादिरसान् व्यनक्ति। साऽपि समासाभावे शुद्धा वैदर्भी। तस्यां वैदर्भ्याम् अर्थगुणः सम्पदास्वाद्या भवति। इयं वैदर्भीरीतिः कर्णपथं प्रयाता चेत् अमृतवृष्टिरिव सतां चेतः प्रविश्य तान् आनन्दयति। तेन हि नीरसं वस्त्वपि सरसत्वं प्राप्नोति। तस्मात् एव कथ्यते -

**उदयति हि स तादृक्क्वापि वैदर्भरीतौ ।**
**सहृदयहृदयानां रञ्जकः कोऽपि पाकः॥**[10]

एवं रसादीनाम् उपकर्त्री एषा वर्तते। रसादीनां परिपोषिका विद्यते। शब्दार्थशरीरं काव्यम् उत्कर्षयति। अतः तामेकामेव कवयः स्तुवन्ति -

**सति वक्तरि सत्यर्थे सति शब्दानुशासने।**
**अस्ति तन्न विना येन परिस्रवति वाङ्मधु॥**[11]

**५. शेवडेमहोदयानां काव्येषु उपयुक्ता वैदर्भीरीतिः**

महाकविशेवडेमहाभागस्य काव्येषु विलसिता वैदर्भीरीतिः साहित्यदृष्ट्या उदाहरणैः परिशीलयितुं शक्यते।

**'विन्ध्यवासिनीविजयम्'** इत्यस्मिन् महाकाव्ये प्रथमे सर्गे विन्ध्याचलस्य प्राकृतिकं वर्णनं विद्यते। विन्ध्यपादे विशीर्णायाः रेवायाः विषये महाकविः एवं वर्णयति।

**रङ्गत्तरङ्गा मुदितान्तरङ्गा संस्पर्शमात्राद् विहितार्तिभङ्गा।**
**रेवाऽपि सेवाव्रतमाचरन्ती यत्पादनिर्णेजनमातनोति॥**[12]

**अस्यार्थ : –** चलत्कल्लोला संस्पर्शमात्रेण जनानां पीडामपहरन्ती नर्मदाऽपि विन्ध्याचलस्य पादानां प्रक्षालनं करोति। इदं मनोहरं पद्यं विद्यते। माधुर्यव्यञ्जकवर्णैः पदलालित्यमत्र निर्मितं दृश्यते।

**गङ्गातटे प्राप्तरणप्रसङ्गा वङ्गा निशुम्भाग्रजलब्धभङ्गाः।**
**सङ्घातभावं सहसा विहाय जङ्घाबलं सादरमाश्रयन्त॥**[13]

शुम्भवधमहाकाव्यस्य चतुर्थे सर्गे शुम्भासुरदिग्विजयवर्णनं प्रतिनायकस्य शौर्यं पौरुषोत्कर्षं च प्रकटयति। पद्येऽस्मिन् शब्दशय्याऽङ्कारझङ्कृतिः च नितरां मनोहारिण्यौ।

**अङ्कापेतशशाङ्कशङ्कितमुखीं पङ्कात्मजन्मेक्षणां**
**हुङ्कारक्षपितासुरां मणिमयालङ्कारझङ्कारिणीम्।**
**अङ्कासीनगजास्यहास्यमुदितां सङ्काशमानप्रभां**
**शङ्काहीनपराक्रमानुभजे त्वां कालकण्ठप्रियाम्॥**[14]

अस्मिन् पद्ये 'ङ्का' इति वर्णस्य प्रयोगं कृत्वा लालित्यं गेयतां माधुर्यं च निर्माय महाकविना चमत्कृतिः जनिता। पुनः पुनः इदं पद्यं पठितुं कस्य मनः न भवेत्।

**कूजत्क्रोञ्चा चटुलशफरा सञ्चरच्चञ्चरीका।**
**क्रीडत्कोका विकचकमला विस्फुरत्पुण्डरीका।**

**आगच्छेत् त्वन्नयनसरणिं लोलकल्लोलमाला।**
**भागीरथ्याः प्रकृतिरपरा पुण्यतोया पयोष्णी।।**[15]

अभिनवमेघदूते विदर्भस्य पयोष्णीनद्याः वर्णनमस्मिन् दृश्यते। अत्रत्या पद्यरचना जनाकर्षिणी एव। कचनरलवर्णानां पौनःपुन्येन प्रयोगः लालित्यं जनयति।

**यस्मिन् वनानां नितरां घनानां लतावितानैः परिवेष्टितानाम्।**
**निरन्तरायं पशवोऽन्तरङ्गे शार्दूलऋक्षप्रमुखा वसन्ति।।**[16]

कोङ्कणप्रान्तस्य वर्णनं महाकविः अस्मिन् पद्ये करोति। इदं पद्यं **'श्रीमोतीबाबाजामदारचरितम्'** इत्यस्मिन् काव्ये वर्तते। नवर्णप्रयोगेण लालित्यं सुबोधता च अस्मिन् विद्यते।

**निधाय पङ्केरुहनेत्रमङ्के तं केलियुक्तं पथि भूरिपङ्के।**
**शङ्के स रङ्केश्वरतां गतोऽपि साम्राज्यसौख्यं लभते स्म विप्रः।।**[17]

**काकैः खगेन्द्र इव कुक्कुरकैमृगेन्द्रो**
**ग्राम्यैर्महेन्द्र इव वर्करकैर्गजेन्द्रः।**
**ध्वान्तैर्दिनेन्द्र इव रासभकैर्हयेन्द्रो**
**बन्दीकृतो विधिवशाद्यवनैर्नरेन्द्रः।।**[18]

इत्थं शेवडेमहोदयस्य कामपि रचनां पठति चेत् तत्र माधुर्यगुणव्यञ्जकवर्णाः दृश्यन्ते। तत्र उक्तिवैचित्र्यम्, माधुर्यम्, अपारुष्यशरीरं सौकुमार्यं च विद्यते। माधुर्यं सुकुमारता च अस्य रचनायां वरिवर्ति।

टवर्गवर्जितानां वर्गाणां प्रथमतृतीयैः शर्भिरान्तस्थैश्च घटिता, नैकट्येन प्रयुक्तैरनुस्वारपरसवर्णैः शुद्धानुनासिकैश्च शोभिता रचना कवेरस्ति । सामान्यतः विशेषतः च निषिद्धाः संयोगाद्याः वर्णाः अत्र कविना न प्रयुक्ताः। समासविरहिता, सुबोधा सरला च रचना कवेः भवति। वीणायाः स्वराः श्रोतृमनोरञ्जकाः भवन्ति। तथैव वैदर्भीरीतेः रचना श्रोतृचित्तं रञ्जयति। अतः महाकवेः पद्यपङ्क्तिः एवमेव पठितृणां चित्तमानन्दयति।

तस्मादेव कतिचन विद्वांसः महाकवेः शैलीविषये एवं कथयन्ति -

**सुप्रसन्नपदन्यासः सर्वथौचित्यसंश्रितः ।**
**प्रतिभोत्थः स सोऽर्थश्चाऽनवद्यः पद्यसञ्चयः।।**[19] (चारुदेवशास्त्री)

**वाणीं वीणामिव मधुमुचं तान् दिशन्तीं वसन्ता -**
**दन्यः को वा सुकविरधुना भूतले सन्दधीत।।**[20] (रेवाप्रसादद्विवेदी)

**ओघः कोऽपि सरस्वत्याः अमोघोऽत्र विलोक्यते।**
**स्वयम्भूरुत्थितः स्वस्मादुद्गच्छन् प्राणवानिव।।**[21]
(नारायणशास्त्री खिस्ते)

**प्रतिशब्दं दधात्येषा शोभनं भावसौरभम्।**
**रमणीयं रसस्रोतः प्रवहच्च निरन्तरम्।।**[22] (बदरीनाथशुक्लः)

**स्वादीयसीं काव्यकलां यदीयां**
**स्वच्छन्दमास्वादयतां जनानाम्।**
**पीयूषमासीदिति यूषसाम्यं**
**नेष्टा शरच्चन्द्रसिताऽसिताऽपि।।**[23]

एवं कविवराणां शास्त्रसंस्कारसमुत्तेजिता शैली जनानां चित्तमपहरति ।

## सन्दर्भाः

1. वि.वा.म. निवेदनम् श्लो.क्र. ९
2. वि.वा.म. निवेदनम् श्लो.क्र. ८
3. काव्य.सू. १/२/७, ८
4. सा.द. ९/१
5. काव्य.मी. अ. ३. काव्यपुरुषोत्पत्तिः
6. काव्य.सू. २/११, १२, १३
7. काव्य.सू. २/१०
8. सा.द. ९/२
9. काव्य. सू. २/११
10. काव्य. सू. २/२१
11. काव्य. सू. २/११
12. वि.वा.म. सर्गः १/८

13. शु.व.म. सर्गः ४/५४
14. स्तवम. नि. श्लो.क्र. ५७
15. अ.मे.पू.मे. श्लो.क्र. ४६
16. मो.जा.च. श्लो. ५
17. रघु.च १/२३
18. दे.दे.म. सर्गः ६/८९
19. अ.मे. प्रशस्तिपत्रम् ५७
20. अ.मे.संस्तवः श्लो.क्र. १
21. वृ.म.वि.अ. श्लो.क्र. ७
22. वृ.म.वि.अ. श्लो.क्र. ३
23. वृ.म.वि.अ. श्लो.क्र. ३

## आधारग्रन्थाः

१) काव्यालङ्कारसूत्रवृत्तिः - चौखम्बा-सुरभारती-प्रकाशन, वाराणसी
२) काव्यमीमांसा - चौखम्बा-सुरभारती-प्रकाशन, वाराणसी
३) साहित्यदर्पणः - चौखम्बा-संस्कृत-संस्थान, वाराणसी

□□□

# रघुवंशोक्तराजधर्माणां प्रासङ्गिकता

*मञ्जुनाथ भट्ट*
*(शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

लोकेऽस्मिन् तत्त्वं लुलोकिषवो महर्षयः सत्यालोकलोकनाय ऐहिकामुष्मिकसुख-विधायकं धर्माभिधेयमयनमेकं प्रादर्शयन्। तेन प्रवर्तितो लोकः तत्त्वं विलोकयति सुखं भुङ्क्ते पापाच्च प्रमुच्यते। तथा च श्रुतिः - '**धर्मो विश्वस्य जगतः प्रतिष्ठा। लोके धर्मिष्ठं प्रजा उपसर्पन्ति। धर्मेण पापमपनुदति.....**'[१] इति।

कोऽयं धर्मः? इति जिज्ञासायां लक्षणकरणपटवो विद्वांसः धर्मलक्षणम् अनेकधा प्रतिपादयामासुः '**चोदनालक्षणार्थो धर्मः**[२], **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः**[३], **धारणाद्धर्मः**[४]' इति। आत्मना क्रियमाणानि कर्तव्यानि लोकहितानि अपि च ऐहिकामुष्मिकसुखप्राप्तिसाधनानि भवन्ति चेत् स धर्म इति फलितोऽर्थः।

यद्यपि श्रद्धया देयम् अश्रद्धया अदेयम् इत्यादिवेदवाक्यानि धर्मादिशास्त्राणि वराहादिपुराणानि मनुस्मृत्यादिग्रन्थकदम्बकानि च अयं धर्मः अयमधर्म इति धर्मविषये विशदं प्रत्यपादयन्। तथापि काव्ये तैः प्रतिपादित एव विषयः सुमधुरैः वर्णविन्यासैः गुणपुरस्कारैः दोषतिरस्कारैश्च सालङ्कृतार्थच्छायाभिः सुगमरीत्या दुर्गममार्गगमन-शक्तिसम्पादनेन सद्य एव निर्वृतिजनकसुखैकफलकनवरसगर्भितवाक्प्रसूनैः विकसन् पाठकान् झटित्यानन्दसागरे निमज्जयतीति तु विशेषः। न केवलमानन्दसन्ततिम् अपि तु अनाघ्रातशास्त्राणामपि स्वात्मन्यनवरतरतानां काव्यास्वादास्वादनलोलुपानां कर्तव्यकर्मणां जाग्रतिं सोल्लासं समुत्पादयद्राराजते काव्यकोरकम्।

तस्मात् कविकुलगुरुः कालिदासोऽपि कान्तासम्मितमाश्रित्य कथनं नितान्तकान्तमिति मन्वानः स्वोदितकाव्यनिकरेषु सच्छोभितराष्ट्रनिर्माणाय धर्म्यानेव विषयान् सुष्ठु प्रत्यपादयत्।

**'सर्वस्य जीवलोकस्य राजधर्मः परायणम्'**[५] इत्युक्तत्वात् प्रकल्पितानां चतुर्णामपि वर्णानां व्यवस्थापनाय कर्तव्यज्ञापनाय च राज्ञः प्रभुत्वाच्च रघुवंशमहाकाव्ये आसमाप्तिं राजधर्मानेव न्यरूपयत् कालिदासः।

पुरा बहुत्र राजतन्त्रमेवासीत्। वर्णाश्रमाणां पालनं राज्ञः कर्तव्यमासीत्। श्रूयते च -

**स्वे स्वे धर्मे निविष्टानां सर्वेषामानुपूर्वशः।**
**वर्णानामाश्रमाणाञ्च राजा सृष्टोऽभिरक्षिता।।**[६] इति।

पुरा एतादृशी भावना आसीत् धर्मप्रभुः राजा एव प्रत्यक्षदेवता इति। धर्मादभिन्नः राजा प्रजाः धारयते देशं निर्माति च। राज्ञोऽभावे प्रजाः कुमार्गे पतन्ति देशश्च अधोगतिम् आप्नोति। राज्ञो नियन्त्रणेन एव जनाः सन्मार्गगामिनो भवन्ति। देशश्चाभिवृद्धिं याति। तन्नाम प्रशासनं सुष्ठु स्यादित्यर्थः। प्रशासनधर्माणां योग्यतायां प्रशासनमपि सुष्ठु भवति। तस्मात्कालिदासो योग्यप्रशासनाय प्रशासकस्य राज्ञः धर्मान् सुष्ठु प्रत्यपादयत्। सोऽपि वदति वर्णाश्रमपालनाय राजाऽजायतेति।[७] किन्तु साम्प्रतं विश्वे राजप्रभुत्वं न दृश्यते। तथापि विश्वे राजप्रभुत्वाभावेऽपि प्रशासनोद्देश्यानां साम्यात् प्रजाप्रभुत्वेऽपि देशाभिवृद्धि- साधकाः राजतन्त्रधर्माः प्रशासनायोपकुर्वन्तीति तु निश्चप्रचम्। तदत्र किञ्चित्प्रस्तूयते।

**प्रजारक्षणम् -**

**'राजा प्रकृतिरञ्जनात्**[८]**, क्षतात् किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः। राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा।।**[९] **प्रजानां विनयाधानात् रक्षणाद्भरणादपि। स पिता पितरस्तासां केवलं जन्महेतवः।।**[१०] इत्यादिभिः पद्यैः राज्ञां प्रजापालनमेव आद्यं कर्तव्यम् इति कालिदासः वावदीति।

प्रजानां शिक्षणान्नपानाभयदानादिना प्रशासकः प्रजाः पालयेत्। तदैव प्रजाः स्वकर्तव्यनिर्वहणक्षमा भवन्ति। प्रशासनकार्यमपि सिद्ध्यति। भारते दारिद्र्यात्सत्स्वपि योजनाशतेषु अभिवृद्धिः न भवति। कालिदासोक्तप्रकारेण[११] प्रशासको लोभं परित्यज्य प्रजाहिताय प्रयतते चेद् दारिद्र्यनिर्मूलनम् भवति।

**शिक्षणे पाठ्यविषयशोधनापेक्षा -**

प्रजानां शिक्षणदानं राजधर्म इति कालिदासो वदति।[१२] समाजेऽद्य योग्यशिक्षणाभावात् सर्वत्राशान्तिरेव दरीदृश्यते। शिक्षणमद्य छात्रासु नैतिकतां विधेयताञ्च नोत्पादयति। किन्तु प्रजानां प्रज्ञादायिका विधेयतोपपादिका च विद्या विधेयेति कालिदासोऽब्रवीत्।[१३] तन्नाम प्रजानां नैतिकशिक्षणं प्रदेयमिति। विश्वविद्यालय-शिक्षासमितेः (University Education Commission) अध्यक्षाः डा.एस्.राधाकृष्णन् महोदयाः अवोचन् 'धार्मिकशिक्षणस्य नैतिकशिक्षणस्य चाभावे शिक्षणोद्देश्यानां पूरणे शिक्षणव्यवस्था न क्षमते' इति।[१४] शिक्षणं शमदमधृत्यहिंसापरोपकारादिगुणसम्पादकं स्वकर्तव्यबोधकञ्च स्यात्। शिक्षणेनानेन समाजस्योन्नतिः आत्मनः प्रोन्नतिश्च सिद्ध्यति। तदा एव मानवो जीवनसाफल्यं भजते। यथा राजतन्त्रे प्रजानां नैतिकशिक्षणं प्रदीयते स्म। तद्वदद्यापि प्रजातन्त्रे नैतिकशिक्षणमपेक्ष्यते।

**भयनिवारणम् -**

देशेऽद्य सर्वत्र भयस्य वातावरणं विद्यते। क्वचिदतिवृष्टिः क्वचिदनावृष्टिः कुत्रचित्प्रवाहः कुतश्चिज्झञ्झावातः कम्पनं दाहश्चेत्यादिभिरनर्थैः जनाः स्वकर्तव्येऽप्यनुत्सुकाः दृश्यन्ते। चोरवञ्चकाधिकारिणामट्टहासाज्जनाः मुक्तहासाः वर्तन्ते। अल्-खैदा लष्करि-ए-तोयिभा जैष्-ए-मोहमद् इत्यादीनि भयोत्पादनसङ्घटनानि दिने दिने वर्धमानानि वर्तन्ते। एवं भयमद्य विश्वमेव व्याप्तं वर्तते।

भयं क्वचित्प्राणिनां प्रवृत्तिं रुणद्धि। क्वचिच्चानुचितकार्येषु प्रवर्तयति। भयं सामर्थ्यं क्षिणोति उत्साहञ्च नाशयति। रोगभीरुः भोगादपि निवर्तते। प्राणभीरुः धर्मादपि प्रच्यवते। दण्डभयात्कर्तव्यमग्नाः प्रजाः जीवभयादद्य कर्तव्यमपि विस्मरन्ति। दण्डेभ्योऽपि न बिभ्यति। भयात्प्राज्ञस्य प्रज्ञा प्रक्षीयते। भयाज्जनोऽनुचितनिर्णयं युक्तं मनुते। भयमेवं सर्वार्थानां कारणं भवति। तस्मात्तस्य नियन्त्रणापेक्षा विद्यते। सर्वकारः एतेषां नियन्त्रणाय आन्तरिकरक्षणानियमः (MISA) राष्ट्रियरक्षणनियमः (NSA) टाडा चेत्यादीन् बहून् नियमान् अङ्गीचकरोत्। किन्तु एतेषां सफलतायै प्रयत्नः करणीयो वर्तते।

प्रजानां भयनिवारणं राजधर्म इति कालिदासोऽब्रवीत्।[१५] रघुवंशदृशा दैवीभयं मानुषीभयञ्चेति भयं द्विधेति ज्ञायते। उभस्यापि निर्मूलनं ब्रह्मतेजसा शक्यमिति कालिदासो न्यरूपयत्।[१६] तपस्विनां तपोबलैर्जन्तुषु सात्विकभावना उदेति। भावनेयं तेषु दुर्विचारान् नियन्त्रयति। परस्परद्वेषासूयादिकं नियम्य स्नेहपरोपकारादिभ्यः प्रेरयति। तपस्विभिः क्रियमाणयज्ञाद्यनुष्ठानैः प्रकृतिवैपरीत्यादीनामपि नियन्त्रणं भवति। तेन जनानां शत्रुभयं प्रकृतिविकोपभयञ्च न भवति। साम्प्रतं समाजेऽपि दैवीविपदः परिहाराय यज्ञादीनामनुष्ठानं मानुषीविपदः निवारणाय सात्विकभावनायाः जागरणञ्चानिवार्यं वर्तते। तस्मात्सर्वकारः सात्विकवातावरणनिर्माणाय सात्विकतोत्पादकधार्मिकसङ्घटनानि प्रोत्साहयेत्। तेषां कार्यक्रमाणां साफल्याय सहयोगं दद्यात्।

इत्थञ्चाद्यापि समाजे उचितशिक्षणेन दण्डकाठिण्येन यज्ञाचरणेन सात्विकभावनाजागरणेन च भयनिर्मूलनं शक्यं वर्तते।

**पर्यावरणसंरक्षणम् -**

प्रतिदिनं प्रवर्धमानाः मानवाकाङ्क्षाः सम्पूर्योपकरोति प्रकृतिः। मानवो वस्त्रान्नपानादिनित्योपयोगिवस्तूनि सुगन्धद्रव्यादिविलाससाधनानि च पर्यावरणादेव सञ्चिनोति। तस्माद् अद्य मानवाकाङ्क्षाणां सम्पूरणाय देशाभिवृद्धये च पर्यावरणसंरक्षणमनिवार्यं वर्तते। प्रजापर्यावरणयोः भावनात्मकं बन्धं न्यरूपयत्।[१७] वृक्षाणां वन्यजीविनाञ्च मानवभावनास्पन्दनमचित्रयत्।[१८] पितरौ यथा पुत्ररक्षणे पोषणे चिन्तयतस्तद्वत्सस्यसंवर्धनेऽपि चिन्तयेतामिति स आदिशति। यदि जनेषु एतादृशी भावना उदेति तदा निश्चयेन पर्यावरणं संरक्ष्यते। तस्मात्प्रशासकोऽद्यापि प्रजासु सद्भावनायाः जागरणाय प्रयतेत। प्रजानां पर्यावरणे ममत्वभावना समुत्पद्येत। यदि भावना दृढीयसी तर्हि प्रकृतिः सन्त्रायते संवर्धते च। तस्मात् पर्यावरणरक्षणजागरणप्रासङ्गिकता दरीदृश्यते।

**यज्ञाचरणम्**

भगवानादिशति यथा -

**यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत्।**
**यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।**[१९] इति।

तस्मान्मानवपावनोऽध्वरः साम्प्रतं समाजेऽप्यनुष्ठेय एव। सर्वं सार्वकालिकं सर्वप्रयोजनञ्चेति विज्ञाय कालिदासोऽपि यज्ञं प्रशासककार्येष्वन्यतमं मनुते।[२०] किन्तु समाजेऽद्य लोकशासकाः लोककल्याणाय यागं नाचरन्ति। नैव प्रोत्साहयन्ति च।

समाजेऽद्य सर्वत्र कलुषितं वातावरणं दृश्यते। जनाः प्रतिदिनमविदित-स्वरूपैरनगदैश्च गदैः पीड्यन्ते। परिसरमालिन्यात्तेऽल्पायुषो वर्तन्ते। प्रकृतेर्वैपरीत्यं देशाभिवृद्धिं रुणद्धि। सर्वंसहाऽपि मानवप्रवृत्तिं न सहते। विविधरोगवशात्कृषिकार्यमपि वैफल्यं याति। एतासां सर्वासां समास्यानां परिहारोपायो यज्ञ एव भवति। सर्वकारस्यानास्थावशात् प्रजानां दारिद्र्याच्च सम्प्रति देशे यज्ञाचरणं न दृश्यते।

किमर्थं कालिदासस्य यज्ञाचरणे तावानादर इति चेत् स एव वदति। यथा -

**अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान्।**
**पुनानं पवनोद्धूतैर्धूमैराहुतिगन्धिभिः।।**[२१] इति।

कविरत्र आश्रमस्य पावनसामर्थ्यं यज्ञाद्भवतीति वदति। यज्ञो मानवं परिसरञ्च पुनाति। एतत्तु वैज्ञानिकप्रयोगैरपि सिद्धं वर्तते।

अमेरिकादेशेऽग्निहोत्रविश्वविद्यालये कृतस्य यज्ञपरीक्षणस्य सारांशः १९९१ तमे वर्षे जुलाई मासे ७ दिनाङ्के सार्वदेशिके प्रकटितमासीत्। तत्तु संस्कृतवाङ्मये कृषिविज्ञानमिति पुस्तके उदलिख्यत। तदनुसारं वाशिङ्गटन् मध्ये सस्यानामुपरि यज्ञप्रभावं परीक्ष्यैवं निरणायि। रासायनिककीटनाशकादीनामपेक्षया मन्त्रसहकृत-घृताहुतिभिः सर्वरोगनाशनं पोषणञ्च शक्यते। पर्यावरणशुद्धिः सस्यसमृद्धिश्च यज्ञात्सिद्ध्यति यज्ञप्रभावात् सस्यमूलपर्यन्तमार्द्रतासंरक्षणमधिं भवति। एको यज्ञः २०० एकडयावत् क्षेत्रस्य सस्यस्वरूपपरिवर्तते क्षमो भवति। यज्ञधूमो ८ किलोमीटर् पर्यन्तं पर्यावरणं शोधयतीति।[२२] एवं बहुप्रयोजनो यज्ञः समाजे साम्प्रतमपि अपेक्ष्यते।

इत्थञ्च रघुवंशे सरसवचोभिः प्रतिपादिताः बहवो राजधर्माः अद्यतनसमाजे उपयोगितां व्रजन्तीत्यत्र नास्ति संशीतिः।

## सन्दर्भाः


१. तैत्तिरीयब्राह्मणम्, १०.६३
२. जैमिनिसूत्रम्, १.१.२
३. वैशेषिकदर्शनम्, १.१.२
४. महाभारतं कर्णपर्व, ६९.५८
५. महाभारतं शान्तिपर्व, ५६.३
६. मनुस्मृतिः, ७.३५
७. रघुवंशम्, १४.६७
८.रघुवंशम्, ४.१२
९. रघुवंशम्, २.५३
१०. रघुवंशम्, १.२४
११. रघुवंशम्, १४.२३
१२. रघुवंशम्, १.२४
१३. रघुवंशम्, १०.७१
१४. Dr. S.Radhakrishnan, Occasional speeches and writings, 241 p
१५. रघुवंशम्, १.२४
१६. रघुवंशम्, १.६१-६३
१७. रघुवंशम्, २.३६, १४.७८
१८. रघुवंशम्, १४.६९
१९. भगवद्गीता, १८.१५
२०. रघुवंशम्, ४.८६
२१. रघुवंशम्, १.५३
२२. संस्कृतवाङ्मये कृषिविज्ञानम्, पृ.१४


## सन्दर्भग्रन्थसूची


१. रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००८
२. महाभारतम्, ओरियन्टल बुक्स् रिप्रिन्ट कारपोरेशन्, १९७९
३. जैमिनिसूत्रम्, चौखम्बा विद्याभवन, वाराणसी, २००३
४. भगवद्गीता, गीता प्रेस्, गोरखपुर, २००७
५. संस्कृतवाङ्मये कृषिविज्ञानम्, शेमवाल श्रीकृष्णः, दिल्ली संस्कृत अकाडमी, दिल्ली, १९९९
६. मनुस्मृतिः, श्रीकुल्लूकभट्टविरचितया मन्वर्थमुक्तावल्या व्याख्यया समुपेता, मोतीलाल बनारसीदास, दिल्ली
७. तैत्तिरीयब्राह्मणम्, मोतीलाल बनारसीदास, दिल्ली, १९८५
८. Dr. S.Radhakrishnan, Occasional speeches and writings, The Publication Division, Delhi, 1957


□□□

# संस्कृतभाषाशिक्षणक्षेत्रे संस्कृतशिक्षकैः अनुभूयमानाः शैक्षिकसमस्याः तासां निराकरणोपायाश्च

*रञ्जन कुमार दाश*
*(शोधछात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

संसारेऽस्मिन् या भाषा शुद्धा, परिष्कृता,परिमार्जिता, रुचिपूर्णा, सरला, मधुरा, श्रुतिसौम्या च भवति सा भाषा सर्वैः समाद्रियते। चिरकालपर्यन्तं सैव भाषा जनानां हृदि राजते। विज्ञानक्षेत्रे, सामाजिकोन्नयने, राजनैतिकक्षेत्रे अर्थोपार्जने च यस्याः भाषायाः योगदानं यावदधिकं भवति, तावदेव तस्याः भाषायाः विकासः सञ्जायते, जनाश्च तया भाषया एव उपकृताः भवन्ति। निखिले महीतलेऽस्मिन् तस्याः भाषायाः एव महत्त्वं प्रसारितं भवति।

भारतीय भाषासु प्राचीनतमा भाषा भवति संस्कृतभाषा। भाषेयं सर्वविधसाहित्यशास्त्रसमन्विता सर्वासां भाषाणां जननी च अस्ति। लोकेऽस्मिन् भाषाशिक्षणं सार्वभौमम्, सार्वकालिकम्, शाश्वतिकं च विद्यते। आदौ शिशुः स्वमातुः सकाशात् भाषामधिगच्छति। या भाषा मानवानां सर्वविधविकासं संसाधयति, यस्मिन् देशे भाषा समृद्धा विकसिता च भवति, तत्रत्य जनाः अपि समृद्धाः विकसिताश्च भवन्ति। संस्कृतम् एतादृशी एका भाषा अस्ति यस्याः समाश्रयेण भारतीयेतराः भाषाः विकासपथि अग्रेसरन्ति। परिवारे पारिवारिकजनैः, समाजे समाजिकैः अनौपचारिकरूपेण, विद्यालयमहाविद्यालयादिषु औपचारिकरूपेण भाषाशिक्षणं सम्पाद्यते। वैज्ञानिकयुगेऽस्मिन् सूचनानामादानप्रदानाय यद्यपि बहूनि संसाधनानि समुपलभ्यन्ते तथापि भाषा एव सर्वप्रमुखसाधनत्वेन राजते। सर्वेषामपि कलाविज्ञानदर्शनयान्त्रिकज्ञानानां लिखतरूपसम्पादनाय मौखिकसम्प्रेषणाय च भाषैव

समर्था। अतः शिक्षायाः सर्वेषु क्षेत्रेषु भाषाशिक्षणं नितरामपेक्षते। संस्कृतभाषाशिक्षणक्षेत्रे संस्कृतशिक्षकानां प्राधान्यता विद्यते। संस्कृतशिक्षकाः विद्यालयेषु संस्कृतभाषां पाठयन्ति। अधुनातनकाले संस्कृतभाषाशिक्षणस्य परिवर्धनार्थं संस्कृतशिक्षकैः बह्व्यः समस्याः अनुभूयन्ते। यथा - सामाजिकसमस्याः, शैक्षिकसमस्याः, आर्थिकसमस्याः, व्यावसायिकसमस्याश्च। संस्कृतभाषाशिक्षणक्षेत्रे संस्कृतशिक्षकैः अनुभूयमानासु समस्यासु शैक्षिकसमस्याः अन्यतमाः। शैक्षिकसमस्यानां वर्णनं प्रसङ्गानुसारम् अधः प्रस्तूयन्ते।

**शैक्षिकसमस्याः -**

**१. निश्चितपाठ्यक्रमस्य परिशीलनम्**

संस्कृतभाषाशिक्षणक्षेत्रे विविधानां कक्ष्याणां कृते निश्चितपाठ्यक्रमपरिशीलनेन संस्कृतशिक्षकाः पाठयन्ति। अनेन शिक्षणं सीमितज्ञानयुक्तं भवति। पाठ्यक्रममतिरिच्य अन्यं कञ्चन विषयं बोधयितुं संस्कृतशिक्षकाः असमर्थाः भवन्ति।

**२. भाषाकौशलविषयकसमस्या वा अविकसितभाषाकौशलस्य प्रदर्शनम्**

मुख्यतया भाषायाः चत्वारि कौशलानि वर्तन्ते। यथा - श्रवणम्, भाषणम्, लेखनम्, पठनञ्चेति। कस्याः अपि भाषायाः शिक्षणे एतानि चत्वारि कौशलानि महत्त्वपूर्णानि सन्ति। पाठ्यक्रमे एतेषां कौशलानां समन्वितस्वरूपं स्यात्। एतेषां कौशलानां विकासे पाठ्यक्रमे विविधताः न दृश्यते येन भाषाविषये शिक्षकाः छात्राश्च पूर्णम् अधिकारं न प्राप्नुवन्ति।

**३. विद्यालयीयपाठ्यक्रमेण सह संस्कृतशिक्षकैः अधीतपाठ्यक्रमस्य भिन्नता**

प्रायः विद्यालयीय पाठ्यक्रमाः सुविस्तृतः, शिक्षकैः अधीतपाठ्यक्रमात् नितरां भिन्नाः भवन्ति। केचन शिक्षकाः अस्मिन् पाठ्यक्रमविषये अनभिज्ञताः प्रदर्शयन्ति, अध्यापने क्लेशं च अनुभवन्ति।

**४. कण्ठस्थीकरणस्योपरि प्राधान्यम्**

सर्वे संस्कृतशिक्षकाः छात्राश्च संस्कृतविषयाः क्लिष्टाः इति कथयन्ति।

कण्ठस्थीकरणेन विना संस्कृतभाषाया: ज्ञानं न भवति इति एतेषाम् अभिप्राय:। अत: अध्यापन सन्दर्भे छात्रा: अध्यापकै: पाठ्यविषयं कण्ठस्थीकरणाय निर्देशिता: भवन्ति, परीक्षां विलिख्य अध्यापनं कार्यं समापयन्ति। अत्र केवलं कण्ठस्थीकरणस्योपरि प्राधान्यं दीयते।

**५. केवलं व्याख्यानमाध्यमेन अध्यापितज्ञानस्य संक्रमणम्**

अध्यापनसमये अध्यापका: शिक्षका: वा कथावाचकरुपेण विस्तृतव्याख्यानेन विषयं बोधयन्ति। परन्तु व्याख्यानसमये व्याकरणांशा: एतै: सम्यक्तया नोपस्थाप्यन्ते। छात्रा: अपि यथा कथञ्चित् श्रोतृरुपेण अध्यापकवाचनं शृत्वा उपाधिं प्राप्नुवन्ति।

**६. विद्यालयीय पाठ्यक्रमविषये अनभिज्ञता**

प्रशिक्षणसमये विद्यालयीयपाठ्यक्रमे न केवलं छात्रा: अपि तु अध्यापका: अपि पूर्णतया परिचिता: न भवन्ति। तस्मात् कक्ष्यायां किं पाठनीयमित्यस्मिन् विषये ज्ञानम् न जायते। कदाचित् पाठ्यक्रमात् भिन्नं पाठ्यांशं कक्ष्यायाम् उपस्थाप्य निश्चितशैक्षिकोद्देश्यं प्राप्तये ते असमर्था: प्रतीयन्ते।

**७. पाठनसमये कुञ्चिकाया: अनुसरणम्**

सम्प्रति बहुषु विद्यालयेषु शिक्षका: कुञ्चिकाम्, मार्गोपदेशीकाम् अनुसरन्त: अध्यापयन्ति। मूलपाठ्यविषयं विस्मृत्य केवलं कुञ्चिका सहायेन पाठनेन तेषाम् अध्यापकानां शिक्षकानां वा पुस्तकपठनक्षमता ह्रियमाण: दृश्यते।

**८. रुचिहीनपाठ्यक्रमाणाम् उपयोग:**

संस्कृतभाषाया: पाठ्यक्रम: अत्यन्तं सरस:, सुबोध: रुचिपूर्णश्च भवति। संस्कृतशिक्षाक्षेत्रे पारम्परिकधारायाम् - आधुनिकधारायाञ्च एकस्यैव स्तरस्य पाठ्यक्रमे भिन्नता परिदृश्यते। तत्र कुत्रचित् पाठ्यविषय: छात्राणां कृते उपयोगी रुचिपूर्णश्च न भवति। अत: एतादृशपाठ्यक्रमस्य अध्यापने अपि अध्यापका: शिक्षका: वा रुचिं न

प्रदर्शयन्ति। समयानुकुलं पाठ्यक्रमेषु परिवर्तनक्षमता अपि अध्यापकेषु न दृश्यते।

**९. सामाजिकसमस्यानां समाधाने पाठ्यक्रमस्य अनुपयोगिता**

शिक्षाया: सर्वप्रमुखमुद्देश्यं भवति सामाजिकपरिपूर्णताया: प्राप्ति:। य: पाठ्यविषय: सामाजिकेषु व्यक्तिषु परिवर्तनमानेतुं न शक्नोति स: विषय: मूल्यहीन:। अत: संस्कृतशिक्षा क्षेत्रस्य पाठ्यक्रमोऽपि एतादृश: स्यात् येन सामाजिकसमस्या: स्वत: दूरीभूता: भवेयु:, शिक्षका: अपि एतादृशं पाठ्यक्रमं पाठयितुं रुचिं प्रदर्शयेयु:।

**१०. अध्यापने अमनोवैज्ञानिकविधीनां चयनम्**

संस्कृतशिक्षणे शिक्षणविधय: प्रमुखं स्थानम् आवहन्ति। मुख्यत: संस्कृतशिक्षणं प्रभावोत्पादकम्, सरलम्, रुचिपूर्णञ्च विधातुमं अध्यापकै: य: मार्ग: आश्रीयते स एव विधि: इति नाम्ना अभिधीयते। परन्तु अत्र शिक्षणे पाठ्यविषयानुकूलं छात्रस्तरानुगुणञ्च अध्यापका: उपयुक्तविधीनां चयने असमर्था: भवन्ति। अत: छात्रेषु पाठ्यक्रमस्य स्थानान्तरणं कर्तुं न शक्नुवन्ति।

**११. शैक्षिकमूल्याङ्कनस्य समस्या**

संस्कृतभाषाशिक्षणक्षेत्रे अपि मूल्याङ्कनं महत्त्वपूर्णं स्थानम् अधीकरोति। शैक्षिकमूल्याङ्कनस्य समस्या इत्युक्ते छात्राणां शैक्षिकयोग्यता आकांक्षा क्षमतादीनाम् उचितमूल्याङ्कनं न भवति इत्येव। बहव: संस्कृतविद्यालया: आवासीया:, केचनविद्यालयास्तु आधुनिकशिक्षाप्रणालीवत् प्रचलिता वर्तन्ते। समानविषयस्य मूल्याङ्कने एतेषां विद्यालयानां मध्ये बहु भिन्नता अबलोक्यते।

**शैक्षिकसमस्यानां निराकरणोपाया:**

१. अध्यापनसन्दर्भे अध्यापकै: न केवलं निश्चित: पाठ्यक्रम: अवलम्बनीय: अपि तु पाठ्यक्रमसम्बन्धिताविषया: अपि परिशीलनीया:।

२. पाठ्यक्रमेषु श्रवण-लेखन-भाषण-पठनमित्यादीनां चतुर्णां कौशलानां समन्वितं स्वरुपं परिकल्पयितुं संस्कृतशिक्षकै: प्रयत्न: करणीय:।

३. यद्यपि विद्यालयीयपाठ्यविषयेण सह अध्यापकैः अधीतः विषयः समानतां न विधत्ते तथापि निरन्तरं स्वाध्यायद्वारा पाठ्यक्रमविषयम् अधिगन्तुम् अध्यापकाः उत्सुकाः भवेयुः।

४. इदानीं शिक्षाव्यवस्थायां कण्ठस्थीकरणस्योपरि बलं न दातव्यम्। विविधैः भाषाक्रीडा, अन्ताक्षरीत्यादीभिः उपायैः विषयं स्मर्तुं छात्राः प्रेरणीयाः।

५. व्याख्यानसमये अध्यापकः न केवलं व्याख्यानं कुर्यात् अपि तु कक्ष्यान्तः क्रियाद्वारा शिक्षणे भागग्रहितुं छात्रेभ्यो निर्देशं दद्यात्।

६. शैक्षिकवर्षस्य प्रारम्भात् एव शिक्षकाः छात्राश्च स्वपाठ्यक्रमविषये अवगताः स्युः।

७. अध्यापनसन्दर्भे कुञ्चिकायाः मार्गोपदेशिकायाः वा अवलम्बनम् अध्यापकैः न करणीयम्। सर्वदा मूलविषयम् आश्रित्य अध्यापनाय अध्यापकाः प्रयत्नशीलाः भवेयुः। केषुचित् विशेषपरिस्थितिषु कुञ्चिकायाः उपयोगः कर्तुं शक्यते।

८. छात्राणां कृते निर्मितः पाठ्यक्रमः यथा रुचिपूर्णाः छात्रमनोविनोदकारकश्च भवेत् तथा प्रयासः करणीयः।

९. सामाजिक-आवश्यकतानुगुणं पाठ्यक्रमः सभ्यता-संस्कृति-आचार-विचार-सद्व्यवहारादिषु विषयेषु परिपूर्णः स्यात्।

१०. सम्प्रति शिक्षाव्यवस्थायां विषयानुकुलं विधीनां चयने अध्यापकाः प्रयत्नशीलाः भवेयुः।

११. संस्कृतभाषाशिक्षणक्षेत्रे मूल्याङ्कनमपि पक्षपातपूर्णं न स्यात् येन छात्राणां प्रगतिं ज्ञातुम् अध्यापकाः शिक्षकाः वा समर्थाः भविष्यन्ति, आवश्यकतानुगुणं शैक्षिकोन्नतिं साधयितुं चेष्टन्ते च।

**उपसंहारः**

इत्थमत्र उपर्युक्तवर्णनागुणं संस्कृतभाषाशिक्षणक्षेत्रे संस्कृतशिक्षकैः एते उपायाः अवलम्ब्यते चेत् तेषां सर्वाः शैक्षिकसमस्याः स्वतः दूरीभूताः भविष्यन्ति, निश्चित-

शैक्षिकोद्देश्यप्राप्तये च ते उत्साहं प्रदर्शयिष्यन्ति।

## परिशीलितग्रन्थसूची

१. संस्कृतशिक्षणम् ,डॉ. सन्तोष मित्तल् , नवचेतना पब्लिकेषन्स्,जयपुरम्, २००६

२. संस्कृताध्यापनम्, डॉ.नलचक्रवर्तिः कनाल, वेङ्कटाम्बा पब्लिकेषन्स्, तिरुपतिः, १९९६.

३. संस्कृतशिक्षणम्- नवीनप्रविधयश्च, प्रो.च.ल.ना.शर्मा, डॉ. फतेह सिंह, आदित्यप्रकाशनम्, जयपुरम्, २००८

४. संस्कृतशिक्षणम्, रामशकलपाण्डेयः, विनोदपुस्तकमन्दिर, १९९३

५. हिन्दीशिक्षणम् , सावित्रीसिंहः।

६. अध्यापकशिक्षा, डॉ. जी.सी.भट्टाचार्यः, विनोदपुस्तकमन्दिर, आग्रा - २, २००३

□□□

# भारतीयप्राचीनाधिगमप्रणाली

**(Ancient Learning System of India)**

*ई. वेङ्कटेश्वर्लु*

*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

भास्वरेऽस्मिन् संसारे अनेके जीवराशयो जीवन्ति तत्र विनाऽधिगमं न कोऽपि चरत्यस्मिन् जगतीतले । प्राणिमात्रस्य व्यवहारः अधिगमेनैव जायते इत्यत्र नास्ति कुत्रापि विसंवादः। अतः अधिगमः सर्वदा सर्वत्र च स्वमहन्महत्त्वं धत्ते। यतो हि सर्वे जीविनः जन्मारभ्य मृत्युपर्यन्तं किमपि अधिगच्छन्ति । तदनुगुणं व्यवहरन्ति, जीवनं निर्वहन्ति च। अतः मानवमनसि अधिगमविषयकजिज्ञासा प्रबलायते, अयम् अधिगमः मनागत्र विव्रीयते ।

**को नाम अधिगमः ?**

अभ्यासस्य अनुभवस्य वा फलरूपेण व्यवहारे ज्ञाने वा जायमानः प्रायः स्थायि-विपरिणाम एव अधिगमः। अयञ्च विपरिणामः केवलशरीरविकासेन सहजपरिपक्वतया वा न जातः स्यात्। अर्थात् अधिगमो नाम जीवस्य स्वकीयव्यापारेण तद्व्यवहारे ज्ञाने वा जायमानो विकारः विपरिणामो वा ।[१]विशेषाभ्यासफलरूपेण प्रतिक्रियाप्राप्तेः प्रक्रियैव अधिगमः।

**का नाम प्रणाली ?**

कार्यविशेषसम्पादनार्थं समन्वितरूपेण क्रियाकरणाय सुव्यवस्थितानां तत्त्वानां समुदायः प्रणाली।[२]

**का नाम अधिगमप्रणाली ?**

अध्येतुः व्यवहारे ज्ञाने वा स्थिरं परिवर्तनं जनयितुं सुव्यस्थितरूपेण संयोजितानां तत्त्वानां समुदायः अधिगमप्रणाली भवति। यानि तत्त्वानि अधिगमं प्रभावयन्ति तानि सर्वाण्यपि अधिगमप्रणाल्यामन्तर्भावितानि भवन्ति। शिक्षा शिष्याचार्यविषयरूपा त्रिध्रुवी प्रक्रिया इत्याधुनिकानाम्मतम् । परन्तु अस्मदाचार्याः चिन्तयन्ति यत् - **"आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपं विद्या सन्धिः। प्रवचनं सन्धानम्"** इति अर्थात् आचार्यः, शिष्यः, विषयः, विधिश्चेति चतुर्ध्रुवसमन्वितप्रक्रियात्वेन स्वीक्रियते भारतीयप्राचीनाचार्यैः। इमानि चत्वारि प्रधानतत्त्वानि परस्परं सुसमन्वितानि व्यवस्थितानि सन्ति अधिगमप्रक्रियां प्रवर्तयन्ति। एषु प्राधान्येन आचार्यशिष्यसम्बन्धः, अधिगमपद्धत्यः, अध्यापनपद्धत्यः, स्वाध्यायः इतीमे शिष्याधिगमप्रणालीं नितरां प्रभावयन्ति। तानि तत्त्वानि यथा -

**गुरुः**

**गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।**
**गुरुःसाक्षात् परं ब्रह्म तस्मै श्री गुरवे नमः।।**

जीवनसम्बद्धाः अनेकव्यवहाराः विविधसन्दर्भेषु सन्निवेशेषु यादृच्छिकया शिक्षन्ते ते अनुभवगोचराः च भवन्ति। परन्तु शास्त्रं शास्त्रीयविज्ञानं च अधिगन्तुं तु छात्राय गुरोः अपेक्षा अस्ति एव[३]। अपरिपक्वबालकान् परिपक्वान् सम्पादयति गुरुः। अतः समाजे गुरोर्महत्त्वं स्वाभाविकमेव। अज्ञानान्धकारात् निष्कास्य सः ज्ञानं प्रकाशयति। छात्रस्य ज्ञानरूपी प्रदीपः आवरणाच्छन्नो भवति। गुरुस्तदावरणमपनीय प्रकाशयति[४]। गुरुः मातृपितृभ्यामपि आदरणीयो भवति यतो हि मातृपित्रोः सकाशात् केवलं पार्थिवशरीरमेव लभ्यते । किन्तु गुरोः सन्निधौ तस्य सर्वविधविकासो जायते । वैदिककालात् शिष्यः आचार्यस्य मानसपुत्रत्वेन परिगण्यते [५]। संस्कृतव्याकरणग्रन्थे शिक्षादातृभ्यः, शिक्षकः , उपाध्यायः, प्रवक्ता, श्रोत्रियः, अध्यापकः, गुरुः, आचार्यः इत्यादिशब्दाः प्रयुक्ताः। एतादृशस्य गुरुशब्दस्य उत्पत्तिः इत्थं निरूप्यते -

१. गृनिगरणे तुदादि: गिरति गिलति अज्ञानान्धकारम् इति गुरुः।
२. गृ सेचने भ्वादि: - गरति सिंचति ज्ञानवारिणा शिष्यहृदयक्षेत्रम् इति । गरति सिंचति कर्णयोर्ज्ञानामृतम् इति गुरुः।
३. गृ.विज्ञाने चुरादि : - गीर्यते विज्ञापयति शास्त्ररहस्यम् इति ।
४. गृ शब्दे क्र्यादि : - गृणाति उपदिशति धर्मं ज्ञानं भक्तिं चेति गुरुः।
५. गुरी उद्यमने - गुरते सत्पथे प्रवर्तयति शिष्यम् इति गुरुः।
६. गृ स्तुतौ - गीर्यते स्तूयते महत्त्वाद् इति गुरुः।

एतादृशा: अर्था: गुरुशब्दस्य नामान्तराणि प्रकाशन्ते। प्राचीनाधिगमप्रणाल्यान्तर्गता: एते गुरव: सर्वेऽपि स्व स्व नियमानुगुणं छात्राधिगमं प्रेरयन्ति ज्ञानज्योतिं छात्रेषु प्रकाशयन्ति[६] च ।

**शिष्य :**

भगवता पतञ्जलिना उदात्तं किमपि छात्रलक्षणं प्रतिपाद्य छात्रपरिभाषा लिखिता "छात्रादिभ्यो णः" इत्यस्मिन् सूत्रे । यः छत्रधारणंशीलः स छात्रः अतः राजपुरुषे प्राप्नोति । एवं तर्हि उत्तरपदलोपोऽत्र द्रष्टव्यः। छत्रमिव छत्रं गुरुश्छत्रं गुरुणा शिष्यः छत्रवच्छाद्यः। शिष्येण गुरुः छत्रमिव परिपाल्यः। पतञ्जलिप्रयोक्तयाऽनया परिभाषया शिष्यविषयकाचारोऽपि समुपदिष्टः। भारतीय प्राचीनाधिगमप्रणाल्यां यथा गुरोः प्रकाराः आसन् । तथैव शिष्येषु अपि प्रकाराः विद्यन्ते । यथा शिष्यः, विद्यार्थी, अन्तेवासी, छात्रः, स्नातकः, ब्रह्मचारी इत्यादि नामानि सन्ति तथा च विद्यायाः(शिक्षायाः)अधिगमेऽपि भेदो वर्तते ।

**अन्तेवासी**

"अन्ते गुरुसमीपे वसति तच्छीलः"[७] इति अन्तेवासी शब्दः उपनिषत्सु अधिकं श्रूयते[८]। गुरोः सान्निध्ये वसन् यः विद्याध्ययनम् अकरोत् सः अन्तेवासी इति कथ्यते। एवं एतादृशान्यशब्दैः अपि नाम्ना एव छात्रस्य कर्तव्यं गुणाः- अधिगमविषयस्य निर्देशनम् - अधिगमस्योद्देश्यम् इति सृष्ठुनिर्दिष्टाः सन्ति। तर्हि छात्राधिगमः शिष्याचार्ययोः सत्सम्बन्धेनैव जायते । तद्यथा-

**गुरुशिष्यसम्बन्ध:**

शिक्षाप्रणाल्यां गुरुशिष्यौ प्रमुखस्तम्भायते । तयो: पारस्परिकसम्बन्ध: अधिगमप्रणालीं नितरां प्रभावयति। गुरो: प्रामाणिकता, चारित्र्यम्, निबद्धता, समयपालनमित्यादि श्रेष्ठगुणानां प्रभाव: शिष्यव्यवहारं परिवर्तयितुमलं भवन्ति।

द्वयोस्सम्बन्धस्य पावित्र्यं संरक्षितुं स्मृतिकारै: नैके नियमास्संरचिता: ।

१. ''सहनाववतु......मा विद्विषावहै [९]।''

२. ''अन्तेवासिनं स्वपुत्रवत् स्नेहं कुर्यात्'' [१०] स्वार्थकार्येषु नियोजनान्तेवासिनोऽध्ययनविघ्नं न कार्यं तदुक्तमापस्तम्बेन ''न चैवमध्ययनविघ्नेन आत्मार्थेन्तेषुपरुन्ध्यात् अनापत्सु[११]'' पुत्रमिवैनमभिकाङ्क्षन[१२]।

एतै: ज्ञायते यत् गुरुशिष्ययो: सौहार्दं शिष्यस्य श्रद्धा, मेधा, कृतस्वीकारश्च विद्याप्रदानग्रहणयो: प्राधान्येन आवश्यक इति। ज्ञानात्मक(cognitive) शारीरिकक्रियात्मक (conative) भावात्मक (affective) रूपेण त्रय: आयामा: अधिगमस्य। बाला: ज्ञानात्मकं, शारीरिकक्रियात्मकं, भावात्मकं च प्रशिक्षणं प्राप्नुवन्ति आचार्यसन्निधौ एतत्सर्वं तयोस्सम्बन्धे आत्मीयतापूर्णे सत्येव सिद्ध्यति नान्यथा।

**शिक्षणविधय:**

तत्रादौ को नाम विधि: इत्युक्ते- ''निर्दिष्टो द्देश्यसाधनानुकूलव्यापारावान् उपाय:'' इति विधिलक्षणम्। छात्राधिगमसम्पादनाय अध्यापकेन आश्रित: मार्ग: विधिरित्युच्यते। विधय: द्विधा विभज्यन्ते - १. विक्षणविधय:, २. अधिगमविधय:। चेति आदौ-

**वैदिकशिक्षणविधय:**

वेदा: अपौरुषेया:। अस्माकं शिक्षणपरम्परा श्रुतिपरम्परा एव । तथापि अद्य यावत् सा च वेदपरम्परा प्रचलतीत्युक्ते तत्रोपयुक्ता: शिक्षणविधय: एव कारणम्। स्वरभेदेनैव अर्थभेदो, अनर्थकश्च भवति। तदुक्तम् महाभाष्ये यथा:-

''मन्त्रो हीन: स्वरतो वर्णतो वा मिथ्या प्रयुक्त: न तमर्थमाह। स वाग्वज्रोयजमानां हिनस्ति यथेन्द्रशत्रुस्स्वरतोऽपराधात् [१३]।।

स्वरादिदोषेभ्य: श्रुतिपरम्परा रक्षिता इत्युक्ते तत्रोपयुक्ता:विधय: एवकारणम्। अस्मन्महर्षिभि: दृष्टा: मन्त्रा:गुरुच्चारणानूच्चारणविधिना सस्वरपाठपरम्पराया: संरक्षणार्थं तत्र सम्भाव्यमानदोषान् निवारयितुं च विकृतपाठविधि: स्वीकृत:। तत्र पदद्वयमारभ्य आमन्त्रं विद्यमानपदानां क्रम - व्युत्क्रम - सक्रमपाठविधय: अनुसृता:। एतदुक्तं व्याडिना -

**जटा माला शिखा रेखा ध्वजो दण्डो रथो घन:।**
**अष्टौ विकृतय: प्रोक्ता: क्रमपूर्वा: महर्षिभि:।।**

विस्तरात् तेषां प्रत्येकं लक्षणं न प्रतिपाद्यतेऽत्र।

**शास्त्रशिक्षणविधय:**

स्वशास्त्रे निरूपिता: शास्त्रशिक्षणविधय: । प्राचीनाधिगमप्रणालीं अत्यन्तं प्रभावयन्ति स्म । तत्र संस्कृतशिक्षणे असकृत् श्रूयमाण: विधि: परम्परागतविधि: (Traditional method) नायम् एक: विधि:। अनेकविधीनां समाहार:। अतस्तावत् तदन्तर्भूतानां विधीनां प्रत्येकश: विवेचनं क्रियते ।

**व्याख्यानविधि:**

**पदच्छेद: पदार्थोक्ति: विग्रहो वाक्ययोजना ।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्** [१४] **।।**

अस्य विधिरनुसारं श्लोकस्य पदच्छेदं विधाय,तदनु श्लोकस्थपदानामर्थं विवृत्य, समस्तपदानि विग्रहमाध्यमेन संकथ्य, एकवाक्यरूपेण विषय: प्रतिपाद्यते। ततश्च आक्षिप्तान् प्रश्नान् समादधति शिक्षक:। विधिरयं न केवलं साहित्यशिक्षणार्थम् अपि तु व्याकरणादिशास्त्रशिक्षणेऽपि नितरां प्रयोजनकरो वर्तते।

**सूत्रपद्धति:**

व्याकरणबोधने इतरशास्त्राणां बोधनेऽपि विधिरयं नितरां उपयोगी वर्तते। पाणिनीयव्याकरणम् अनेन विधिना एव पाठ्यते । एवं ब्रह्मसूत्राणि, दर्शनानि च अनेन माध्यनेनैव पाठ्यन्ते।

**निगमनविधि:**

अर्वाचीनमिति कथ्यमानोऽयं विधि: प्राचीन एव । अयं ''लक्षणात् लक्ष्यं प्रति'' इति नियमनुसृत्य भवति । अयं सूत्रपाठने प्राचीनकालादेव उपयुज्यते । कौमुद्यादय: अस्मिन्नेवविधौ पाठ्यन्ते।

**आगमनविधि:**

''लक्ष्यात् लक्षणं प्रति'' इति नियममनुसृत्य विधिरयं प्रचलति। आदौ लक्ष्यं चित्वा तस्य लक्षणमुच्यते । अयं क्रम: पाणिनीयसूत्ररचनायां सृष्ठु अभिज्ञातुं शक्यते। अत: विधिरयमपि प्राचीन: एव।

**वाकोवाक्यपद्धति:**

**उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं विदुर्बुधा:।**
**द्वयोर्वक्त्रो स्तदिच्छन्ति बहूनामपि सङ्गमे ।।**

अस्यैव भाष्यपद्धतिरित्यपि नाम। उक्तिप्रत्युक्तिरूपोऽयं विधि: महाभाष्ये इतरभाष्येषु च उपलभ्यते । छात्राणां तार्किकबौद्धिकविकासे विधिरयं महत्प्रयोजनकारी वर्तते । कठोपनिषदि वाकोवाक्यविधिना तत्त्वविचार: प्रस्तुत:।

**प्रत्यक्षपद्धति:**

छात्रेभ्य: प्रत्यक्षरूपेण अनुभूत: विषय: चिरं तिष्ठिति। अत: आधुनिककाले विधेरस्य महान् उपयोग: क्रियते। विधिरयं नार्वाचीन: अपि तु अत्यन्तं प्राचीन:। सहस्रवर्षेभ्य: विधिरयमध्यापने प्रयुज्यत इत्यत्र उपलभ्यन्ते नैकानि प्रमाणानि ।

**''न्यग्रोधबीजदर्शनेन अणो: महदारम्भकत्वानिरूपणमुखेन एतद्विधिप्रयोग-प्रामाण्यं दर्शयति छान्दोग्योपनिषद् न्यग्रोधफलमद इदं भगव इति''** इत्यादिना।

न केवलमेतावत् अपि तु नैके शिक्षणविधय: प्रयुक्ता: अस्मत्प्राचीनै:। यथा - व्युत्पत्तिविधि: प्रसङ्गविधि: व्याकरणशिक्षणाय पद्यविधि:, काव्यविधि:, नाटकविधि: इत्यादय:।

**अधिगमविधयः (Learning Methods)**

प्राचीनाधिगमप्रणाल्यां न केवलं शिक्षणविधयः प्रोक्ताः अपि च स्वाध्यायार्थमनेके अधिगमविधयः उक्ताः। ते अत्र विमृश्यन्ते। अर्थशास्त्रे कौटिल्येन विद्याप्राप्तये अष्टौ उपायाः प्रोक्ताः ते यथा -''शुश्रूषा-श्रवण-ग्रहण-धारण-विज्ञान-ऊह-अपोह-तत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्[१५]।'' तत्र

शुश्रूषा - श्रवणार्हेषु श्रोतुमिच्छा

श्रवणम् - आसेवा

ग्रहणम् - श्रुतार्थज्ञानम्

धारणम् - गृहीताविस्मरणम्

विज्ञानम् - धारितेष्वर्थेषु साध्यसाधनादि - स्वरूपविवेकज्ञानम्

ऊहः - शब्दानुक्तस्य लिङ्गेनावगतिः

अपोहः - युक्त्युपेतस्य ज्ञानम्

तत्त्वाभिनिवेशः - वस्तुयाथात्म्यज्ञानम् ।

गौतमीशिक्षायां - तथैव बृहदारण्यकोपनिषदि च ज्ञानप्राप्त्यै च त्रयः मार्गाः उपदिष्टाः। यथा ''बृहदारण्यकोपनिषदि मैत्रेयी - याज्ञवल्क्यसंवादे महर्षिः'' यथा **''आत्मा वा अरे द्रष्टव्यः, श्रोतव्यः मन्तव्यः, निदिध्यासितव्यः'' एवं ज्ञानसमुपार्जनार्थं श्रवण-मनन-निदिध्यासनानि प्रोक्तानि।**[१६]

**शिक्षणसूत्राणि**

प्राचीनाधिगमप्रणाली गुरुकेन्द्रिता । आधुनिकाधिगमप्रणाली तु छात्रकेन्द्रिता। तादृशछात्रकेन्द्रिताधिगमप्रणाली शिक्षासिद्धान्तानां, शिक्षणसूत्राणां च आधारेण प्रचलति। यानि पाश्चात्यैः आविष्कृतानि इति तैः कथ्यते अस्माभिः मन्यते च। किन्तु यानि शिक्षणसूत्राणि सम्प्रति सन्ति तानि सर्वाण्यपि अस्मात्प्राचीनैः अवलम्बितानि एव ।

**उपसंहार:**

एवं गुरुः उत्तमशिष्यः , अधिगमविधयः, शिक्षणविधयः, शिक्षणसूत्राणि, इमानि सर्वाणि तत्त्वानि प्राचीनाधिगमप्रणालीं नितारां प्रभावयन्ति स्म। यद्यपि एते विधयः प्रविधयः, एतानि शिक्षणसूत्राणि, संस्कृतविषयाधिगमे उपयुक्तानि तथापि न केवलमेतानि संस्कृतभाषायाः अथवा संस्कृतविषयाणां अधिगमाय उपयोक्तुमर्हाणि अपि तु सर्वेषां विषयाणां अधिगमाय उपयोक्तुमर्हाणि। न केवलमेतावन्मात्रम् अपारे संस्कृतवाङ्मये इतोऽपि नैके प्रविधयः उपलभ्यन्ते; यैः नवीनाधिगमप्रणाल्यां पुनर्नावीन्यमानेतुं शक्यते। तानि च तत्त्वानि ग्राह्यानि। न केवलं ग्रहणमात्रमपि तु एतानि तत्त्वानि शिक्षाक्षेत्रे अनुप्रयोक्तव्यानि । न्यूनातिन्यूनं संस्कृतशिक्षाक्षेत्रे वा उपयोक्तव्यानि इति।

## सन्दर्भाः

१.जे.पि.चाप्लिन् डिक्षनरि आफ् सैकालजि,१९६८
२. Encyclopedia of Education
३. मुण्डकोपनिषत् १-२-१२
४. याज्ञवल्क्यस्मृतिः १-२-१२
५. अथर्वणवेदः
६. गुरुगीता - १९
७. शतपथब्राह्मणम् ५-१-५-१७
८. कठोपनिषद्
९. बौधायनधर्मसूत्रम् - १.२.४७
१०. आपस्तम्बधर्मसूत्रम् - १.२.८.२५
११. तत्रैव १.२.८.२५
१२. तत्रैव १.२.८.२४
१३. महाभाष्यम् - पस्पशाह्निकम्

१४. अन्वयप्रबोध:

१५. अर्थशास्त्रम्, २- प्र - वृद्धसंयोग:

## सन्दर्भग्रन्थसूची

१. पुरातनी शिक्षा - डा. लोकमान्यमिश्र:, मृगाक्षीप्रकाशनम्, लखनऊ,२००४

२. छान्दोग्योपनिषत् - गीताप्रेस् गोरखपुर, २००१

३. उपनिषत् श्री: - डा.ऊर्मिला श्रीवास्तव, आर्य कन्या डिग्री कालेज, इलाहाबाद,२००१

४. कौटिल्यार्थशास्त्रम् - राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, २००१

५. वाकोवाक्यविधि: - डा.ए.सच्चिदानन्दमूर्ति:, सरयूप्रकाशनम्,तिरुपति:,२००१

६.प्राचीनाधिगमप्रणाली (शोधलेख:) - प्रो.वि.मुरलीधरशर्मा, तिरुपति:

७. महाभाष्यम्, पस्पशाह्निकम् - चौखम्बासंस्कृतप्रतिष्ठानम्, देहली, १९८७

□□□

# संस्कृतशिक्षणे तन्यता
# (एकं विहङ्गवीक्षणम्)
## (Glimpses of tension in Sanskrit teaching)

*बि.वि. लक्ष्मीनारायण*
*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

शिक्षणमेका चैतन्ययुक्ता मानिसकी प्रक्रिया । प्रक्रियायामस्यां शिक्षकच्छात्राणां मध्ये सन्ततान्तःक्रिया सम्भवति । शिक्षकोऽत्र विविध छात्रप्रतिक्रियाः अवगच्छन् शिक्षणोद्देश्यानुकूलान् विभिन्नशिक्षणव्यवहारान् सम्पादयन् शिक्षणप्रक्रियां निर्वहति। शिक्ष्ऌृ - विद्योपादाने इति धातोरयमेव भावार्थः प्रतिपाद्यते शिक्षाविद्भिः । तदुक्तम्-

**आचार्योऽरणिराद्यस्स्यात् अन्तेवास्युत्तरारणिः।**
**तत्सन्धनं प्रवचनं विद्या सन्धिः सुखावहः ।।**

यथा अरण्योः घर्षणेनाग्निरुत्पद्यते तथैव गुरुशिष्ययोः अन्तश्चर्यया ज्ञानमुत्पद्यते।

इत्थं शिक्षणप्रक्रिया सुचारु चालनीया चेत् शिक्षकमनः अनुद्विग्नं तन्यतायुक्तं च स्यात्। उद्विग्नमनसा तन्यतायुक्तेन च शिक्षकेण सञ्चाल्यमाना अधिगमप्रक्रिया भवति न कदापि प्रभाविनी ।

प्रशिक्षणसन्दर्भे शिक्षाशास्त्रिच्छात्राः विभिन्नतथ्यैः तन्यतामनुभवन्ति । परं ते स्वीयतन्यतानुभवनं न कदापि प्रकाशयन्ति । तत्प्रकाशनं स्वीयन्यूनतायाः अङ्गीकरण-मेवेति ते भावयन्ति । नैजं शिक्षणासाफल्यं प्रकाशितं भवतीति मन्वानास्ते स्वीयशिक्षणगतसमस्याश्च प्रशिक्षकानपि प्रायः न सूचयन्ति ।

लेखऽयं संस्कृशिक्षकैः विशिष्य संस्कृतच्छात्राध्यापकैः संस्कृतशिक्षणे अनुभूयमानतन्यतां तत्प्रकारान्, तन्निवारणोपायाँश्च प्रतिपादयितुमुद्दिष्टः ।

अद्यतनबालाः एव श्वस्तनपौराः इत्यार्योक्तिः सर्वविदितैव । राष्ट्रस्य स्वाभाविकाः अतिमुख्याश्च विभवः भवन्ति बालाः । तेष्वेव नेतारः, वैज्ञानिकाः, आलोचकाः, सर्जनात्मकशक्तिसम्पन्नाश्च प्रादुर्भवन्ति। अतः सर्वस्यापि राष्ट्रस्य स्वबालानाम् आवश्यकतापूरणं प्रथमं कर्तव्यम् । तथैव तेषां सर्वविधविकासः स्वशिक्षाप्रणाल्या साधनीयो भवति ।

यद्यपि विद्यालयीयच्छात्राः राष्ट्ररूपभवनस्य इष्टकासदृशाः। परम् इष्टकापेक्षया तन्निर्मातुः एव प्राधान्यमिति कथने न कापि अतिशयोक्तिः। राष्ट्रे योग्यशिक्षकाणां स्थानं महत्त्वपूर्णं भवति । योग्यशिक्षकाणाम् आयोजनेन एव राष्ट्रोद्धारकाः नागरिकाः समुद्भविष्यन्ति। अत एव 'किमपि राष्ट्रं शिक्षकस्तरादुन्नततरं भवितुं नार्हति' इत्युदीर्यते। परं पूर्वकाले अध्यापकैः अनुभूताः गौरवतेजस्वितादयः इदानीन्तनेष्वध्यापकेषु न दृश्यन्ते।

अद्यतनस्वतन्त्रभारतेऽस्मिन् बहवः आयोगाः नियुक्ताः । सर्वेऽपि आयोगाः शैक्षिकसमस्याः सामान्यरूपेण, अध्यापकशिक्षासमस्याः विशेषणरूपेण च परामृश्य शिक्षया समाजाभिवृद्धिं, मानवीयमूल्यानि च वर्धयितुं प्रयतयामासुः। एतेषां सर्वेषामपि आयोगानां संस्तुतीभिः भारते इदानीं बह्व्यः शिक्षणप्रशिक्षणसंस्थाः प्रतिष्ठापिताः विद्यन्ते विद्योतन्ते च ।

एवमद्यतनशिक्षाक्षेत्रे अध्यापकशिक्षायाः प्रमुखं स्थानं कल्पितम् । अध्यापकस्थानलाभाय प्रशिक्षणमनिवार्यं कृतम् । अतः बहवः प्रशिक्षिताः सन्तः अध्यापकपदमलङ्कुर्वन्ति। एवम् इतरभाषाध्यापकेभ्यः, तथैव इतरवैज्ञानिकाध्यापकेभ्यः यथा प्रशिक्षणं दीयते प्रशिक्षणसंस्थाभिः तथा संस्कृतभाषाध्यापकानामपि प्रशिक्षण-मत्यावश्यकमिति मत्वा आभारतं संस्कृताध्यापकप्रशिक्षणार्थं प्रशिक्षणसंस्थाः संस्थापिताः।

**संस्कृतशिक्षकप्रशिक्षणसंस्था:**

संस्कृतशिक्षकप्रशिक्षणस्य इतिहासपृष्टस्य अवलोकनेनावगम्यते यत् स्वतन्त्रताप्राप्ते: परमेव अस्य कार्यक्रमस्य प्रारम्भो जात इति । संस्कृतशिक्षक-प्रशिक्षणस्येतिहासस्तु बहुलघीयान् वर्तते। १९५६ संस्कृतायोगस्य संस्तुत्यनुसारं ऐदम्प्राथम्येन आन्ध्रप्रदेशस्थतिरुपतिनगरे १९६१ तमे वर्षे केन्द्रीयसंस्कृतविद्यापीठमेकं भारतसर्वकारेण मानसंसाधनविकासमन्त्राणालयाधीने प्रत्यस्थाप्यत यत्र संस्कृतस्नातकानां, सेवानिरतानाञ्च संस्कृतशिक्षकाणां प्रशिक्षणव्यवस्था समुपकल्पिता । अनन्तरं शनै: शनै: आभारतम् अनेकराज्येषु स्थापितेषु संस्कृतविद्यापीठेषु, संस्कृतविश्वविद्यालयेषु च प्रशिक्षणव्यवस्था समुकल्पि ।

सम्प्रति त्रिषु संस्कृतविश्वविद्यालयेषु, द्वयो: मानितविश्वविद्यालययो:, विशिष्यराष्ट्रियसंस्कृतसंस्थानस्य प्राय: अष्टसु विद्यापीठपरिसरेषु च परम्परागतच्छात्रणां संस्कृतशिक्षककार्यक्रम: उपकल्पि। आहत्य १२ संस्थासु संस्कृतशिक्षणप्रशिक्षण-व्यवस्थासु B.Ed इत्युपाधि: शिक्षाशास्त्रीति नाम्ना दीयते ।

माध्यमिकशिक्षकोच्चमाध्यमिकस्तरीयबालानामध्यापनार्थं शिक्षकाणां निर्माणाय माध्यमिकशिक्षकशिक्षाप्रशिणं दीयते। तस्य B.Ed शिक्षाशास्त्रीति नाम । अस्य स्वरूपम् -

अवधि: - प्रशिक्षणमिदमेकवर्षात्मकमस्ति।

अर्हता - शास्त्रि/आचार्यस्तरे (B.A./M.A) न्यूनतमाङ्का: ४५% भवेयु:। अत्र आरक्षणव्यवस्थानुसारं स्थानानि समुपकल्प्यन्ते ।

कार्यदिनानि - आहत्य २१० कार्यदिनानि भवेयु:। तत्र प्राय: ४० दिनानि शिक्षणाभ्यासाय स्यु:।

प्रशिक्षणकेन्द्रे आनुकूल्यानि - अध्यापयितुं पाठ्यसहगामिक्रिया:, गोष्ठीप्रक्रोष्ठ:, अध्यापकप्रकोष्ठा:, ग्रन्थालय:, भाषाप्रयोगशाला, शिक्षामनोविज्ञानप्रयोगशाला, प्रविधिप्रयोगशाला, अन्तर्जालव्यवस्थादय: भवेयु:।

पाठ्यप्रणाली -

१. सैद्धान्तिकपत्राणि, २. प्रायौगिकविषया:, ३. शिक्षणाभ्यासश्च ।

**शिक्षणाभ्यासश्च**

उपरि निर्दिष्टेषु पाठ्यप्रणालिषु अत्यन्तप्रधानभूत: अन्यतम: च भवति शिक्षणाभ्यास:। अयं च शिक्षणाभ्यासकार्यक्रम: निर्दुष्टतया योजनाबद्धतया च भवति ।

**शिक्षणाभ्यासकार्यक्रम:**

अयञ्च कार्यक्रमस्तु प्राय: चत्वारिंशद्दिनात्मको भवति कार्यक्रमेऽस्मिन् चत्वारिंशत् दिनेषु त्रिंशत् (३०) पाठा: पाठनीया: भवन्ति छात्राध्यपकै: । कार्यक्रमारम्भात्पूर्वमेव प्रशिक्षकै: छात्राध्यापकेभ्य: कतिचन (द्वित्रा:) प्रदर्शनपाठा: पाठ्यन्ते । तदर्थं विद्यालयेभ्य: कतिपयान् छात्रान् प्रशिक्षणसंस्थाम् आनीय आदर्शकक्ष्या पाठ्यते । तत्र प्रशिक्षकै: विविधदृश्यश्रव्योपकरणानि उपयुज्य पाठ्यन्ते । तथैव छात्राध्यापकेभ्य: पाठयोजनालेखनाभ्यासोऽपि कार्यते ।

एतेषां सर्वेषां कृते पृथगङ्का: भवन्ति । परन्तु दृश्यश्रव्योपकरणानि कथं निर्मेयानानि, कथमुपयोक्तव्यानि इति निर्दिष्टनिर्देशानुभावात्, एकविधपाठयोजनाभावाच्च छात्राध्यापका: शिक्षणे अतितरां क्लेशमनुभवन्ति।

यदि छात्राध्यापकानां दृट्या शिक्षणाभ्यासकार्यक्रमं परिशीलयामश्चेत् - अभ्यासविद्यालयेषु ५-१०, क्वचित् ५०-६० छात्रसंख्यायुक्ता कक्ष्या अध्यापनीया भवति । कक्ष्यस्थानां छात्राणामेतत् तथ्यं पूर्वमेव सुष्ठु परिचितं भवति यत् एते नास्मदीया: अध्यापका: प्रत्युत स्वीयौपचारिकता: पूरयितुं कतिचन दिनानि विद्यालयम् आगतवन्त: छात्राध्यापका: इति । अतो वयं स्वतन्त्रा: कक्ष्यायां यत्किमपि कर्तुं शक्यामहे इति । ईदृश्यां परिस्थितौ छात्राध्यापकै: कक्ष्यायां सम्मुखीकर्तव्यानाम् ईदृशच्छात्राणामध्ययन-विषयिका जिज्ञासा न्यूना, अनुशासनभञ्जनरुचिस्तु अधिका च भवति । कदाचित् छात्राध्यापक: अध्ययनशीलानां सहयोगस्वभाविनां छात्राणां कक्ष्यामपि प्राप्नुयात् अथापि तत्समस्या न परिहृता ।

प्रारम्भस्ते शिक्ष्यमाणच्छात्राणामपरिचयेन तेषां संख्याधिक्यात् छात्राध्यापक: नियन्त्रणे असमर्थो भवति । अत्र छात्रनियन्त्रणं, पाठ्यांशस्य सक्रममध्यापनमिति कार्यद्वयं समकालमेव सम्पादनीयमिति समस्या नूतनछात्राध्यापकं बहुधा क्लेशयति । स शिक्षणाभ्यासात्पूर्वं न कदापि कक्ष्यां सम्मुखीकृतवान् । कक्ष्यायां संरचितपाठ्यांशं सक्रममध्यापनीयमिति, तथापि विविधशिक्षणकौशलादय: सहजकक्ष्याशिक्षण-परिस्थितिषु कथं प्रयोक्ता इति अनुप्रयोगक्रमं स: न जानात्येव । बहुतत्त्वभूयिष्ठस्य पाठ्यांशस्य पाठयोजनाबद्धक्रमेण तदन्तर्गतानां सक्रमस्मरणपूर्वकमध्यापनीयमित्ययमपि अंश: छात्राध्यापकाय नितरां क्लेशकर: ।

अत्र पाठ्यांशाध्यापनाय ३५-४५ निमेषात्मकावधि: कल्प्यते । तावद्दीर्घकालं नूतनच्छात्राध्यापक: कक्ष्यायां समेषां छात्राध्यापकानां, प्रशिक्षणस्य च पुरत: सधैर्यं स्थित्वा शिक्षणबिन्दून् क्रमश: स्मरन् पाठ्यांशमध्यापयेत् । अयमपि शिक्षणाभ्यासे छात्राध्यापकस्य बाधको भवति ।

छात्रशिक्षणस्य प्रारम्भत: एव छात्राध्यापकेन विभिन्नपाठा: अध्यापनीया: भवन्ति। परन्तु सर्वेऽपि पाठ्यांशा: सर्वेषां शिक्षणकौशलामामभ्यासाय अनुकूला: न भवन्ति । वर्णनात्मकपाठेषु विषयव्याख्यया व्याख्यानकौशलविकास: भवितुमर्हति। परन्तु व्याकरणांशपाठेषु व्याख्यानस्य पर्याप्तमहत्वाभावात् तत्कौशलविकास: पर्याप्ततया न भवेत् । इत्थं यदि तत्तत्कौशलविशेषाणामभ्यासाय अनुकूला उपयुक्तात् तत्तत्पाठ्यांशा: सुनियोजितारूपेण न पाठ्येरन् तर्हि तत्तत्कौशलानि छात्राध्यापके न विकसेयु:। प्रचलनमानशिक्षणपद्धतौ शिक्षणकौशलविशेषाणाम् अभ्यासाय तदनुकूलोपयुक्तपाठ्यांशानाम् अध्यापनव्यवस्थाया: अभावात् छात्राध्यापकानां कानिचित् शिक्षणकौशलानि अनभ्यस्तानि सन्त्यविकासितानि तिष्ठन्ति ।

निरीक्षकै: छात्राध्यापकस्य अध्यापनविषये मार्गदर्शनार्थं दीयमाना व्याख्यारूपा प्रतिपुष्टिरपि सम्पूर्णपाठमभिलक्ष्य भवति, न तु शिक्षणकौशलविशेषमुद्दिश्य । इत्थं

प्रत्येकशिक्षणकौशलमुद्दिशअय पार्थक्येन सुनियोजितक्रमिकप्रतिपुष्टेरभावात् बहूनि शिक्षणकौशलानि अनभ्यस्तानि, अपर्याप्ताभ्यस्तानि वा तिष्ठन्ति ।

शिक्षणमेका बहुतत्त्ववती सङ्कीर्णप्रक्रिया । अनुभविनोऽध्यापकाः कक्ष्यायाम् असकृत् समस्याम् अनुभवन्ति । कक्ष्याप्रविष्टः छात्राध्यापकः शिक्षणबिन्दून् स्मर्तुं प्रयतमानः छात्रान् विस्मरति । यदि शिक्षणोपकरणं स्मरेत् तर्हि अत्मना सावधानं संरचितप्रश्नानां क्रमं विस्मरेत् । स पञ्चचत्वारिन्निमेषावध्यर्थं पाठयोजनां निरमासीत्। परन्तु कक्ष्याशिक्षण- समये तस्मै दशनिमेषा एव दशहोरायते ।

कक्ष्याध्यापनान्तरं स स्वीयाध्यापनविषये निरीक्षकेण लिखितटिप्पणीः पश्यति। "प्रश्नकरणमसमीचीनम्" समीचीनं भवेत् । कक्ष्यानुशासनं योग्यं न । उत्तमं स्यात्। अध्यापनं सामान्यतः सन्तृप्तिकरमित्यादि । स इमाः टिप्पणीः पठित्वा इतिकर्तव्यताविमूढो भवति । प्रश्नकरणे के दोषा विद्यन्ते येषां कारणेन तदसमीचीनम्। कथञ्च तन्निर्दुष्टं भवेत्? किं करिष्यामि चेत् कक्ष्यानुशासनम् उत्तमं भविष्यति ? पठने के अंशाः सन्तृप्तिकराः, के च न इत्याद्यजानन् स किं कर्तव्यतामूढो भवति।

शिक्षणाभ्यासार्थमपेक्षितपर्याप्तप्रशिक्षणाभावकारणेन उचितव्यवस्थाऽभावेन च छात्राध्यापकाः शिक्षणाभ्यासस्य प्रारम्भकक्ष्यासु पूर्वोक्तकाठिन्यमनुभवन्तीति अनुभूतचरो विषयः । एतद्दुःखमनुभवन्तः केचन छात्राध्यापकाः शिक्षणविषये प्रतिकूलाभिवृत्तिं धरन्तः अभ्यासात् विमुखाः भवन्ति । केचन दैर्यमादाय कक्ष्यासु गत्वाऽपि प्रभावजनकतया अध्यापने असमर्था जायन्ते । पूर्वोक्तकारणैः विभिन्नशिक्षणोद्देश्यप्राप्त्यर्थमपेक्षितानां शिक्षणकौशलानां पर्याप्तविकासेन विनैव छात्राध्यापकाः शिक्षाभ्यासः समाप्तिमेति ।

एवंरीत्या शिक्षणाभ्यासे अनुभूयमानाभिः समस्याभिः छात्राध्यापाकाः (Stress) अनुभवन्तीति ज्ञायते । पूर्वं परामृष्टांशानामाधारेण शिक्षणाभ्याससमये तन्यतोत्पादने इमानि प्रधानकारणानि भवितुमर्हन्ति। तानि च -

१. पर्याप्तसन्नद्धतामकृत्वैव शिक्षाणाभ्यासं प्रति सहसा छात्राध्यापकानां प्रेषणम् ।

२. शिक्षणाभ्याससमये लेखनकार्यस्याधिक्यम् ।

३. शिक्षणाभ्यासार्थम् आवश्यकसौकर्याणामभावः ।

४. प्रशिक्षणसम्बद्धयोः सैद्धान्तिकप्रायौगिकयोर्मध्ये सम्बन्धभावः ।

५. शिक्षाशास्त्रसम्मतानाम् अध्यापनविधीनामाश्रयणेन निर्णीतपाठ्यक्रमसमापनं न भवितुमर्हति।

६. शिक्षाशास्त्रे परिष्कृताध्यापनविधीनां समाश्रयणाय विद्यालयवातावरणमुपयुक्तं नास्ति।

७. दत्तकार्यदानं (Assignment), गृहकार्यदानं तच्छुद्धीकरणं च वस्तुतः क्लेशकरं भवति।

८. शिक्षाशास्त्रसम्मताध्यापनविधीनामवलम्बने इतरे पूर्वप्रशिक्षिताध्यापकाः परिहसन्ति।

९. केषुचित् अभअयासविद्यालयेषु अध्याप्यमानानाम् अध्यापकानां सहयोगाभावः।

१०. दृश्यश्रव्योपकरणानां निर्माणाय प्रशिक्षणसंस्थया धनव्यवस्था न कल्प्यते ।

११. दृश्यश्रव्योपकरणानां निर्माणे समुचितनिर्देशनस्याभावः ।

१२. पाठयोजनालेखने स्पष्टावगाहनाभावः ।

१३. पाठयोजनायाम् एकरूपतायाः अभावः ।

१४. द्वित्राणां प्रदर्शनपाठानामपर्याप्तता अप्रभाविता च ।

१५. संस्कृतभाषायां दक्षताभावः ।

१६. विविधपाठ्यांशोपकरणानाम् अलभ्यता ।

१७. विशेषपाठानां पाठनसमये समुचितानुकूल्यानामपर्याप्तता ।

१८. शिक्षणाभ्याससमये दैनन्दिनकार्यक्रमनिर्वहणे समयाभावाच्च ।

उपरि प्रपञ्चितैः हेतुभिः छात्राध्यापकेषु तन्यता उत्पद्यते । तन्यतोत्पादकानामेतेषां निवारणमेव तन्यतानिवारणोपायः । यतोहि समस्यायाः मूलस्य निवारणं समस्यायाः

श्रेष्ठः परिहारः भवितुमर्हति । तन्यतादिभिः अनभिभूतः छात्राध्यापक एव स्वपाठनकौशलेन छात्रेषु अपेक्षितं प्रभावं जनयितुमर्हति । शिक्षणाभ्यासस्य परिपूर्णतासिद्ध्यै तन्यतानिवारणमनिवार्यकर्तव्यम् ।

## उपयुक्तग्रन्थसूची


१. संस्कृतशिक्षकप्रशिक्षणे सूक्ष्मशिक्षणम् - डा.वि.मुरलीधरशर्मा, राष्ट्रियसंस्कृत-विद्यापीठम्, तिरुपतिः, १९९६.

२. संस्कृतशिक्षणम् - डा.सन्तोष् मित्तल् , जैपूर्, २००६.

३. संस्कृतशिक्षणसमस्-iाः - प्रो.वि.मुरलीधरशर्मा, राष्ट्रि-iसंस्कृतविद्यापीठम्, तिरुपतिः, २००६.

४. अध्यापकशिक्षा - डा.प्रह्लाद्.आर्.जोशी, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः, २००७.

५. Stress in teaching (Second Edition) -Jack Dunham, Routledge, London And New York, 1992.

६. Stress and attitude of Women Teachers - S.M.Rajeswari, Discovery Publishing House Pvt.Ltd. New Delhi, 2008.


□□□

# शिक्षायाः प्रसारणे शिक्षायां गुणवत्तासम्पादने च शिक्षकस्य पात्रम्

*बिचित्ररञ्जन पण्डा*
*(शोधच्छात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः)*

**वेदमनुच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायप्रवचनाभ्यां मा प्रमद.........श्रद्धया देयम् । संविदा देयम्** इति हि वैदिकी वाक् । तैत्तिरीयश्रुतिरियं सत्येन, धर्मेण, अपरिग्रहेण, मानवव्यवहारसम्बन्धकर्मभिः सह स्वाध्याय-प्रवचनयोः महत्त्वमभिदधाति। किञ्च मातृ-पितृ-आचार्य-अतिथि-भृत्यादिभिस्सह सद्व्यवहारप्रदर्शनीयमित्यपि ज्ञानं स्वाध्याय-प्रवचनफलप्रस्तूतमेव । सत्कर्म सम्पादनीयम्, तदितरकर्म न सेवितव्यम्, देवद्विजेभ्यः श्रद्धाऽऽचरणीयमित्यादिसद्विवेकं वेदपुरुषानुमोदितम् । तथा च प्राचीनकाले किञ्चिदन्तरेण कस्यांश्चिद्विद्यायां पारङ्गतत्वमेव विद्यायाः महदुद्देश्यमासीत्। वेदकेन्द्रितेयं शिक्षा पराऽपरेति नाम्ना इहलोके परलोके च हितसाधयित्री विद्यते । सेयं शिक्षा विनयेन पात्रतां, पात्रतया अर्थं, अर्थेन धर्मं, धर्मेण च परमार्थं साधयति । उक्तं हि -

**विद्या ददाति विनयं, विनयाद्याति पात्रताम्।**
**पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततस्सुखम् ।।** इति ।[१]

शिक्षया धियो मालिन्यमपगच्छति । तेन च मनुष्याः देवत्वं प्रयान्ति । लोकेऽस्मिन् विद्या एव तज्ज्योतिः यत् मानवे ज्ञानज्योतिर्ज्वालयति, अविद्यान्धतमसं विनश्यति, दुर्गुणं वारयति, सद्गुणं सञ्चारयति, गौरवं विकाशयति, यशो वितनोति च । यदुक्तं हि -

**लज्जागुणविनम्रसुन्दरमुखी सीमन्तिनीं नेच्छता ।**
**लोके ख्यातिकरं सतामभिमतो विद्यागुणः प्राप्यते ।।**[२] इति।

**देशस्य विकासे शिक्षायाः योगदानम्**

देशस्य समाजस्य संचालने समुत्कर्षणे च शिक्षा महत्वपूर्ण साधनम् । अतः प्राक्कालादारभ्य अद्य यावत् भिन्ने भिन्ने युगे शिक्षायाः भिन्न-भिन्नरूपाणामुद्देश्य-पृष्ठभूमि-नीति-विकास-ह्रासादीनां च विश्लेषणविवेचनादिकं वर्तमान-भाविशिक्षायाः स्वरुपणसमायोजनादीनां कृते आधाराभूमिं संसज्जयति । फलतः विश्वस्मिन् विश्वे प्रतिराष्ट्रं महताऽर्थव्ययेन शिक्षायाः प्रसाराय च सततं समीहते ।

देशस्य विकासदृष्ट्या शिक्षायाः योगदानमभिलक्ष्य महामतः कौटिल्यस्य बज्रघोषः-'राष्ट्रियतायाः राष्ट्रप्रेम्णश्च प्रशिक्षणं शिक्षेति'। वैरनकविरप्याह - 'यो न राष्ट्रे स्निह्यति, न स स्नेहं कर्त्तुं जानीते'। He, who loves not his country, can love nothing - Byron.

किं बहूना शिक्षाऽऽयोगेनापि (१९६४-६६) सघोषमुद्घोष्यते -'भारतस्य भाग्यनिर्माणं तस्य कक्ष्याष्वेव निर्मीयते' इति ।'The desting of India is now being shaped in her class rooms.' अतः अस्माकं विद्यालयेषु विश्वविद्यालयेषु निर्मिताः छात्राः राष्ट्रहिताय न प्रवर्तन्ते इति भावना सुतरामसङ्गतम्। यतः अस्माकं शिक्षाव्यवस्थायाः लक्ष्यं राष्ट्रविकासो वरीवर्ति । शिक्षया एव जनसमाजे राष्ट्रियभावना जागरणीया । राष्ट्रियभावाना सा भावना या मानवं राष्ट्रियविकासार्थं प्रेरयति, येन सः स्वदेशाभिमानं स्वदेशगौरवं च प्राणेभ्योऽप्यधिकं भावयति ।

**शिक्षायां गुणवत्तासंपादने शिक्षकस्य भूमिका**

प्राचीनभारते मानवीयकर्तव्यानामावश्यकतानाञ्च व्याख्या आध्यात्मिक-दृष्ट्या जाता। तदानीं चतुर्वर्गप्राप्तिरेव मानवस्यान्तिमलक्ष्यमासीत्। जनेषु सद्विवेकोत्पादनाय तेषां सर्वाङ्गीणविकासाय च गुरवः प्रयत्नशीला भवन्ति स्म। व्यक्तेः चरित्रनिर्माणं व्यक्तित्वस्य विकासः सामाजिककर्तव्यपालनं

जीविकोपार्जनक्षमता भारतीयसंस्कृतेः प्रचारः प्रसारश्च तदानीं शिक्षायाः उद्देश्यमासीत् । एतेषामुद्देश्यानां प्रापणे अध्यापकाः महत्वपूर्णा भूमिकाः निर्वहन्ति स्म ।

मनुना उक्तम्- यदि आचार्यः योग्यशिष्यं न प्राप्नोति चेत् विद्यादानं न कुर्यात्। यतो हि अयोग्येभ्यः छात्रेभ्यः विद्यादानापेक्षया विद्यया सह मरणं श्रेष्ठम्। यथा -

**विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ।**
**आपद्यपि हि घोरायां न त्वेनाभिरिणे वपेत्।।**[३]

अतः शिक्षकैः द्रष्टव्यं यत् छात्रस्य विकासः कस्यां दिशि विद्यते । तस्य प्रवृत्त्यनुसारं शिक्षां दद्यात् । अनेन सफलताप्राप्तये मार्गः सुगमो भवति । बीजरूपेण सर्वे भावाः छात्राणामन्तःकरणे निहिता भवन्ति, ये च उचितमार्गदर्शनेनुद्बुद्धाः जायन्ते । जनानामन्तःकरणे त्रिविधगुणाः स्थायिरूपेण विद्यमानाः भवन्ति । सत्त्वगुणस्योद्रेकेण सत्कार्येषु प्रवृत्तिर्जायते। शिक्षायाः कार्यं तु सत्त्वस्योद्रेकेण रजस्तमसोश्च्छादनमेव मन्यते । प्राचीनभारतीयशास्त्रेष्वेतदर्थं बहुविधोपायाः वर्णितास्सन्ति । अस्योपयोगेन इदानीमप्यपेक्षितपरिणामः प्राप्तुं शक्यते ।

प्रश्नोपनिषदि भारद्वाजस्येदं वचनं -'नाहमिदं वेद यद्यहमिमवेदिषं कथं ते नावक्ष्यमिति'[४] भगवतः पिप्पलादस्य षोडशकलायुक्तपुरुषविषयकजिज्ञासा जागर्ति । तदेदं वचनं भारद्वाजस्य भगवतः येनेदं ज्ञायते यत् - ज्ञातं सर्वं योग्यशिष्यायोपदिशेत्। अज्ञातस्य ज्ञानाय सततं प्रयत्नशीलो भवेदध्यापकः ।

यास्केनाचार्यशब्दस्य त्रिधा व्याख्या कृता । यथा - 'आचार्यः कस्मात्? आचार्य आचारं ग्राहयति । आचिनोत्यर्थान् आचिनोति बुद्धिमिति वा'[५] । एताः तिस्रोऽपि व्याख्याः आचार्यस्य कर्तव्यानि प्रकाशयन्ति। तदानीं शिक्षायाः प्रथमोद्देश्यमासीत् चरित्र निर्माणम्। अतः आचार्यस्य प्रथमं कर्तव्यं शिष्यस्य चरित्रनिर्माणमेवासीत्। परन्त्वेदं कार्यमुपदेशमात्रेण नैव सिध्यति । अतः आचार्यः स्वयमपि आचारवन्तः आसन् । यथा मनुना उक्तम् -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**[६]

आचार्यशब्दस्य द्वितीया व्याख्या यास्केनैवं कृता -'ज्ञानेन शिष्याणां बुद्धेः विकासः' इति। बालकानां ज्ञानस्य विकासः विस्तारश्च शिक्षोद्देश्यं वरीवर्ति, किञ्चास्य सम्पादनं गुरोः कर्तव्यमिति। आपस्तम्बधर्मसूत्रे स्पष्टरूपेण उल्लिखितमस्ति यत् यः आचार्यः ब्रह्मचारिणे ज्ञानदानाय संकोचं करोति सः आचार्यः न, स आचार्यपदस्य कृते सर्वथा अयोग्येति वा ।

यास्कस्य तृतीयव्याख्या वर्तते- यः शिष्याणां बुद्धिं विकासयति परिपक्वयति च स आचार्यः । सर्वविदितमेवेदं यत् शैक्षिककार्यक्रमाणां व्यापकत्वे विस्तृत्वेऽपि निश्शेषज्ञानप्राप्तिर्न सर्वत्र सम्भवति । मानवजीवने आगताः समस्याः बहुविधाः भवन्ति प्रायः छात्रजीवने समस्याऽभिमुखीकृत्य स्वयं समादधीरन्, तथाऽध्यापकेन प्रयासो विधेय इति शिक्षायाः मुख्यमुद्देश्यमासीत् ।

तदानीमध्यापनं वृत्त्यर्थं नासीत् । विद्याधनं दानाय भवतीत्यादर्शः तेषां समक्षमासीत्[७] । मनुनाऽपि निर्दिष्टमध्यापनं सात्त्विकं जीवनविधिं स्वीकुर्यात्, येन शिष्यास्तमादर्शं कृत्वा विहारविलासादिभ्यो विरक्ताः भवेयुः ।

सर्वेषां वर्णानां धनिकाः दरिद्राः वा बालकाः उपनयनादनन्तरं गुरुकुले निवसन्ति स्म । ते ब्रह्मचारिणोऽभवन्। एतेषां भरणपोषणाध्ययनस्योत्तरदायित्व-ञ्चाचार्यस्यासीत् ।

आचार्यस्य नैतिकगुणानामत्यधिकं महत्वमासीत् । छात्रोऽपि तदा सत्यवादी, धैर्यशाली, विद्यासुनिपुणः, दयालुः, आस्तिकः, पवित्राचरणयुक्तः, स्वाध्यायी, जितेन्द्रियश्च भवति स्म। मत्स्यपुराणे आचार्यस्य लक्षणमस्ति - बुद्ध-लोभ-दम्भरहितः विनयशीलश्चेति[८] ब्रह्मयज्ञश्चाचार्यस्य कर्तव्यं वरीवर्ति[९]। आचार्यः पक्षपातरहितस्सन् सर्वेभ्यः शिष्येभ्यः समानरूपेण विद्यादानं कुर्यात्। स अनुशासनम्प्रति जागरुकस्सन् इहलौकिक-पारलौकिक-परम्पराविरुद्धकार्ये शिष्यानवरोधयेत् । आचार्यः शिष्यम्प्रति स्नेहशीलः स्यात्, परन्तु कुमार्गगामिनः छात्रान् प्रति कठोरनियन्त्रणं स विदधीत ।

तैत्तरीयोपनिषदि शिक्षावल्यामुल्लिखितमस्ति यत् जीवनस्य विभिन्नादर्शानां कर्तव्यानाञ्च पालनं कुर्वन्तः स्वमुख्यकर्तव्यानां स्वाध्यायानां प्रवचनानाञ्च पालनं करणीयं शिक्षकैरिति । यथा -'ऋतं च स्वाध्याय प्रवचने च। सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्याय प्रवचने च'[१०] ।

वस्तुतः तदानीं केवलमध्यापनमेव गुरोः कर्तव्यं नासीत् अपितु तेषां जीवनमेव छात्राणां कल्याणाय समर्पितं भवति स्म । गुरुः छात्रस्य मानसपिता भवति स्म, अतः नैतिकदृष्ट्या शिष्यस्य समस्तदोषाणामुत्तरदायित्वं तेषामेवासीत्। यथा - 'अतीत्य बन्धूनवलम्ब्य शिष्यानाचार्यमागच्छति शिष्यदोषः' ।

अध्यापनमतिरिच्य शिष्याणां चरित्ररक्षणमपि गुरोः कर्तव्यमासीत् । अतः स शिष्यान् कर्तव्याकर्तव्यं, स्वास्थ्यरक्षणं, सङ्गतिः, अगम्यागम्यमित्यादि विषये शिक्षयति स्म । यदि शिष्याः निर्धनाः तर्हि तेषां भरणपोषणस्योत्तरदायित्त्वमपि गुरोरेवासीत् । तेषां रुग्णावस्थायां गुरुरेव पितृसदृशं तेषां स्वास्थ्यलाभाय सर्वविधप्रयत्नं करोति स्म ।

इत्थमुपयुक्तपर्यायलोचनेन ज्ञायते यत् प्राचीनभारतीयसंस्कृतौ अध्यापकेषु निम्नोक्ताः गुणाः आसन्निति । ते च -१) शिष्यस्य नूतनजन्मदाता[११] २) पराऽपराविद्यायाः गहनाध्ययनकर्ता ३) अज्ञानान्धकारदूरकर्ता ४) ब्रह्मचारी (आचार्यो ब्रह्मचारी)[१२] ५) शिष्यस्य सन्मार्गद्रष्टा ६) स्नेहस्यागारः ७) आत्मविद्याज्ञानी ८) धर्मकर्मसुकुशलः ९) भौतिकताभिन्नः पुरुषः १०) कुशलवक्ता ११) कठिनं विषयं सारल्येन प्रतिपादनक्षमः १२) शुद्धाचरणम् १३) ज्ञानप्रेमी १४) निस्वार्थभावनयाज्ञानप्रदानकर्ता १५) शिष्यं पुत्रवत् अङ्गीकर्ता १६) पारलौकिकज्ञानप्रदाता १७) संस्कृत्याः परिमार्जकः रक्षकश्चेति।

साम्प्रतिककाले तु शिक्षाविदः शिक्षायाः प्रसारणे, शिक्षायां गुणवत्ताधाने शिक्षकस्य पात्रत्वमित्थमभिप्रयन्ति। यथा -

१) छात्राणां चरित्रनिर्माणम्

२) प्रभावोत्पादकरीत्या पाठनम्

३) परिवारैः समाजैः सह सम्बन्धस्थापनम्

४) छात्राणां व्यावसायिकविकासः

५) समाजस्य नैतिकस्तरोन्नतिः

६ह्व) छात्रप्रगत्या सहाभिभावकानां परिचयसम्पादनम्

७) पाठ्यक्रमस्य विकासः दोषनिवारणञ्च

८) कक्ष्यायाः सुप्रबन्धः छात्रेषु सहयोगभावविकासश्च

९) प्रभाविविद्यालयसम्पादनम्

१०) छात्रेषु नेतृत्वगुणस्य सामाजिकभावनायाश्च विकासकरणम्

११) राष्ट्रियभावनायाः विकासकरणश्चेति ।

शिक्षायाः गुणात्मकविकासे अध्यापकः कुञ्चिका भवतीति शिक्षाऽऽयोगोऽपि (१९६४-६६) स्पष्टयति । राष्ट्रस्य मार्गदर्शको वर्तते अध्यापक इति भारतस्य भूतपूर्वराष्ट्रपतेः डा. सर्वपल्लीराधाकृष्णन् महाभागस्योक्तिः । अध्यापकः राष्ट्रस्य भाग्यनिर्मातेति हुमायूँ कविना निर्णीयते। वास्तविकेतिहासस्य निर्माता अध्यापक इति एच्.जी.वेल्स महाभागो ब्रुते । 'संस्कृत्याः पोषकः' इति ग्राफोर्थ (Graforth) महोदयेनोद्घुष्टम् ।

किञ्चाध्यापकः यदि ज्ञानी, छात्रेषु ज्ञानसंक्रमणक्षमः, समयानुवर्ती सामाचिकश्च वर्तते तर्हि सः आदर्शाध्यापकदभाजो भवति । अध्यापकमुद्दिश्य छात्रस्य मुखात् स्वतः निस्सरति इमानि वचनकुसुमानि -

**जनस्त्वमेकः स्मरणीय एव,**
**त्वया सह स्थिति आनन्ददायिका एव ।**
**दयालुता साधुता च गुणस्तवान्यत्र बहुदुष्प्रापाः,**
**सन्निध्यं विद्यते तावकममापम् ॥**

यतः छात्र अध्यापकस्य प्रमाणपत्रं वरीवर्तीति प्रकारेणैव प्राचीनार्वाचीनकाले शिक्षायाः प्रसारणे, शिक्षायां गुणवत्ताधाने शिक्षकस्य पात्रमासीत् वर्तते च।

## सन्दर्भाः

१. हितोपदेशः मित्रलाभः ६
२. सुभाषितरत्नभाण्डारः, ४५.२५
३. मनुस्मृतिः २-११३
४. प्रश्नोपनिषत् ६-४
५. निरुक्तम् १-४
६. मनुस्मृतिः २-२०
७. तत्रैव ३-७०
८. तत्रैव १४५-२८
९. तत्रैव २-१४०
१०. तैत्तिरीयोपनिषत् १-९
११. अथर्ववेदः ११-५-३
१२. तत्रैव ११-५-१६

## सहायकग्रन्थसूची

१. अध्यापक शिक्षा, एन.आर. सक्सेना, आर.लाल बुक डिपो, मेरठ, २००७
२. अध्यापक शिक्षा में प्रायोगिक कार्य, प्रो.एम.के.शर्मा, ऋचा प्रकाशन, उदयपुर, २००७
३. दशोपनिषत्, गीताप्रेस, गोरखपुर
४. निरुक्तम्, यास्काचार्यः
५. भावी शिक्षकों के लिए आधारभूत कार्यक्रम, जगदीश नारायण पुरोहित, राजस्थान हिन्दी ग्रन्थ अकादमी, जयपुर, २००८
६. मनुस्मृतिः, मनुः

□□□

# राष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

तिरुपतिः - ५१७ ५०७ (आं.प्र.)

क्रमाङ्कः__________ दिनाङ्कः ___________

## महस्विनीसदस्यतापत्रम्

अस्माकं ..........................................................................................

विश्वविद्यालयस्य/महाविद्यालयस्य/विद्यापीठस्य/संस्थानस्य पुस्तकालयाय शोधपत्रिकायाः **महस्विन्याः** वार्षिकं/द्विवार्षिकं/त्रिवार्षिकं........................ ग्राहकत्वमपेक्षितम्।

अहं ..........................................................................विद्यापीठशोधपत्रिकायाः **महस्विन्याः** एक/द्वि/त्रि.........वर्षाणि व्यक्तिगतसदस्यः/संस्थागतसदस्यः भवितुमिच्छामि।

**महस्विन्याः** वार्षिकशुल्कं रू.२५५/-, द्विवार्षिकशुल्कं रू.४२५/-, त्रिवार्षिकशुल्कं रू.६८०/- बैंकड्राफ्टद्वारा **कुलसचिवः** (Registrar), **राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः-५१७५०७** इति नाम्ना प्रेषयामि।

बैंकड्राफ्टसंख्या ....................., बैंकनाम..........................................................

बैंकड्राफ्टतिथिः ..................................... *हस्ताक्षरम्*

नाम सङ्केतश्च.......................................................................................................

✄.......................................................................................................

## स्वीकृतिपत्रम्

प्रो/डॉ/ श्री/ श्रीमती....................................................................... सकाशात्

**महस्विन्याः** वार्षिक/द्विवार्षिक/त्रिवार्षिकशुल्कं रू. .........................मुद्रारूपं/ड्राफ्ट सं. .................. दिनाङ्के .........................सधन्यवादं प्राप्तम्।

*हस्ताक्षरम्*